इतश्चानेदंसक्तं ब्रह्मविषयमित्याह ब्रह्मणीति तदेव स्वज्ञानपरिपाकसंभवादित्यर्थः ननु यत्र समत्वदर्शनं तत्रैव स्थितिरिदंतत्त्वेन गुणकर्मरूपकर्मणि चेति विभागोऽस्तीत्यत्राह दर्देति समत्वदर्शनस्य संन्यासविषयत्वे हेतुमाह सर्वकर्माणीति अध्यायपरिसमाप्तेः सर्वकर्माणि सारम्भ तत्र तत्र सर्वकर्मसंन्यासाभिमानात् हि विषयमिदं समत्वदर्शनं नाम्युपेतं च निरहंकारे निरवकाशं स्वत्वमित्यर्थः नन्विष्टानिष्टप्राप्तिप्राप्तौ हर्षविषादौ विदुषोऽपि न विरुध्येते निर्दोषे ब्रह्मणि कथं स्थितिर्लभ्यते इत्याशङ्क्याह हर्षप्रतीतेरसो कमुत्थापयति यस्मादिति आत्मतत्त्वनिष्ठस्य विदुषो हर्षविषादनिमित्ताभावाच्च तावुचितावित्याह स्थिरबुद्धिरिति ननु ति

कर्मविषयं च समासव्यासाभ्यामित्यादीदं तु सर्वकर्मसंन्यासविषयं प्रस्तुतं सर्वकर्माणि मनसेत्यारभ्याध्यायपरिसमाप्तेः यस्मान्निर्दोषं समं ब्रह्मात्मा तस्मान्नेति न प्रहृष्येत् प्रहर्षं न कुर्यात् प्रियमिष्टं प्राप्य लब्ध्वा नोद्विजेत् प्राप्य चाप्रियमनिष्टं लब्ध्वा देहमात्रात्मदर्शिनो हि प्रियाप्रियप्राप्ती हर्षविषादौ कुर्वाते न केवलात्मदर्शिनः तस्य प्रिया

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियं स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः २० ॥ ॥ ॥

प्रियप्राप्त्यसंभवात् किं च सर्वभूतेष्वेकः समो निर्दोष आत्मेति स्थिरा निर्विचिकित्सा बुद्धिर्यस्य स स्थिरबुद्धिरसंमूढः संमोहवर्जितश्च स्याद्यथोक्तब्रह्मविद्ब्रह्मणि स्थितोऽकर्मकृत् सर्वकर्मसंन्यासीत्यर्थः २० ॥ ॥ ॥

हर्षविषादनिमित्तत्वं प्रियाप्रिययोः सिद्धमिति कथं तत्प्राप्त्यो हर्षोद्वेगौ न कर्तव्यावित्याकाङ्क्षायामाह देहेति विदुषोऽपि प्रियाप्रियप्राप्तिसामर्थ्यादेव हर्षविषादौ दुर्वाराविति शङ्कामाह नहि बलेनेति अद्वितीयात्मदर्शनशीलस्य व्याप्तिरूपप्रियाप्रियप्रसङ्गो नास्ति तन्निमित्तो हर्षविषादाविमौ स्तः इत्यपि विदुषो हर्षविषादावसंभाविताविताह स्थितेति निर्दोषे ब्रह्मणि मग्नस्य हर्षविषादनिमित्तमोहेन हर्षविषादहेतुर्नारहितो यथोक्ते सर्वदोषरहिते ब्रह्मण्यहमस्मीति विद्यावान् अदोषप्रयत्नेनास्मिन्नेव ब्रह्मणि स्थितस्तद्धेतोर्भ्रान्तेर्मोहप्रसक्त्यभावान्नैव हर्षविषादभागी भवितुमर्हतीत्यर्थः २०

उक्तश्लोकस्य तात्पर्यमाह अयं चेति श्रेयोमार्गप्रतिपक्षत्वं कष्टतमत्वे हेतुस्तत्रैव हेत्वन्तरमाह सर्वेति प्रयत्नाधिक्यस्य कर्त्तव्यत्वे हेतुं सूचयति दुर्निवारश्चेति प्रसिद्धं हि कामक्रोधोद्भवस्य वेगस्य दुर्निवारत्वं येन मातरमप्यधिरोहति ~~पितरम~~ पितरमपि हंति तमेव स्वपरिहर्त्तुं दर्शयति शक्नोतीति यथोक्तं वेगं बाह्यान्तर्यत्नेन परित्यागमात्रयोगे वेरे ह्रात [illegible] हस त्रं यः सोढुं समर्त्ते त स्तोतित्वभुक्तरति मारणसीमाकारणस्य तात्पर्यमाह मरणेति प्रतिक्षणं हि शरीरं तत्र हेतुमाह अनंतेति आध्युपहतानां हृष्टानां च कामादिविवेगेन भवतीत्याशंक्याह यावदिति कामक्रोधोद्भवे वेगं यावत्प्राणमात्रौ कामं मनोविकारविशेषत्वेन आचष्टे कामइति

श्री

अयं च श्रेयोमार्गप्रतिपक्षी कष्टतमो दोषः सर्वानर्थप्राप्तिहेतुर्दुर्निवारश्चेति तत्परिहारे यत्नाधिक्यं कर्त्तव्यमित्याह भगवान् शक्नोतीति शक्नोति उत्सहते इहैव जीवन्नेव यः सोढुं प्रसहितुं प्राक् पूर्वं शरीरविमोक्षणात् आमरणात् मरणसीमाकरणं जीवतोऽवश्यंभावी हि कामक्रोधोद्भवो वेगः अनंतनिमित्तवान्हि सरति यावन्मरणं तावद्धि अप्रमत्तो परस्य

८३

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः २३ ॥ ॥ ॥

कामः इंद्रियगोचरप्राप्ते इष्टे विषये श्रूयमाणे स्मर्यमाणे वानुभूते सुखहेतौ या गर्द्धिस्तृष्णा स कामः क्रोधश्चात्मनः प्रतिकूलेषु दुःखहेतुषु दृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु यो द्वेषः स क्रोधस्तौ कामक्रोधौ उद्भवो यस्य वेगस्य स कामक्रोधोद्भवो वेगः रोमांचनहृष्टनेत्रवदनलिंगोऽन्तःकरणप्रक्षोभरूपः कामोद्भवो वेगः गात्रप्रकंपप्रस्वेदसंदष्टोष्ठपुटरक्तनेत्रादिलिंगः क्रोधोद्भवो वेगस्तं कामक्रोधोद्भवं वेगं य उत्सहते सोढुं प्रसहितुं स युक्तो योगी सुखी चेहलोके नरः २३ ॥ ॥

गु

कामस्य मनोविकारविशेषत्वं तदाह इंद्रियेति कामो गर्द्धिस्तृष्णेति पर्यायाः संतः शब्दा मनोविकारविशेषपर्यवसन्ना इत्यर्थः क्रोधश्च मनोविकारविशेषस्तदाह द्वेष इति क्रोधश्चेति तमेव क्रोधं स्फुटयति आत्मन इति एवं पर्यायाः संतः शब्दा मनोविकारविशेषपर्यवसन्ना इत्यर्थः एवं कामक्रोधौ व्याख्याय तयोरुत्कटत्वावस्थापन्नयोर्वेगस्य ताभ्यां उत्पत्तिं चयस्यतिनाविवितिपद्योक्तवेगावन्तमे पापप्रद्योतयति रोमांचनहृष्टनेत्रादिना उभयविधवेगं यो जीवन्नेव सोढुं शक्नोति तं उत्कर्षधीरेयत्वेन स्तौति तमित्यादिना

२२

तत्रैव हेतुं तत्परत्वेनोत्तरश्लोकमुदाहरति इतश्चेति विषयेभ्यः सकाशादिंद्रियाणीतिशेषः वैराग्यार्थमेव वैषयिकानि सुखानि दूष यति येहीति ननु विषयेंद्रियसंयोगसमुत्पन्नेषु भोगेषु जंतूनामभिरुचिर्दृश्यते कुतस्तेषां दुःखयोनित्वमित्याशंक्याविवेकिनां तेषु संगेपि न विवेकिनामित्याह आद्यंतवंत इति यस्मादाधिव्याधिजरामरणादिसहितेभ्यः समागमनादिक्लेशरूपभागिभ्यश्च विषयेंद्रियसंबंधेभ्यो भोगाः सुखलवानुभवा जायंते तस्मात्ते दुःखहेतवो भवंतीति योजना अविद्येति भोगानां दुःखयोनित्वं कुतो भोगजन्यत्वमित्याशंक्य भोगानामविद्यामयत्वात्तन्निबंधनत्वं दुःखानां युक्तमित्यभिप्रेत्याह अविद्येति भोगानां दुःखयोनित्वे मान

स्तश्च निवर्त्तयेत येहीति ये हि यस्मात्संस्पर्शजा विषयेंद्रियसंस्पर्शेभ्यो जाता भोगा भुक्तयो दुःखयोनय एव ते विद्याकृ तत्वात् तद्दर्शयते आध्यात्मिकादीनि दुःखानि तन्निमित्तान्येव यथेहलोके तथा परलोके पीति गम्यते एवशब्दात् न संसारे सु खस्य गंधमात्रमप्यस्तीति बुद्ध्वा विषयमृगतृष्णिकायाः इंद्रियाणि निवर्त्तयेत् न केवलं दुःखयोनय एवाद्यंतवंतः

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते आद्यंतवंतः कौंतेय न तेषु रमते बुधः २२ ॥ ॥ ॥ ॥

च आदिर्विषयेंद्रियसंयोगो भोगानामंतश्च तद्वियोग एव अत आद्यंतवंतोऽनित्या मध्यक्षणभावित्वादित्यर्थः हे कौंतेय न तेषु रमते बुधो भोगेषु विवेकी अवगतपरमार्थतत्वोऽसंततमूढानामेव हि विषयेषु रतिर्दृश्यते यथा पशुप्रभृतीनां २२

मनुभवानुपपत्तिरित्यंग्रेहीति ऐहिकानां भोगानां दुःखनिमित्तत्वेपि नामुष्मिकाणां तथात्वमनुभवाभावादित्याशंक्यावधारणात्तमर्थं सिद्धमर्थमाह एवेति पूर्वोक्तस्यार्थस्योत्तरश्लोकार्थमाह नेत्यादिना इतश्च विषयेभ्यः सकाशादिंद्रियाणि निवर्तयितव्यानीत्याह न केवलमिति आद्यंतवत्वे मध्यक्षणावस्थितत्वेन स्वरूपेणास्थिरत्वात् दुःखयोनित्वं भोगानामित्याह आदिरिति हितेषां क्षणभंगुरत्वेन तृष्णिकाविषयाकारमनोवृत्तिरूपत्वाद्धितत्वमपि नास्तीति मन्वानः सन्नाह अवगतेति बुधेर्विवेककारितां विवेकिभोगेष्वप्रवृत्तौ उपलब्धेश्चतेषामाभासत्वमतिभातीत्याह नतेष्विति यतः कोपि ज्ञानमार्गीत्यमिदं पुनरौत्यानभि। तत्र पुनरुक्तिः ननु केषांचिद्विदुषां योगिनामपि विवि

पा

८ पञ्चमानंदगिरि- अ कं ति ११

अ

यवतां ६

दी

गी०भा०५
२६

एवंकामक्रोधयोर्वेगः सोढव्यो दर्शितः संप्रति तावेव तावाविशाह किंचेति ननु दर्शिनविशेषणवतो मृतानामेव मोक्षो न तु जीवतामिति
चेन्नेत्याह अभित इति असम्यग्दर्शिनामपि तर्हि प्रभूतकामादिप्रभावविधुराणां किमिति मोक्षो न भवतीत्याशंक्य सम्यग्दर्शनवैशेष्या
भावादित्याह विदितेति उक्तेऽर्थे श्लोकाक्षराणामन्वयमाचष्टे कामक्रोधेत्यादिना २६ इत्तमनूद्योत्तरश्लोकत्रयस्य तात्पर्यमा

किंच कामेति कामक्रोधवियुक्तानां कामश्च क्रोधश्च कामक्रोधौ ताभ्यां वियुक्तानां यतीनां संन्यासिनां यतचेतसां संयतांतः
कारणानां अभित उभयतो जीवतां मृतानां च ब्रह्मनिर्वाणं मोक्षो वर्त्तते विदितात्मनां विदितो ज्ञात आत्मा येषां ते विदिता
त्मानस्तेषां विदितात्मनां सम्यग्दर्शिनामित्यर्थः सम्यग्दर्शननिष्ठानां संन्यासिनां सद्योमुक्तिरुक्ता कर्मयोगश्चेश्व
रार्पितसर्वभावेनेश्वरे ब्रह्मण्याधाय क्रियमाणः सत्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासक्रमेण मोक्षायेति भगवान्

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् अभितो ब्रह्मनिर्वाणं वर्त्तते विदितात्मनाम् २६ स्पर्शान्कृत्वा बहिर्बाह्यां

पदेपदे ब्रवीति स्मेति च २६ अथेदानीं ॥ श्चक्षुश्चैवांतरे भ्रुवोः प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ २७ ॥ दि

ध्यानयोगं सम्यग्दर्शनस्यांतरंगं विस्तरेण वक्ष्यामीति तस्य सूत्रस्थानीयान् श्लोकानुपदिशति स्म स्पर्शानिति स्पर्शान् श
ब्दादीन्कृत्वा बहिर्बाह्यान् श्रोत्रादिद्वारेणांतर्बुद्धौ प्रवेशिताः शब्दादयो विषयास्तानचिंतयतो बाह्या बहिरेव कृता भव
ति तानेवं बहिः कृत्वा चक्षुश्चैवांतरे भ्रुवोः कृत्वेति संबध्यते तथा प्राणापानौ नासाभ्यंतरचारिणौ समौ कृत्वा २७ ५

ह सम्यग्दर्शनमिति ईश्वरार्पितसर्वभावेनेति भगवति परस्मिन्नीश्वरे समर्पितः सर्वैर्बाह्यैर्देहेन्द्रियमनसां भावश्चेष्टाविशेषो न क्व
चिदपि बहिस्तेनायमास्तेनेत्यर्थः कर्मयोगस्य तत्फलस्य चाभिधानानंतरमिति यावत् शब्दार्थः स्वतो बाह्यानां विषयाणां कुतो बाह्
करणमित्याशंक्याह श्रोत्रादीति तेषां बहिष्करणं कीदृगित्याशंक्याह तानिति २७ ॥ श्रीगणेशाय नमः ॥

स०
२६

तरं

अन्तानसौसंतमंतरंगमात्ममात्रनिरंतरं तं दर्शयन्नाह तं ब्रह्मविदमेव विशिनष्टि कथंभूतश्चेति यथांतरेव सुखं न बाह्यैर्विषयैस्त
थाः तेरेव मोति नेश्रोत्रादिभिरतो विषयांतरविहारहितरसाह तथेति यथोक्तविशेषणसमाधिमान् जीवन्नेव वस्तुर्कि न विग
च्छ । तीसाह सयोगीति आत्मन्यंतःसुखमिति । बाह्यविषयनिरपेक्षं स्वं विवक्षितमंतरारामे त्वं च स्त्रियादिविषयापेक्षामंतरेण
क्रीडापयुक्तफलभाक्त्वमपि मतमिंद्रियादिजन्यप्रकाशाभ्यमात्मज्योतिरित्युक्तं यथोक्तविशेषणसंपन्नः समाहितः सन् जीवन्नेव
कथंभूतश्च ब्रह्मणि स्थितो ब्रह्म प्राप्नोतीत्याह भगवान् योंतरिति योंतरात्मनि सुखं यस्य सोंऽतःसुखस्तथांतरेवात्म
न्यारामः । क्रीडा यस्य सोंतरारामस्तथैवात्मैव ज्योतिः प्रकाशो यस्य सोंऽतर्ज्योतिरेव यः ईदृशः स योगी ब्रह्मनिर्वाणं ब्रह्म
णि निवृत्तिं मोक्षमिह जीवन्नेव ब्रह्मभूतः सन्नधिगच्छति प्राप्नोति २४ किंच लभंत इति लभंते ब्रह्मनिर्वाणमृषयः मोचं

योंऽतःसुखोंऽतरारामस्तथांतर्ज्योतिरेव यः स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति २४ लभंते ब्रह्मनि
र्वाणमृषयः क्षीणकल्मषाः छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ।। २५ ।। ।। ।।

सम्यग्दर्शिनः क्षीणकल्मषाः क्षीणपापादिदोषाः छिन्नद्वैधाः छिन्नसंशयाः यतात्मानः संयतेंद्रियचित्ताः सर्वभू ४
तहिते रताः सर्वेषां भूतानां हिते आनुकूल्ये रता अहिंसकाः सर्व
२

ब्रह्मभावं प्राप्नोति ब्रह्मणि वा स्थितो निर्दिष्टं सर्वानर्थनिर्हं \\
स्वपालनहितास्थितामनतिशयानंदाविर्भावलक्षणं प्राप्नोतीत्याह ईदृशा इति २४ मुक्तिहेतोर्ज्ञानस्य साधनांतरमाह किंचेति
यज्ञादिनिसकर्मानुष्ठानात् पापादिलक्षणं कल्मषं क्षीयते ततश्च श्रवणादौ प्रवृत्तेः सम्यग्दर्शनं जायते ततो मुक्तिरवयत्नेन भवतीत्याह ल
भंत इति ज्ञानप्राप्त्युपायांतरं दर्शयति छिन्नेति श्रवणादिना संशयनिरसने कार्यकारणानि यमनेंद्रियाणु ते वाहिंसकत्वमिते
नरेपि तत्त्वज्ञानप्राप्तौ कारणमिति सर्वः अहिंसाख्यानं स्पष्टतात्पर्यमात्मायते २५

गी॰भा॰५
१७

ईश्वरस्य ताटस्थ्यं स्फुटयति सर्वभूतानामिति तर्हि तत्कृतत्वाद्व्यवस्थितं कर्मतत्फलसंसर्गित्वं स्यादित्याशंक्याह सर्वकर्मेति न च तस्य बुद्धितद्वृत्तिसंबंधोपि वस्तुतोस्तीत्याह सर्वप्रत्ययेति यथोक्तेश्वरपरिज्ञानफलमभिदधाति नारायणमिति तदेवं कर्मयोगस्यानु

सर्वभूतानां हृदयेशयं सर्वकर्मफलाध्यक्षं सर्वप्रत्ययसाक्षिणं नारायणं मां ज्ञात्वा शांतिं सर्वसंसारोपरतिमृच्छति प्राप्नो

दं सर्व सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति २९ ॥ ॥

55

ति २९ इति श्रीभगवद्गीताभाष्ये शंकरभगवतः कृतौ प्रकृतिगर्भो नाम पंचमोध्यायः ५ श्रीगणेशाय नमः

ख्यसंन्यासापेक्षया प्रशस्तत्वेपि ततो मुख्यसंन्यासस्याधिक्यान्नहतो बुद्धिशुद्ध्यादिमुक्तस्य कामक्रोधोद्भववेगमिहैव सोढुं शक्तस्य शमदमादिमतो योगाधिकृतस्य त्वंपदार्थाधिगतस्य परमात्मानं प्रत्यक्त्वेन जानतो मुक्तिरिति सिद्धम् २९ इति श्री परमहंसपरिव्राजकशुद्धानंदपूज्यपादशिष्यभगवदानंदज्ञानकृतायां गीताभाष्यटीकायां पंचमोऽध्यायः समाप्तः ५ ॥ ॥

राम॰
१०

विषयप्रावण्यं परित्यज्य चक्षुषी अपि भ्रुवोर्मध्ये विक्षेपपरिहारार्थं कृत्वा प्राणापानौ च नासाभ्यंतरचरणशीलौ समौ न्यूनाधिकं व र्जितौ कुंभकेन निरुद्धौ कृत्वा करणानि सर्वाण्येवं संयम्य प्राणायामपरो भूत्वा किं कुर्यादित्यपेक्षायामाह यतेंद्रियेति इंद्रियादि संयम्य कृत्वा मोक्षमेवापेक्षमाणो मननशीलः स्यादित्यर्थः ज्ञानानिश्चयनिष्ठस्य सर्वदेहादिष्वभिमानसंन्यासिनो मुक्तेरनायासेन सिद्धत्वा त्तस्य किंचिदपि कर्तव्यमस्तीत्याह विगतेति द्वितीयार्द्धं व्याकरोति यतेत्यादिना द्वितीयार्द्धं चरणानि आच ष्टे विगतेत्यादि

यतेंद्रिय इति यतेंद्रियमनोबुद्धिर्यतानि संयतानि इंद्रियाणि मनोबुद्धिश्च यस्य स यतेंद्रियमनोबुद्धिर्मननात् मुनिः संसा री मोक्षपरायणः एवं देहसंस्थानो मोक्षपरायणो मोक्ष एव परमयनं परागतिर्यस्य सोयं मोक्षपरायणो मुनिर्भवेत् वि गतेच्छाभयक्रोधः इच्छा च भयं च क्रोधश्च इच्छाभयक्रोधास्ते विगता यस्मात्स विगतेच्छाभयक्रोधो य एवं वर्तते स सदा संसा

यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः २८ भोक्तारं यज्ञतपसां सर्व
लोकमहेश्वरम् ॥ ॥

रान्मुक्त एव स न तस्य मोक्षोन्यः कर्तव्योस्ति २८ एवं समाहितचित्तेन किं विज्ञेयमिति चोद्य ते भोक्तारमिति भोक्तारं यज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च सर्वलोकमहेश्वरं सर्वलोकानां महान्तमीश्वरं सर्वलोकम हेश्वरं सुहृदं सर्वभूतानां सर्वप्राणिनां प्रत्युपकारनिरपेक्षतयोपकारिणम् ॥ ॥ ॥

नाऽधिकारिणो यथोक्तस्य कर्तव्याभावे तात्पर्यमपि गताशीलासंगं परिहरति एवमित्यादिना २८ यत्सिद्धे भोक्तारं यज्ञवद्विनति सर्वलोकेति ततो यज्ञसंबंधविषयं याविन्निभ्यापेन सर्वफलशतं तेहन्ते यति सुहृदमिति उक्तेश्वरस्तानेफलं कथयति तातेति य ज्ञेषु तपःसु च द्विधा भोक्तृत्वमस्ति कर्तृरूपेणेति हिरण्यगर्भादिरूपत्वेन विशिनष्टि महान्तमिति स्वपरिकरोपकारि णामेतावन्तं याति मनुष्यः करोति ॥

जो

गी॰ भौ॰ ६
१

श्रीगणेशाय नमः ध्यानयोगप्रस्तावानंतरं तद्योग्यताहेतुकर्मणः स्तुतिं भगवानुक्तवानित्याह श्रीभगवानिति पूर्वोत्तराध्या
ययोः संगतिमभिदधानो वृत्तमनूद्याध्यायांतरमवतारयति अतीतेति सम्यग्दर्शनप्रकरणे ध्यानयोगस्य प्रसंगाभावं व्युदस्य
ति सम्यगिति संग्रहविवरणयोरतीतानंतराध्याययोरुक्तं हेतुहेतुमत्त्वमिति भावः अध्यायसंबंधमभिधायानाश्रितः कर्मफ
लमित्यादिश्लोकद्वयस्य तात्पर्यमाह तत्रेति कर्मयोगस्य संन्यासहेतोर्मर्यादां दर्शयितुं सांगं च योगं विचारयितुमध्याये प्रवृत्ते सती
तिसमर्थः संन्यासिना कर्त्तव्यं कर्म सेवं प्रतिभासमुदस्यति गृहस्थेनेति कर्त्तव्यत्वस्तुतियोग्यत्वमतः शब्दार्थः समुच्च

श्रीभगवानुवाच अतीतानंतराध्यायांते ध्यानयोगस्य सम्यग्दर्शनं प्रत्यंतरंगस्य सूत्रभूताः श्लोकाः स्पर्शान्कृ
त्वा बहिरित्यादय उपदिष्टास्तेषां वृत्तिस्थानीयोयं षष्ठोऽध्याय आरभ्यते तत्र ध्यानयोगस्य बहिरंगं कर्मेति याव
द्ध्यानयोगारोहणसमर्थस्तावद्गृहस्थेनाधिकृतेन कर्त्तव्यं कर्मेत्यतस्तत्स्तौति ननु किमर्थं ध्यानयोगारोहण
सीमाकरणं यावतानुष्ठेयमेव विहितं कर्म यावज्जीवं नारुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते इति विशेषणादारूढ
स्य च शम एवेति च संबंधकरणादारूढस्य शमः कर्म चोभयं कर्त्तव्यत्वेनाभिप्रेतं चेत्स्यात्तदारुरुक्षोरारूढस्येति शमः
कर्मविषयभेदेन विशेषणं विभागकरणं चानर्थकं स्यात्

86

यवादी सीमाकरणमाक्षिपति नन्विति यावज्जीवश्रुतिवशाद्ध्यानारोह॥
णासामर्थ्येऽसत्यपि कर्मानुष्ठानस्य दुर्वारत्वादिति हेतुमाह यावतेति भार्याविद्योगादिमति वंधा यावज्जीवश्रुतिचोदितकर्मानु
विशेष्य ष्ठानं वैराग्यप्रतिबंधादपि तदविशेषेणानुष्ठानं संभवात्प्रागवतौ विशेषणवचनाच्च न यावज्जीवं कर्मानुष्ठानप्रसक्तिरिति परिहरति
नारुरुक्षोरित्युक्तमेवार्थं व्यतिरेकद्वारेण विवृणोति आरुरुक्षोरित्यादिना आरोढुमिच्छतीत्यारुरुक्षुरसत्यारोहणेच्छाविशेषणमा
रोहणं कृतवानित्याह ढेस्य न पुनरिच्छाविषयभूतमारोहणं विशेषणमेवं शमस्य कर्मविषयोर्भेदेन विशेषणमयोगात्करणानंगी शम॰
कारे विरुद्धमापद्येतेतयोरेव विभागकरणमार्गवत सीमानंगीकारेनुपपन्नमित्यर्थः ॥ ७ ॥ ७ ॥ १

गी०भा०
२

सिद्धत्वान्नैष्कर्म्यफलवत्त्वमतो मोक्षातिरिक्तस्यैव फलस्य कर्मारंभकमिति कर्मिणो योगभ्रष्टेऽपि कर्मगतिं गच्छतीति निर्वकाशाशंकेत्यर्थः नन्वमुमुक्षूणां काम्यप्रतिषिद्धयोरकरणात् तयोश्च नित्यनैमित्तिकयोरफलत्वात्कथं तदीयस्य कर्मणो नियमेन फलारंभकत्वं तत्राह नित्यस्य चेति चकारेणानैमित्तिककर्मानुष्ठानं गृह्यते वेदप्रमाणकत्वेऽपि नित्यनैमित्तिकयोरफलत्वे दोषमाह अन्यथेति इति कर्मणोऽनुष्ठितस्य फलारंभकत्वध्रौव्यात् गृहस्थो योगभ्रष्टोऽपि कर्मगतिं गच्छतीति न तस्य नाशाशंकेति शेषः इतोऽपि गृहस्थो योगभ्रष्टशब्दवाच्यो न भवतीत्याह नचेति तस्मिन्कर्म चेत्तुभयं ततो विभ्रष्टोऽयं नश्यतीति वचनं गृहस्थे कर्मणि सति नार्थवद्भवितुमर्हति न स्यकर्मनिष्ठस्य कर्मणो विभ्रंशो हेत्वभावात् तत्फलस्यावश्यकत्वादित्यर्थः कृतस्य कर्मणो मुमुक्षुणा भगवति समर्पणात्कर्तरि फलानारंभकत्वादिति

नित्यस्य च कर्मणो वेदप्रमाणावबुद्धत्वात्फलेन भवितव्यमित्यवोचाम अन्यथा वेदस्यानर्थक्यप्रसंगादिति नच कर्मणि सत्युभयविभ्रष्टवचनमर्थवत् कर्मणो विभ्रंशकारणानुपपत्तेः कर्मकृतमीश्वरे संन्यस्यत्यतः कर्तुरि कर्मफलं नारभत इति चेन्नेश्वरे संन्यासस्याधिकतरफलहेतुत्वोपपत्तेर्मोक्षायैवेति चेत् स्वकर्मणां कृतानामीश्वरे संन्यासो मोक्षायैव न फलांतराय योगसहितः योगाच्च विभ्रष्ट इत्यसन्तं मतिनाशाशंका युक्तैवेति चेन्नैकाकी यतचित्तात्मा निराशीरपरिग्रहो ब्रह्मचारिव्रते स्थित इति कर्मसंन्यासविधानात् ॥ ॥

विभ्रंशकारणमिति शंकते कर्मेति राजाराधनबुद्ध्या धनधान्यादिसम॥ र्पणस्याधिकफलहेतुत्वोपलंभादीश्वरसमर्पणेन भ्रंशकारणमिति दूषयति नेत्यादिना अधिकफलहेतुत्वेऽपि मोक्षहेतुत्वमिष्यतामिति शंकते मोक्षायेति तदेव वचो विवृणोति स्वकर्मणामिति सहकारिसामर्थ्यात्तस्य फलानारंभसुपापत्त्वाऽसिद्धिरिति हेतुं दूषयति योगेति ध्यानसहितस्य संन्यासस्य मोक्षोपयिकत्वे कुतो योगभ्रष्टमधिकृत्य नाशाशंकेत्याशंक्याह योगाच्चेति सहकार्यभावे सामर्थ्याभावात्फलानुपपत्तेर्युक्ता नाशाशंकेत्यर्थः ध्यानसहितमीश्वरे कर्मसमर्पणं मोक्षापेक्षं प्रमाणाभावात् गृहस्थो योगभ्रष्टशब्दवाच्यो न भवतीति दूषयति नेति गृहस्थस्य योगभ्रष्टशब्दवाच्यत्वाभावे हेतुमाह एकाकीति अत्र त्वेतानि विशेषणानि गृहस्थसमवायीनि संभवंति तेन तस्य ध्यानयोगविध्यभावात्तं प्रति योगभ्रष्टवचनमनुचितमित्यर्थः ॥ ७ ॥ ॥

57

न

राम
२

रुरुक्षोरारूढस्य च भिन्नत्वात्तदुभयपरामर्शिनः तच्छब्दस्यानुपपत्तेर्न युक्तमिदं विशेषणद्वयोपपादनमित्यर्थः ॥ किं च योगमारुरुक्षोस्तदा ५

विशेषणविभागकरणयोरन्यथोपपत्तिमाशंकते नन्वेति व्यवहारक्रमेः सप्तम्यर्थः षष्ठी निर्द्धारणे भवत्वधिकारिणां द्वैविध्यं तथापि प्रकृते विशेषणद्वैकिमायात्तमित्याशंक्य ततो यायेह्यानुपपत्तिरित्याह तस्यैवेति आरुरुक्षोरारूढस्य च भेदे तस्यैवेति प्रकृते परामर्शानुपपत्तिरिति दूषयति नतस्येति यद्यनारुरुक्षुं पुरुषमपेक्ष्यारुरुक्षोरिति विशेषणं तस्य च कर्मारोहणकारणमनारूढं च पुरुषमपेक्ष्यारूढस्येति विशेषणं तस्य च शमः संन्यासो योगफलप्राप्तौ कारणमिति विशेषणविभागकरणयोरुपपत्तिस्तदारुरुक्षोस्तदारोहणे कारणं कर्मेत्युक्त्वा पुनर्योगारूढस्येति योगशब्दप्रयोगात् योगं पूर्वमारुरुक्षुरासीत्तस्यैवारोहितयोगमारूढस्य तत्फलप्राप्तौ कर्मसंन्यासः शमशब्दवाच्यो हेतुत्वेन कर्तव्य इति वचनादारुरुक्षोरारूढस्य चाभिन्नत्वप्रसिद्धानान्न तयो

यो तत्राश्रमिणां कश्चिद्योगमारुरुक्षुर्भवत्यारूढश्च कश्चिदन्ये वारुरुक्षवो ये चारूढास्तानपेक्ष्याऽऽरुरुक्षोरारूढस्य चेति ने
न विशेषणविभागकरणं चोपपद्यत एवेति चेन्न तस्यैवेति वचनात्तत्र योगग्रहणाच्च योगारूढस्येति यश्चासीत्पूर्वं योग
मारुरुक्षुस्तस्यैवारूढस्य शम एव च कर्तव्यं कारणं योगफलप्राप्तेरुक्ततो न यावज्जीवं कर्तव्यप्राप्तिः कस्यचिदपि
कर्मणो योगविभ्रष्टवचनाद्गृहस्थस्य चैकाग्निणो योगो विहितः षष्ठेऽध्याये स योगविभ्रष्टोऽपि कर्मगतिं कर्मफलं ना
प्राप्नोतीति तस्य नाशशंकाऽनुपपन्नास्यात् एवं यदि हि कृतं कर्म काम्यं नित्यं वा मोक्षस्य नित्यत्वादनारभ्यत्वेप्यस्य फल
मारभत एव प्य ॥

र्भिन्नत्वं शंकितुं प्रकाममित्याह पुनरिति यत्तु यावज्जीवश्रुतिविरोधाद्योगारोहणसीमाकरणं कर्मणो नुचितमिति तत्राह उच्यत इति पूर्वोक्तरीत्या कर्मतत्त्यागयोर्विभागोपपत्तेः श्रुतेरन्यविषयत्वात् योगारूढस्य मुमुक्षोर्जितात्मनस्य नित्यनैमित्तिककर्मस्वपि परित्यागसिद्धिरित्यर्थः इतश्च यावज्जीवं कर्म कर्तव्यं न भवतीत्याह योगेति संन्यासिनो योगभ्रष्टस्य विनाशशंकावचनान्न यावज्जीवं कर्म कर्तव्यं प्रतिभातीत्यर्थः ननु योगभ्रष्टशब्देन गृहस्थस्यैवाभिधानात्तस्यैवास्मिन्नध्याये योगविधानाद्योगारोहणयोग्यत्वेऽसत्यपि यावज्जीवं कर्म कर्तव्यमिति नेत्याह गृहस्थस्येति तेनापि समुच्चयाकृतस्य कर्मणो मोक्षातिरिक्तफलाऽनारंभकत्वाद्योगभ्रष्टस्योछिन्नाश्रमिवन्नश्यतीति शंका सावकाशेत्याशंक्याह अवस्यं हीति अपोहयेन्निर्दोषाद्धेहात्फलदापिनीक या
र्मणः सामग्रीकीर्त्तिरवगता ब्रह्मभावस्य सूतः ॥

ने

इतोपिभगवतःसंन्यासाश्रमप्रतिषेधोऽभिप्रेतोनभवतीत्याह नचप्रतिसिद्धमिति तस्यप्रसिद्धंसंन्यासित्वंयोगित्वंचेति सर्वं ध्वः
प्रसिद्धत्वमेवव्याकरोतिश्रुतीति इतोपिसंन्यासाश्रमंभगवान्नप्रतिषेधतीत्याहस्ववचनेति विरोधमेवंसाधयति सर्वकर्मा
नचप्रसिद्धंनिरग्नेरक्रियस्यपरमार्थसंन्यासिनःश्रुतिस्मृतिपुराणेतिहासयोगशास्त्रेषुविहितंसंन्यासित्वंयोगित्वंचप्रति-
षेधतिभगवान्स्ववचनविरोधात्सर्वकर्माणिमनसासंन्यस्यनैवकुर्वन्नकारयन्नास्तेमौनीसंतुष्टोयेनकेनचिदनि-
केतःस्थिरमतिर्विहायकामान्यःसर्वान्पुमांश्चरतिनिस्पृहः सर्वारंभपरित्यागीत्यत्रतत्रभगवतास्ववचनानि दर्शि-
तानि। तैर्विरुध्येतनचेतुर्थाश्रमप्रतिषेधस्तस्मात मुनेर्योगमारुरुक्षोः प्रतिपन्नगार्हस्थ्यस्याग्निहोत्रादिफलनिर-

पेक्षमनुष्ठीयमा
नंकर्म

श्रीभगवानुवाच अनाश्रितःकर्मफलंकार्यंकर्मकरोतियः

पेक्षमनुष्ठीयमानंध्यानयोगारोहणसाधनत्वंसत्त्वशुद्धिद्वारेणप्रतिपद्यतइतिससंन्यासीचयोगीचेतिस्तूयते अनाश्रितइ-
ति अनाश्रितोनआश्रितःकिंकर्मफलंकर्मणांफलंकर्मफलंयत्तदनाश्रितःकर्मफलतृष्णारहितइत्यर्थः योहिकर्मफले
तृष्णावान्सकर्मफलमाश्रितोभवति अयंतुतद्विपरीतोऽतोऽनाश्रितःकर्मफलमेवंभूतःसन्कार्यंकर्तव्यंनित्यंका-
म्यविपरीतमग्निहोत्रादिकंकरोतिनिर्वर्तयतियःकश्चित् ॥ श्रीगणेशायनमः ॥ ॥

स्तु

णीत्यादिना अनाश्रितइत्यादिवाक्यस्ययथाश्रुतार्थत्वानुपपत्तेःस्तुतिपरत्वमुपपादितमुपसंहरति तस्मादिति कर्मफल-
संन्यासित्वमःचस्तुतिरित्यर्थःस्तुतिपरंवाक्यमन्तरयोजनार्थमुदाहरति अनाश्रितइति कर्मफलेऽभिलाषोनास्तीत्येतावताक-
थंनतदनाश्रितत्ववाचोयुक्तिरित्याशंक्यव्यतिरेकमुखेनविशदयति योहीति कार्यमित्यादिव्याकरोति एवंभूतःसन्निति ॥

एकाकित्ववचनं गृहस्थस्यापि ध्यानकाले स्त्रीसहायत्वाऽभावाभिप्रायेण भविष्यतीत्याशंक्याग्निहोत्रादिवद्ध्यानस्य पत्नीसाध्यत्वाऽभावाद्ध्यानप्रतिषेधान्मैवमित्याह नचात्रेति विशेषणांतरपर्यालोचनायामपि नायमेकाकित्वादेर्गृहस्थपरो भवितुमर्हतीत्याह नचेति किंच गृहस्थस्यैवैकाकित्वादिविवक्षितायां ध्यानयोगविधौ तं प्रस्तुमप्यष्टमश्लोको नोपपद्यत इत्याह उभयेति नहि गृहस्थं प्रति उभयस्मात्ज्ञानात्कर्मणश्च विभ्रष्टत्वरूपे संप्रश्नं प्रयुंक्ते तस्य ज्ञानात्त्वंशेपि कर्मणस्तदभावादनुष्ठीयमानकर्मांशेपि भाग

नचात्रध्यानकाले स्त्रीसहायत्वाशंकायेनैकाकित्वं विधीयते न च गृहस्थस्य निराशीरपरिग्रहइत्यादिकं च न संभवत्युक्तं उभयभ्रष्टप्रश्नानुपपत्तेश्च अनाश्रितइत्यस्मिन्नेन कर्मण एव संन्यासित्वं योगित्वं चोक्तं प्रतिषिद्धं च निरग्नेरक्रियस्य च संन्यासित्वं योगित्वं चेति चेन्न ध्यानयोगं प्रति बहिरंगस्य स्तुतः कर्मणः फलाकांक्षासंन्यासस्तुतिपरत्वान्न केवलं निरग्निरक्रियएव संन्यासी योगी च किं तर्हि कर्म्यपि कर्मफलासंगं संन्यस्य कर्मयोगमनुतिष्ठन्सन् स्तुत्यर्थं संन्यासी च योगी च भवतीति स्तूयते न चैकेन वाक्येन कर्मफलासंगसंन्यासस्तुतिश्च तुर्याश्रमप्रतिषेधश्चोपपद्यते ॥ ॥

उषितकर्मवशात्फलप्रतिलंभात्ततो यथोक्तप्रश्नालोचनया न गृहस्थे अत्र ध्यानविधानोपपत्तिरित्यर्थः ननु भगवता संन्यासस्य प्रतिषिद्धत्वात् गृहस्थस्यैव योगविधानात् तस्यैव योगश्रेष्ठत्वाद्युक्तमिति शंकते अनाश्रितइत्यस्मिन्नेनेति भगवदुक्तं न प्रतिषेधपरमिति परिहरति न ध्यानेति स्तुतिपरत्वमेव स्फोरयति न केवलमिति सत्यस्तुत्यार्थमनुतिष्ठन्निति संबंधः वाक्यस्योभयपरत्वमाशंक्य वाक्यभेदप्रसंगान्मैवमित्याह न चेति ॥ ॥ ॥

गी॰भा॰६ संभवतेमुख्येसंन्यासित्वादौकिमितिगौणमुभयमभिष्टमित्याशंक्यमुख्यस्यकर्मिण्यसंभवात्गौणमेवस्तुतिसिद्ध्यर्थंतदिष्ट
४ मित्यभिप्रेत्याह नत्वनीति चित्तव्याकुलत्वहेतुकामनात्यागाच्चित्तसमाधानसिद्धेर्योगित्वंकर्मिणोपिमुख्यंसंन्यासित्वंतुतस्यविरु
द्धमितिशंकमानंप्रत्युक्तेऽर्थेश्लोकमवतारयति इत्येतमिति परमार्थसंन्यासंप्राहुरितिसंबंधः इतीत्थंसंन्यासस्यप्रामाणिकाभ्यु
परित्य पगतत्वादितीतिशब्दोयोगोयोगंफलत्वसाम्यसमाहितत्वचेतसायेतिशेषः यदुक्तंसंन्यासित्वंयोगित्वंचगृहस्थ

गौणमुभयंनपुनर्मुख्यंसंन्यासित्वंयोगित्वंचाभिप्रेतंइत्येतमर्थंदर्शयितुमाह यंसंन्यासमिति यंसर्वकर्मत
त्फलपरित्यागलक्षणंपरमार्थसंन्यासमितिप्राहुःश्रुतिस्मृतिविदोयोगंकर्मानुष्ठानलक्षणंतंपरमार्थसंन्यासं

यंसंन्यासमितिप्राहुर्योगंतंविद्धिपांडव

59

विद्धिजानीहिहेपांडवकर्मयोगस्यप्रवृत्तिलक्षणस्यतद्विपरीतेननिवृत्तिलक्षणेनपरमार्थसंन्यासेनकीदृशं
सामान्यमंगीकृत्यतद्भावउच्यतेइत्यपेक्षायांतद्विपरीतेननिवृत्तिलक्षणेनपरमार्थसंन्यासेनकीदृशंसामा
न्यमंगीकृत्यतद्भावउच्यतेइत्यपेक्षायामिदमुच्यते अस्तिपरमार्थसंन्यासेनसादृश्यंकर्तृद्वारकंकर्मयोगस्य
योहिपरमार्थसंन्यासीसत्यक्तसर्वकर्मसाधनतयासर्वकर्मतत्फलविषयंसंकल्पंप्रवृत्तिहेतुंकामकारणंसंन्य

रा सगौणमितितदुत्तरार्द्धयोजनयाप्रकटयितुमुत्तरार्द्धंसुस्थापयति कर्मयोगस्येति कर्मयोगस्यपरमार्थसंन्यासेति ॥
सेनकर्तृद्वारकंसाम्यमुक्तंव्यक्तीकरोति योहीति सत्यक्तानिसर्वाणिकर्माणिसाधनानिचयेनसतथोक्तस्तस्यभावस्त
प४ त्तातयासर्वकर्मविषयंतत्फलविषयंचसंकल्पंसंन्यस्यतीत्यर्थः संकल्पत्यागेतत्कार्यकामत्यागस्तत्त्यागेतज्जन्यप्रवृत्तित्या रा॰ ४
गश्चेतिध्यातीत्यभिसंधायविशिनष्टि प्रवृत्तीति ।७॥

कथं कर्मिणः संन्यासित्वं योगित्वं च कर्मित्वविरोधादित्याशंक्याह यदीदृशा इति स्तुतेस्त्व विवक्षितत्वान्नोऽनुपपत्तिश्चोदनीयेति मत्वा
नः सत्त्वाह इत्येवमिति न निरग्निरित्यादेरर्थमाह न केवलमिति अग्नयो गार्हपत्याहवनीयान्वाहार्यपचनसभ्यतपः न त्वनग्नि
त्वे सिद्धमक्रियत्वमग्निसाध्यत्वाद्विमार्गाणां तेषां चानिरग्निरित्येतावतैवाऽपेक्षितसिद्धेर्न चाक्रिय इत्यनर्थकमर्थपुनरु

यदीदृशः कर्मी स कर्मत्यागिभ्यो विशिष्यत इत्येवमर्थमाह स संन्यासी च योगी चेति संन्यासः परित्यागः स यस्यास्ति
स संन्यासी च योगी च योगश्चित्तसमाधानं स यस्यास्ति स योगी चेत्येवंगुणसंपन्नो मन्तव्यो न केवलं निरग्निरक्रि
य एव संन्यासी योगी चेति मन्तव्यः निर्गता अग्नयः कर्माङ्गभूता यस्मात्स निरग्निरक्रियश्च अनग्निसाधना अपि

स संन्यासी च योगी च न निरग्निर्न चाक्रियः १ ॥ श्रीगणे ॥

विद्यमानाः क्रियास्तपोदानादिका यस्यासावक्रियः ननु च निरग्नेरक्रियस्यैव श्रुतिस्मृतियोगशास्त्रेषु संन्यासित्वं योगि
त्वं च प्रसिद्धं कथमिह साग्नेः सक्रियस्य संन्यासित्वं योगित्वं चाप्रसिद्धमुच्यते नैष दोषः कयाचिद्गुणवृत्त्योभयस्य संपि
पादयिषितत्वात् कथं कर्मफलसंकल्पसंन्यासात्संन्यासित्वं योगाङ्गत्वेन च कर्मानुष्ठानात्कर्मफलसंकल्पस्य वा चित्तवि
क्षेरिति तत्राह अनग्नीति उत्तरश्लोकस्यैतानयोर्दर्शयितुं व्यावर्त्यमाशंक्याह \\ क्षेपहेतोः परित्यागाद्योगित्वं चेति १ ॥
शयति न त्वेवेति प्रसिद्धं परित्यज्याप्रसिद्धरूपादीयमानाप्रसिद्धिर्विरुद्धेति चोद्यं दूषयति नैष दोष इति उभयस्य संन्यासयोगित्वस्य सक्रि
ये च संन्यासित्वस्य योगित्वस्य चेत्यर्थः गुणवृत्त्योभयसंपादनं प्रकारपूर्वकं प्रकटयति कथमित्यादिना १ ॥ ॥

गी॰भा॰६॰ ५ परमार्थसंन्यासस्य कर्मयोगांतर्भावे कर्मयोगस्यैव सदाकर्तव्यत्वमापद्येत तेनेतरस्याधिकृतत्वसिद्धेरित्याशंक्योक्तानुवादपूर्वकमुत्तरश्लोकतात्पर्यमाह ध्यानयोगस्येति आविन्याकृत्सा मुनेर्योगमारोढुमिच्छोरिच्छामात्रस्य योगेरोहणस्य कर्महेतुश्चेदपेक्षितं योगमारूढस्यापि तत्फलप्राप्तौ तदेव कारणं भविष्यति तस्य कारणत्वेनोक्तमशक्तित्वादित्याशंक्याह योगारूढस्येति अनारूढस्येत्यस्यैवार्थं स्फुटयति ध्यानेति मुनित्वं कर्मफलसंन्यासित्वमौपचारिकमित्याह कर्मफलेति साधनं चित्तशुद्धिद्वारा ध्यानयोगमारोढुमिति शेषः तस्येति महतस्य कर्मिणो ग्रहणं स्वकारे भिन्नक्रमेण शब्देन संबध्यते कस्मात् योगव्यवच्छेदेन शमो हेतुरिति तत्राह योगारूढत्वस्येति सर्वव्यापारोपरमरूपोपशमस्य यो- ७

ध्यानयोगस्य फलनिरपेक्षः कर्मयोगो बहिरंगं साधनमिति तं संन्यासत्वेन स्तुत्वाऽधुना कर्मयोगस्य ध्यानयोगसाधनत्वं दर्शयति आरुरुक्षोरिति आरुरुक्षोरारोढुमिच्छतः अनारूढस्य ध्यानयोगेऽवस्थातुमशक्तस्यैवेत्यर्थः तस्यारुरुक्षोः मुनेः कर्मफलसंन्यासिन इत्यर्थः किमारुरुक्षोर्योगं कर्म कारणं साधनमुच्यते योगारूढस्य पुनस्त-

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते योगारूढस्य तस्यैव शमः कारणमुच्यते ३

स्यैव शमः उपशमः सर्वकर्मभ्यो निवृत्तिः कारणं योगारूढत्वस्य साधनमुच्यत इत्यर्थः यावद्यावत्कर्मभ्य उपरमते तावत्तावन्निरायासस्य जितेंद्रियस्य चित्तं समाधीयते तेनासन्नवति स योगारूढो भवति तथा चोक्तं व्यासेन नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च शीलं स्थितिर्दंडनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्य इति ३ ॥ ॥ ॥

60

गारूढत्वे कारणत्वं विवृणोति यावद्यावदिति सर्वकर्मनिवृत्त्या व्यापाराभावाद्दृढीकृतस्येंद्रियग्रामस्यापि तत्समाधाने योगारूढत्वं सिध्यतीत्यर्थः सर्वकर्मोपरमस्य उक्तार्थे साधनत्वे पौराणिकीं संमतिमाह तथा चेति एकता सर्वेषु भूतेषु वस्तुनो द्वैताभावोपलक्षितत्वमिति प्रतिपत्तिः समता तेष्वेवोपाधिकविशेषेऽपि स्वतो निर्विशेषत्वधीः सत्यता तेषामेव हितवचनं शीलं स्वभावसंपत्तिः स्थितिः स्थैर्यं दंडनिधानमहिंसनं आर्जवमवक्रत्वं क्रियाभ्यः सकाशादुपरतिश्चेत्येतदुक्तं सर्वं यथा पारश्नैतादृशं नाम ब्राह्मणस्यावि रामः ५

कर्मिणःपियथोक्तसंकल्पसंन्यासित्वमस्तीत्याह यमिति तद्धिपरित्यागेव्याकुलत्वेतत्तयाकर्मानुष्ठानस्यैवदुःशकत्वादित्यर्थः
उक्तमेवंसाम्यंप्रकटीकुर्वन्व्यतिरेकेदर्शयति नह्यसंन्यस्तेति फलसंकल्पःपरित्यागेकिमितिसमाधानवत्ताऽभावेत्यत्राह फलेति।

अयमपिकर्मयोगीकर्मकुर्वाणएवफलविषयसंकल्पसंन्यासात्संन्यासीत्येतमर्थंदर्शयन्नाह नहि यस्मादसंन्यस्तसंकल्पोऽसंन्यस्तोऽपरित्यक्तः फलविषयसंकल्पोऽभिसंधिर्येनसोऽसंन्यस्तसंकल्पःकश्चनकश्चिदपिकर्मीयोगी समाधानवान्नभवतिनसंभवतीत्यर्थः फलसंकल्पस्यचित्तविक्षेपहेतुत्वात्तस्माद्यःकश्चनकर्मीसंन्यस्त

नह्यसंन्यस्तसंकल्पोयोगीभवतिकश्चन २ ॥ ॥

फलसंकल्पोभवेत्तस्ययोगीसमाधानवान्नभवतिनविक्षिप्तचित्तोभवतिचित्तविक्षेपहेतोःफलसंकल्पस्यसंन्यस्तत्वादित्यभिप्रायः एवंपरमार्थसंन्यासकर्मयोगयोःकर्तृद्वारकंसंन्याससामान्यमपेक्ष्य यंसंन्यासमितिप्राहुर्योगंतंविद्धिपाण्डवेतिकर्मयोगस्तुत्यर्थंसंन्यासत्वमुक्तम् २

व्यतिरेकमुखेनोक्तमर्थमन्वयमुखेनोपसंहरति तस्मादिति हिशब्दार्थंसंयस्मादित्यस्यतस्मादित्यनेनसंबंधःकर्त्रं संप्रतियथोक्तविधौहेतुहेतुमद्भावमभिप्रेत्यद्वितीयविधौहेतुमाह चित्तविक्षेपेति पूर्वश्लोकेपूर्वोत्तरार्द्धाभ्यामुक्तमनुवदति एवमिति २

गी॰भा॰६
६

योगारूढस्य किं स्यादित्यपेक्षायामाह यदैवमिति योगारोहे स्वहृष्टादृष्टोपायैः स्वप्रयत्नकर्त्तव्ये अन्तार्थे मुक्तिहेतुत्वं तद्धि यदर्थं च साधः पतनहेतुत्वं
च दर्शयति अत इति तत्र हेतुमाह आत्मैव हीति उद्धरणीये ह्यात्मनः स्वत्वं पति संसारेति संसाराद्दुद्धरणं कीदृगित्याशंक्या
ह योगारूढतामिति योगश्रासाबनास्यानुनकर्षो साह नात्मानमिति योगमास्थाय पापश्चेन्नानुष्ठीयते तदा योगाभावे संसा

61

यदैवं योगारूढस्तदा तेनात्मनात्मा उद्धृतो भवति संसारादनर्थजातादतः उद्धरेदिति उद्धरेत् संसारसागरे निमग्नमात्मना
त्मानं ततः उत् ऊर्द्धं हरेत् उद्धरेत् योगारूढतामापादयेदित्यर्थः नात्मानमवसादयेन्नाऽधो नयेदात्मैव हि यस्मा

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ५

द्ध्यात्मनो बंधुर्न ह्यन्यः कश्चिद्बंधुर्यः संसारमुक्तये भवति बंधुरपि तावन्मोक्षं प्रति प्रतिकूल एव स्नेहादिबंधनायतनत्वा
त्तस्माद्युक्तमवधारणमात्मैव ह्यात्मनो बंधुरिति आत्मैव रिपुः शत्रुर्योऽन्योऽपकारी बाह्यः शत्रुः सोऽप्यात्मप्रयुक्त
एवेति युक्तमवधारणमात्मैव रिपुरात्मन इति ५॥

रपरिहारासंभवादात्माधोनीतः स्यादित्यर्थः नन्वात्मानं संसारे निम॥
ग्नं तस्य यो बंधुस्तस्मादुद्धरिष्यतीत्याशंक्याह आत्मैव हीति कुतोऽवधारणमन्यस्यापि प्रसिद्धस्य बंधोः संभवात्तत्राह न हीति अन्यो
बंधुः सन्नपि संसारमुक्त्यर्थं न भवतीत्येतदुपपादयति बंधुरपीति स्नेहादीत्यादिशब्दात्तदनुगुणप्रवृत्तिविषयत्वं गृ
ह्यते आत्मातिरिक्तस्यापि शत्रोरपकारिणः सुप्रसिद्धत्वादवधारणमनुचितमित्याशंक्याह योऽन्य इति ५

एकं॰
६

योगारूढप्राप्तौ कारणकथनानंतरं तत्प्राप्तिकालं दर्शयितुं श्लोकांतरमवतारयति अथेति समाधानावस्था यदेत्युच्यते अतएवोक्तं समा
धीयमानचित्तो योगीति शब्दादिष्वकर्मसु चानुषंगस्य योगारोहणप्रतिबंधकत्वात्तदभावस्य तदुपायत्वं प्रसिद्धमिति द्योतयितुं हीत्युक्तं
सर्वेषामपि संकल्पानां योगारोहणप्रतिबंधकत्वमभिप्रेत्य सर्वसंकल्पसंन्यासीत्यत्र विवक्षितमर्थमाह सर्वानिति सर्वसंकल्प
संन्यासेपि सर्वेषां कामानां कर्मणां च प्रतिबंधकत्वसंभवे कुतो योगप्राप्तिरित्याशंक्याह सर्वेति सर्वसंकल्पसंन्यासे परित्यागे प्रयोज
विधयत्वच्छिन्नमयत्नसिद्धमिति मन्वानः सन्नाह संकल्पेति मूलोन्मूलने च तत्कार्यस्यापि निवृत्तिरयत्नलभ्येति भावः तत्र प्रमाणमाह

अथेदानीं कदा योगारूढो भवतीत्युच्यते यदेति यदा समाधीयमानचित्तो भवति योगी हि इंद्रियार्थेषु इंद्रियाणामर्थाः शब्दा
दयस्तेष्विंद्रियार्थेषु कर्मसु च नित्यनैमित्तिककाम्यप्रतिषिद्धेषु प्रयोजनाभावबुद्ध्या नानुषज्जते अनुषंगं कर्तव्यताबुद्धिं न क
रोतीत्यर्थः सर्वान्संकल्पानिहामुत्रार्थकामहेतून्संन्यसितुं शीलमस्येति सर्वसंकल्पसंन्यासी योगारूढः प्राप्तयोग इत्येतत्तदा त
स्मिन्काले योगारूढ उच्यते सर्वसंकल्पसंन्यासीति वचनात्सर्वान्कामान्सर्वाणि च कर्माणि संन्यसेदित्यर्थः संकल्पमूला हि सर्वे

यदा हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ४ ॥ ॥

कामाः संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः काम जानामि ते मूलं संकल्पात्किल जायसे न त्वां संकल्पयिष्यामि तेन मे न भविष्यसी
र्म त्यादिस्मृतेः सर्वकामपरित्यागे च सर्वकर्मसंन्यासः सिद्धो भवति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुत इत्यादि
श्रुतिभ्यो यद्यद्धि कुरुते जंतुस्तत्तत्कामस्य चेष्टितमित्यादिस्मृतिभ्यश्च न्यायाच्च न हि सर्वसंकल्पसंन्यासे कश्चित्स्पंदितुमपि शक्तः तस्मात्सर्
वसंकल्पसंन्यासीति वचनात्सर्वान्कामान्सर्वाणि कर्माणि च त्याजयति भग वान्

संकल्पमूल इति तच्चान्वयव्यतिरेकावभिप्रेत्योक्तमुपपादय\\
ति कामेति सर्वसंकल्पाभावे कामाभाववत्कर्माभावस्य सिद्धत्वेपि कर्मणां कामकार्यत्वात्तन्निवृत्तिप्रयुक्तमपि निवृत्तिमुपन्यस्यति
सर्वकामेति यदुक्तं कर्मणां कामकार्यत्वं तत्र श्रुतिस्मृती प्रमाणयति स यथेति स पुरुषः स हृत्पद्मज्ञानरूपस्फलकामो भवति तत्सो ध
नमनुष्ठेयतया बुद्धौ धारयतीति तत्क्रतुर्भवति यत्क्रतुर्भवति यत्तदनुष्ठेयतया ह्लोति तत्तदेव कर्म बहिरपि करोतीति कामाधीनं कर्मेत्युक्तमिति श्रुत्यर्थः कामजन्मं
कर्मसन्वयव्यतिरेकसिद्धमिति द्योतयितुं हि शब्दः न्यायमेव दर्शयति न हि सर्वसंकल्पेति स्वापादाववस्थायां दर्शनादित्यर्थः नित्यनैमित्तिककर्मानुष्ठानं हरति
रत्वमिति विवक्षायामपि शब्दः श्रुतिस्मृतिन्यायसिद्धमर्थमुपसंहरति तस्मादिति ४

चित्तसमाधानमेवं विशिष्टफलं चेदिष्टं तर्हि कथंभूतः समाहितो ऽवतिष्ठतेत्याह ज्ञानेति परोक्षापरोक्षाभ्यां ज्ञानविज्ञानाभ्यां संजाता-
लंप्रत्ययो ऽस्मिन्नंतःकरणे सो ऽविक्रियो हर्षविषादकामक्रोधादिरहितो योगी युक्तः समाहित इति व्यवहारभागी भवतीति पादत्र-
यस्यार्थो ऽनेन दर्शयति तानभिसाद्दिता स च योगी परमहंसपरिव्राजकः सर्वत्रोपेक्षाबुद्धिरनतिशयवैराग्यभागीति कथयति स योगी-
ति ८ योगारूढस्य प्रशस्तत्वमभ्युपेत्य योगस्यांगांतरं दर्शयति किं चेति पदच्छेदपदार्थोक्तिरिति व्याख्यानांगं संपादयति सुह-

ज्ञानविज्ञानतृप्तात्मेति ज्ञानविज्ञानतृप्तात्मा ज्ञानं शास्त्रोक्तपदपदार्थानां विज्ञानं तु शास्त्रतो ज्ञातानां तथैव स्वानु-
भवकरणं ताभ्यां ज्ञानविज्ञानाभ्यां तृप्तः संजातालंप्रत्ययः आत्मांतःकरणं यस्य स ज्ञानविज्ञानतृप्तात्मा कूटस्थो ऽप्रकं-
प्यो भवतीत्यर्थः विजितेंद्रियश्च य ईदृशो युक्तः समाहित इति स उच्यते कथ्यते स योगी समलोष्टाश्मकांचनः लोष्टाश्मकांचनानि समा-

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ८ सुहृन्मि-
त्रार्युदासीनमध्यस्थद्वेष्यबंधुषु साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ९ ॥ ॥

सुहृदिति

नि यस्य सः समलोष्टाश्मकांचनः ८ किं च सुहृदिति प्रत्युपकारमनपेक्ष्योपकारकर्त्ता सुहृत् मित्रं स्नेहवान् अरिः शत्रुः उदा-
सीनो न कस्यचित्पक्षं भजते मध्यस्थो यो विरुद्धयो रुभयोर्हितैषी द्वेष्यः आत्मनः अप्रियः बंधुः संबंधी इत्येतेषु साधुषु शास्त्रा-
नुवर्तिष्वपि च पापेषु प्रतिषिद्धकारिषु सर्वेष्वेतेषु समबुद्धिः कः किंकर्मेत्यव्यापृतबुद्धिरित्यर्थः विशिष्यते विमुच्यत इ-
तीति अरिर्नाम परो ऽस्य अपकारकः असंतमपि यो द्वेष्टि विवेति \\ ति पाठांतरं योगारूढानां सर्वेषामयमुत्तम इत्यर्थः ९
पदच्छेदः पदार्थो [illegible] व्याख्यानांगं संपादयति सुहृदिति [illegible] परोऽस्य [illegible] असंतमपि यो द्वेष्टि विभागः समबु-
द्धिरिति व्याचष्टे कः किंमिति प्रथमो हि [illegible] जातिगोत्रादिविषयः द्वितीयो आचारविषयः उत्तमकोरगः आह तत्र बुद्धिं त्यक्त्वा सर्वो-
त्कर्षो वा सर्वपापविमोक्षो वा सिध्यतीत्याह विशिष्यत इति पाठद्वयो पि सिद्धमर्थं संगृह्य कथयति योगारूढानामिति ९ ॥ ॥

उक्तमनूद्यप्रश्नपूर्वकं श्लोकांतरमवतारयति आत्मैवेत्यादिना एकस्यैवात्मनो मिथो विरुद्धं बंधुत्वं रिपुत्वं चालक्षणभेदमंतरेणानुपपन्नमि-
ति चोदिते वशीकृतसंघातस्यात्मानं प्रति बंधुत्वमितरस्य शत्रुत्वमिति सविरोधं दर्शयति बंधुरित्यादिना वशीकृतसंघातस्य विक्षेपाभावादात्म-
निःसमाधानेन मंगलभावाद्युपपत्तेरात्मानं प्रति बंधुत्वमिति साधयति तस्येति अवशीकृतसंघातस्य पुनर्विक्षेपप्रपत्तेरात्मनि समाधानायोगादा-
त्मानं प्रति शत्रुभावमित्याह शत्रुवदिति शत्रुत्वेन वर्तते स्वस्यानिष्टमाचरतीति अनात्मन इति दृष्टांते व्याचष्टे यथेति उक्तदृष्टांतवशाद्वयोर्क

आत्मैव बंधुरात्मैव रिपुरात्मन इत्युक्तं तत्र किंलक्षण आत्मात्मनो बंधुः किंलक्षणो वा आत्मात्मनो रिपुरुच्यते बंधु-
रिति बंधुरात्मात्मनस्तस्यात्मनः स आत्मा बंधुर्येनात्मनात्मैव जितः आत्मा कार्यकरणसंघातो येन वशीकृतो जितेंद्रि-
य इत्यर्थः अनात्मनो अजितात्मनस्तु शत्रुत्वे शत्रुभावे वर्तेत आत्मैव शत्रुवद्यथानात्मा शत्रुरात्मनोऽपकारी तथात्मा

बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ६ जितात्मनः
प्रशांतस्य परमात्मा समाहितः शीतोष्णसुखदुःखेषु तथा मानापमानयोः ७ ॥ ॥ ७॥

त्मनोऽपकारे वर्तेत इत्यर्थः ६ जितात्मन इति जितात्मनो विजितकार्यकरणसंघातस्यात्मा जितो येन स जितात्मा तस्य जि-
तात्मनः प्रशांतस्य उपशांतस्य परमात्मा समाहितः साक्षादात्मभावेन वर्तत इत्यर्थः किं च शीतोष्णसुखदुःखेषु तथा मा-
मानेऽपमाने च मानापमानयोः पूजापरिभवयोः समस्यातरस्याध्याहारः ७

तसंघातस्यात्मस्य हितानाचरणादात्मानं प्रति
शत्रुरेवेति दार्ष्टान्तिकमाह तथेति ६ कथं संयतकार्यकरणस्य बंधुरात्मेतित्याह जितात्मन इति जितकार्यकरणसंघातस्य प्रक-
र्षेणोपरतत्वाद्यावन्तःकरणस्य परमात्माविक्षेपेण पुनः पुनरनभिभूयमानो निरंतरं चित्ते भावित इत्यर्थः जितात्मानं द्वंद्वस्य
समत्वकर्मोऽणमधिकारिणमुद्दिश्य योगांगानि दर्शयति शीतेति समः स्यादित्यध्याहारः पूर्वार्द्धं व्याचष्टे जितेत्यादिना न केवलं
तस्य परमात्मा साक्षादात्मभावेन वर्तते किंतु शीतोष्णादिभिरपि नासौ चाल्यते तेषु लाभालाभादिषु जनार्दनं विभजते किंचेति तेषु समः स्या-
दिति संबंधः ७

गी०भा०स०
२

कार्याकार्यव्यवस्थितौ शास्त्रोपदेशमाश्रित्य तत्प्रमाणमेतदिति विशेषनिष्ठमुत्तरं सामान्येन वक्तुं न शक्यमित्याशयेन परिहरति सामान्येति किमिति श्रद्धात्रैविध्यं प्रस्ता
नुपपन्नमुच्यते तत्राह यस्मादिति श्रद्धापदविकारोक्तियापामितियावत् श्रद्धात्रैविध्ये हेतुमाह सा स्वभावजेति स्वभावशब्दार्थं प्रश्नोपयोगितया कथय
ति जन्मान्तरेति कथं त्रिविधेत्यपेक्षायामाह सात्त्विकीत्यादिना कथमुक्ता श्रद्धा स्वभावजेति जन्माहतामिति २ प्राचीनकर्मोद्बोधितात्त्रैविध्याद्वासनास्व

म

एतदुक्तं भवति या तेषां देवतादिविषया पूजा सा किं सात्त्विकी आहोस्विद्राजसी उत तामसी सामान्यविशेषविषयोऽयं प्रश्नो नापृष्टं भक्ष्यप्रतिवच
नमर्हतीति श्रीभगवानुवाच त्रिविधेति त्रिविधा त्रिःप्रकारा भवति श्रद्धा यस्यां निष्ठायां त्वं पृच्छसि देहिनां तु सा स्वभावजा जन्मान्तरकृतो धर्मादिसं
स्कारो मरणकालेऽभिव्यक्तः स्वभाव उच्यते ततो जाता स्वभावजा सात्त्विकी सत्त्वनिर्वृत्ता देवपूजादिविषया राजसी रजोनिर्वृत्ता यक्षरक्षः २

63

श्रीभगवानुवाच त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा सात्त्विकी राजसी चैव तामसी चेति तां शृणु २ सत्त्वानुरूपा स
र्वस्य श्रद्धा भवति भारत श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ३ ॥ १७

जादिविषया तामसी तमोनिर्वृत्ता प्रेतपिशाचादिपूजाविषया एवं त्रिविधां तामुच्यमानां श्रद्धां भवति शृणु १ सैवं त्रिविधा भवति सत्त्वेति सत्त्वानु
रूपा विशिष्टसंस्कारोपेतान्तःकरणानुरूपा सर्वस्य प्राणिजातस्य श्रद्धा भवति हे भारत यद्येवं ततः किं स्यादित्यत आह श्रद्धामयः श्रद्धाप्रायः अयं पुरुषः संसारी
जीवः कथं यो यच्छ्रद्धो या श्रद्धा यस्य जीवस्य स तथाविधः स एव श्रद्धानुरूप एव स एव जीवः ३

भावशब्दितां त्रिविधायां श्रद्धायां निमित्तमित्युक्तमिदानीमुपादानं दर्शयति सैवमिति त्रिविधिष्टवित्तोपादाना श्रद्धात्रैविध्ये त्रिविधेति पूर्वोक्तं स्यात्पूर्वः कथं निष्ठ
याः सत्त्वादिप्रकारप्रश्नद्वारा श्रद्धायास्त्रैविध्यनिरूपणमुपयुक्तमिति मन्वानः शङ्कते यद्येवमिति श्रद्धेयं विषयमभिधाय पुनस्तेनैव प्रवर्जनेत्यत इति मन्वानः परि
हरति उच्यत इति श्रद्धामयत्वेप्रश्नपर्यवसितं कथयति कथमिति श्रद्धावल्लब्धिजनेष प्राचुर्येण प्रवृत्तेरिति तस्य श्रद्धामयत्वसिद्धिरित्यर्थः ३

एन०
२

श्रीगणेशाय नमः ॐ आस्तिकानां नास्तिकानां च शास्त्रैकचक्षुषां गतिरुक्ता संप्रत्यास्तिकानामेव शास्त्रानभिज्ञानां गतिं जिज्ञासया पृच्छतीत्याह तस्मादिति प्रश्नं तरंति याग्रहणं शास्त्रादेः फलं भ्रंश यदि वेदोक्तं विधिमपश्यंतस्तमुत्सृजंति केवलं हि श्रद्धानाया यागादिकुर्वंतीति न हि मानं विना श्रद्धया यागादिकं युक्तमित्याशंक्याह श्रुतीति ननु शास्त्रीयं विधिं पश्यंतोऽपि केचित्तमुपेक्ष्य स्वेच्छया यागादिकुर्वंतो दृश्यंते तेषामिह ये शास्त्रविधिमुत्सृज्येति ग्रहो भविष्यतीत्यत आह

तस्माच्छास्त्रं प्रमाणं त इति भगवद्वाक्यानंतरं अर्जुन उवाच ये शास्त्रेति ये केचित् अविशेषिताः शास्त्रविधिं शास्त्रविधानं श्रुतिस्मृतिशास्त्रचोदनामुत्सृज्य परित्यज्य यजंते देवादीन् पूजयंति श्रद्धयाऽऽस्तिक्यबुद्ध्यान्विताः संयुक्ताः संतः श्रुतिलक्षणं स्मृतिलक्षणं वा कंचित् शास्त्रविधिमपश्यंतो वृद्धव्यवहारदर्शनादेव श्रद्दधानतया ये देवादीन् पूजयंतीति ते इह शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विता इत्येवं गृह्यंते तेषामेवंभूतानां पुनः कंचित् शा

अर्जुन उवाच ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विताः तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः १

स्त्रविधिमुपलभमाना एव तमुत्सृज्य अयथाविधि देवादीन् पूजयंति ते इह ये शास्त्रविधिमुत्सृज्य यजंत इति न परिगृह्यंते कस्मात् श्रद्धयान्वितत्वविशेषणात् देवादिपूजाविधिपरं किंचिन् शास्त्रं पश्यंत एव तदुत्सृज्य अश्रद्दधानतया तद्विहितायां देवादिपूजायां श्रद्धयान्विताः प्रवर्तंत इति न शक्यं कल्पयितुं यस्मात्तस्मात्पूर्वोक्ता एव ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विता इत्यत्र गृह्यंते तेषामेवंभूतानां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः किं सत्त्वं निष्ठा अवस्थानमाहोस्वित् रजो अथवा तम इति १ ॥ ७ ०

ये तु नास्तिकास्तेषामश्रद्धापरिग्रहे प्रश्न एव कथं तत्राह शास्त्रेति शास्त्रज्ञानां तदुपेक्षणं संभवतीति विशेषणमविततं निःसारं व्याख्यातान्मैवमित्याह देवादीति अश्रद्दधानतया तदुत्सर्जने संबंधः शास्त्रोक्तं विधिमधिगच्छतामपि तमवधीर्य स्वेच्छया देवपूजादिप्रवृत्तानां आसुरेष्वेवांतर्भावो यस्मादनंतराध्याये प्रतिपादितस्तस्माद्यास्तिकाधिकारे तेषां प्रसंगो नास्तीत्युपसंहरति यस्मादिति पूर्वोक्ताः शास्त्रानभिज्ञा वृद्धव्यवहारानुसारिण इति यावत् तैः श्रद्धया क्रियमाणे कर्मणि कुत्र पर्यवस्यतीति पृच्छति तेषामिति का निष्ठा स्थितिस्त्रिगुणेति सत्त्वमिति १ ॥

वित्तैके

सात्त्वि

गीभास

२
पु

उक्ता। श्लोकपूर्वार्द्धतात्पर्यमाह आहाराणामिति रसादिवर्गस्य सात्त्विकपुरुषप्रियत्वं कट्वादिवर्गस्य राजसप्रियत्वं यातयामादिवर्गस्य तामसप्रियत्वमिति दर्शनेन कुत्रोपयुज्यते तत्राह रसेति श्लोकोत्तरार्द्धतात्पर्यमाह नयेति आहारत्रैविध्यवदिति पावत्त कथमेतेषां प्रत्येकं त्रैविध्यं तत्राह तेषामिति ॥ सात्त्विकप्रीतिविषयमाहारविशेषमुदाहरति आयुरिति आजीवनं सत्त्वं चित्तस्थैर्यं वा वीर्यं बलं कार्यकरणसामर्थ्यमारोग्यं निरोगता सुखं मनआह्लादः प्रीतिः परेषामपि संपन्ना

आहाराणां च रसस्निग्धादिवर्गत्रयरूपेण भिन्नानां यथाक्रमं सात्त्विकराजसतामसपुरुषप्रियत्वदर्शनमिह क्रियते यत् स्निग्धादिष्वाहारविशेषेषु आत्मनः प्रीत्यतिरेकेण लिङ्गेन सात्त्विकत्वं राजसत्वं तामसत्वं च बुद्ध्वा राजसतामसलिङ्गानाम् आहाराणां परिवर्जनाय सत्त्वलिङ्गानां चोपादानाय यज्ञाय त्तादीनामपि सत्त्वादिगुणभेदेन त्रिविधत्वप्रतिपादनमिह राजसतामसान् बुद्ध्वा कथं नु नाम परित्यज्य सात्त्विकानेवानुतिष्ठेदित्यर्थः एवमर्थमाह प

आहारस्त्विति आहारस्त्वपि सर्वस्य भोक्तुस्त्रिविधो भवति प्रियः यज्ञस्तपस्तथा दानं तेषां आहारादीनां भेदमिमं वक्ष्यमाणं शृणु ॥ आयुरिति

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ७ आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः ८

64

स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ८ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः आहारा राजसस्येष्टा दुःखशोकामयप्रदाः

आयुश्च सत्त्वं च बलं चारोग्यं च सुखं च प्रीतिश्च तासां विवर्धनाः आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः रस्याः स्निग्धास्ते च रस्या रसोपेताः स्निग्धाः स्नेहवन्तः स्थिराश्चिरकालस्थायिनो देहे हृद्या हृदयप्रिया आहाराः सात्त्विकप्रियाः सात्त्विकस्येष्टाः ८ कट्विति कटुरम्लो लवणोऽत्युष्णोऽतिशब्दः कट्वादिषु सर्वत्र योज्यो अतिकटु विदाहि अतितीक्ष्णास्त्येवं कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिन एवंविधा आहारा राजसस्येष्टा दुःखशोकामयप्रदाः दुःखं च शोकं चामयं च प्रयच्छन्तीति दुःखशोकामयप्रदाः ॥ ९ ॥ ॥

दुः

पा २ नां दर्शनात्परं मोहः येषां तासां विवर्धनाः विवर्धयन्तीति रसोपेता सपित्वाः स्निग्धाः स्थिरा देहे चिरकालस्थायित्वं चिरशरीरोपकारहेतुत्वं ८ राजसप्रीतिविषयमाहारविशेषं दर्शयति कट्विति कटुः कटुरसः तीक्ष्णशब्देनोक्तत्वात् रूक्षो निःस्नेहः विदाही संतापकः अतिशब्दस्य सर्वत्र योजनामेवाभिनयति अतिकटु रिति दुःखं तात्कालिकी पीडा दौर्मनस्यं वियोगजं दुःखं शोकः आमयो रोगः ९

ध्व०
२

तथापि कथं सत्त्वादिनिष्ठापयोक्तस्य पुरुषस्य तत्तज्ज्ञातुं शक्येत्याशंक्याह तमाश्रेति अविज्ञातस्य पुरुषस्य श्रद्धाप्रधानत्वादिति यावत् देवाद्युपास्याद्योपपत्त्यां कुवेरादयो रक्षांसि नैरृताद्यः स्वधर्मात्प्रच्युता विप्रादयो देहपाताद्वायुदेहमापन्नाः प्रेताः एभ्यश्चापयायपमारा अदेवादयः सात्त्विकराजसतामसानुप्रकारान्पृच्छतीति सान श्रद्धावगन्तव्यं ॥३॥ ननु सत्त्वादिनिष्ठा शास्त्रज्ञानानुशक्तेन कथं तत्कार्यलिङ्गकानुमानेन निर्णेया इत्याशंक्य इति सत्त्वादिनिष्ठानां जनानामवान्तरविशेषं प्रचुरत्वाय तांतश्च कार्येण लिङ्गेन देवादिपूजया सत्त्वादिनिष्ठाननुमेयेत्याह यजन्त इति पूजयन्ते पूजयंति सात्त्विकाः सत्त्वनिष्ठा देवान् यक्षरक्षांसि राजसाः प्रेतान्भूतगणांश्चान्ये सप्तमातृकादींश्चान्ये यजन्ते तामसा जनाः ॥४॥ एवं कार्येण लिङ्गेन सत्त्वादिनिष्ठाः शास्त्रविधिमुत्सृज्य कश्चिद्देवतादेवद्विजादिपरं सत्त्वनिष्ठोऽभवति बाहुल्येन तु रजोनिष्ठाः तमोनिष्ठाश्चैव प्राणिनो भवन्तीत्याह अशास्त्रेति अशास्त्रविहितं न शास्त्रविहितं घोरं परपीडाकरं प्राणिनामात्मनश्च तपस्तप्यन्ते निर्वर्तयन्ति ये जनास्ते च दम्भाहंकारसंयुक्ताः दम्भश्चाहंकारश्च दम्भाहंकारौ ताभ्यां संयुक्ता दम्भाहंकारसंयुक्ताः कामरागबलान्विताः कामश्च

यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः ४ अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः
दम्भाहंकारसंयुक्ताः कामरागबलान्विताः ५ कर्षयन्तः शरीरस्थं भूतग्राममचेतसः मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ६

रागश्च कामरागौ ताभ्यां कृतं बलं कामरागबलं तेनान्विताः कामरागबलान्विताः ५ कर्षयन्त इति कर्षयन्तः कृशीकुर्वन्तः शरीरस्थं भूतग्राममेकादशसमुदायमचेतसोऽविवेकिनो मां चैवान्तस्थमेव बुद्धिसाक्षिभूतमंतःशरीरस्थं कर्षयन्तो मदनुशासनाकरणमेव मत्कर्षणं तान्विद्ध्यासुरनिश्चयान् आसुरो निश्चयो येषां ते आसुरनिश्चयास्तान्परिहरणार्थं विद्धीत्युपदेशः ६ ॥

चतुरस्रूपे दर्शयति तदेवमाहारेण राजसानां तामसानां च प्राणिनां घातुर्यं प्रयुक्तानि विरणोति कामसिताद्दिना काम्यकास्तमानविषयोरागश्चनहि षयभोगाभिलाषस्तत्कृतं तन्न निमित्तं इति यावत् यतो निष्ठान्तरापाध्ये नुपदर्शितमोहिच्छान्ताधान्येनदर्शयति कर्षयन्त इति कथं शरीरादिसाक्षिणं मे श्चेत्प्रतिकृशीकृतं प्राणिनोऽप्रकल्पनेन आह मदनुशासनेति ये तेषां वीपरीतस्य अपवर्तापरिहारार्थं कृत्वोपदर्शनेन तत्र परिहरणार्थमिति ६

नामसंयज्ञंहानार्थमेवोदाहरति विधीति १३ सात्विकादिभावंनिरूपयितुंसर्वेस्यतपसः स्वरूपंत्रिविधंनिरूपयति अथेति तत्र शारीरंतपोनिर्दिशति देवेति देवाब्र ह्मविष्णुशिवादयः द्विजाः पूज्यापूज्यत्वात्द्विजोत्तमाः गुरवः पित्रादयः प्राज्ञाःपंडिता विदितवेदितव्यास्तेषांपूजनंप्रणामशुश्रूषादि शौचंमृज्जलाभ्यां

विधिहीनमिति विधिहीनेयथाचोदितविधिविपरीतं असृष्टान्नंब्राह्मणेभ्योनसृष्टमन्नंयस्मिन्यज्ञेसोऽसृष्टान्नस्तमसृष्टान्नंमंत्रहीनंमं त्रतः स्वरतोवर्णतश्चविप्रयुक्तंमंत्रहीनं अदक्षिणमुक्तदक्षिणारहितंश्रद्धारहितंयज्ञंतामसंपरिचक्षते तमोनिर्वृत्तंकथयंति १३ अ

विधिहीनमसृष्टान्नंमंत्रहीनमदक्षिणं श्रद्धाविरहितंयज्ञंतामसंपरिचक्षते १३
देवद्विजगुरुप्राज्ञपूजनंशौचमार्जवं ब्रह्मचर्यमहिंसाचशारीरंतपउच्यते १४

थेदानींतपस्त्रिविधंउच्यते देवेति देवाश्चद्विजाश्चगुरवश्चप्राज्ञाश्चदेवद्विजगुरुप्राज्ञास्तेषांपूजनंशौचमार्जवंऋजुत्वंब्रह्मचर्यमहिं साचशरीरनिर्वर्त्यंशारीरंशरीरप्रधानैः सर्वैरेवकार्यकरणैःकर्त्रादिभिःसाध्यंशारीरंतपउच्यते १४ पंचैतेतस्यहेतवइतिहिवक्ष्यति

शरीरशोधनंआर्जवमृजुत्वंविहितप्रतिषिद्धयोरेकरूपप्रवृत्तिनिवृत्तिमत्वं ब्रह्मचर्यंमैथुनासमाचरणं अहिंसाप्राणिनामपीडनंशरीरमात्रनिर्वर्त्य मस्यतपसोनसंभवतीतिमत्वाविशिनष्टिशारीरेति १४ कथंकर्त्रादिसाध्यत्वेतपसःशारीरत्वेशारीरत्वेनाकर्त्रादिसाध्यत्वमित्याशंक्याह पंचेति

तामसप्रियमाहारमुदाहरति यातयाममिति ननु निर्वीर्ययातयाममुच्यते न पुनः सामिपक्वमिति तत्राह निर्वीर्यस्येति १० हानादानार्थं स्वाहारत्रैविध्यमेव
विभज्य प्रक्रमप्राप्तं यज्ञत्रैविध्यं कथयति अथेति तत्र सात्त्विकं यज्ञं तावदाह अफलेति फलाभिसंधिं विना यज्ञरूपमेव भाव्यमिति उपासनाह्नतोऽनुष्ठीयमा

यातयाममिति यातयामं मन्दपक्वं निर्वीर्यस्य गतरसेनोक्तत्वात् गतरसं रसविमुक्तं पूति दुर्गन्धि पर्युषितं च पक्वं सद्रात्र्यन्तरितं च यत् उच्छिष्ट
मपि भुक्तशिष्टममेध्यमयज्ञार्हं भोजनमीदृशं तामसप्रियं १० अथेदानीं यज्ञस्य त्रैविध्यमुच्यते अफलेति अफलाकांक्षिभिरफलाभिसंधिभिर्यज्ञो

यातयामं गतरसं पूति पर्युषितं च यत् उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् १० अफलाकांक्षिभिर्यज्ञो
विधिदृष्टो य इज्यते यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ११ अभिसंधाय तु फलं दम्भार्थमपि चैव यत्
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् १२

विधिदृष्टः शास्त्रचोदनादृष्टो यो यज्ञ इज्यते निवर्तितस्तेन यष्टव्यमेवेति यज्ञस्वरूपनिर्वर्तनमेव कार्यमिति मनः समाधाय नानेन पुरुषार्थो मम कर्तव्य
इत्येवं निश्चित्य स सात्त्विको यज्ञ उच्यते ११ अभिसंधायेति अभिसंधायोद्दिश्य फलं दम्भार्थमपि च यद्यज्ञ इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं चैव

नोपयज्ञः सात्त्विक इत्यर्थः ११ राजसं यज्ञं तावन्निर्दिशति अभिसंधायेति स्वर्गाद्युद्दिश्य धार्मिकख्यापनार्थं च यद्यजनं क्रियते तं यज्ञं रजसा निर्वृत्तं राजस
मवगच्छेत्यर्थः १२

म

गी॰भा॰ ४ मानसं तपः संक्षिपति मनःप्रसाद इति प्रशांतिमेव्यमनस्कं स्वच्छत्वेति मनसः स्वास्थ्यं मुख्याकुलतां नैश्चिंत्यमित्यर्थः सौमनस्यं सर्वेभ्यो हितैषित्वं मुदितासिंतनं च त
त्कथं गम्यते तत्र आह मुखादीति तस्य स्वरूपमाह, अतःकरणस्येति ननु मौनं वाङ्संयमं न वाग्व्यपेतपस्तर्भवति तत्कथं मानसे तपसि व्यपदिश्यते तत्र वाचः सं
संयमस्य कार्यत्वात् मनःसंयमस्य कारणत्वात् कार्येण कारणग्रहणात् मानसे तपसि मौनमुक्तमित्याह वाग्विजि पद्मौनं मुनिभावो मननं आत्मनो मन
सो विनिग्रहो निरोधः नन्वेवं मौनस्य मनोनिग्रहस्य च मनःसंयमत्वेनैकत्वात्पौनरुक्त्यं नेत्याह सर्वत इति भावस्य हृदयस्य संशुद्धिः रागादिमलविकलतेति व्या

मनः इति मनः प्रसादो मनसः प्रशांतिः स्वच्छतापादनं मनसः संप्रसादः सौम्यत्वं यत्सौमनस्यं प्राहुर्मुखादिप्रसादकार्यानुमेयांतःकरणस्य वृत्तिः मौनं वाक्सं स्व
यमोपि मनःसंयमपूर्वको भवतीति कार्येण कारणमुच्यते मनःसंयमो मौनमिति आत्मविनिग्रहो मनोनिरोधः सर्वतः सामान्यरूप आत्मवि
निग्रहो वाग्विषयस्यैव मनसः संयमो मौनमिति विशेषः भावसंशुद्धिः परैः व्यवहारकाले मायाविवर्जितत्वं भावसंशुद्धिरित्येतत्तपो मानसमुच्यते १६
यथोक्तं कायिकं वाचिकं मानसं च तपस्तप्तं नरैः सत्वादिभेदेन कथं त्रिविधं भवतीत्युच्यते श्रद्धयेति श्रद्धया ॥ आस्तिकबुद्ध्या परया प्रकृष्टया तत्पू

66

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः भावसंशुद्धिरित्येतत्तपो मानसमुच्यते १६ श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः अफ
लाकांक्षिभिर्युक्तैः सात्विकं परिचक्षते १७ सत्कारमानपूजार्थं तपो दंभेन चैव यत् क्रियते तदिह प्रोक्तं राजसं चलमध्रुवं १८

मनुष्ठितं तपस्तत् त्रिविधं त्रिःप्रकारं अधिष्ठानं नरैरनुष्ठातृभिरफलाकांक्षिभिः फलकांक्षारहितैर्युक्तैः समाहितैर्यदीदृशं तपस्तत्सात्विकं सत्वनि
र्वृत्तं परिचक्षते कथयंति शिष्टाः १७ सत्कारेति सत्कारः साधुरयं तपस्वी ब्राह्मण इत्येवमर्थं मानो माननं प्रत्युत्थानाभिवादनादिस्तदर्थं पूजा
पादप्रक्षालनार्चना ॥ अपि तत्वादित्तदर्थं च तपः सत्कारमानपूजार्थं दंभेनैव च यत् क्रियते तपस्तदिह प्रोक्तं कथितं राजसं चलं कादाचित्कफलत्वेन

प चष्टे पौरीति मानसं मनः संप्रधानेन निर्वेशमित्यर्थः १६ त्रिविधस्य तपसो यथासंभवं सात्विकादिभावेन त्रैविध्यमाकांक्षा साहाय्यानि क्षिपति पयोक्तमि
ति अधिष्ठाने देहे वाग्मनो निवेशे मित्यर्थः सामाहितैः सिद्ध्यसिद्ध्योर्निर्विकारैरित्यावत् १७ राजसं तपो निर्दिशति सत्कारेति सत्कारेति साधुकारमेव
स्कारः पुति साधुरिति दंभेन चैव नास्तिकेन न केवलं धर्मध्वजित्वेन यत्ये तदिह प्रोक्तमस्मिन्नेव लोके फलप्रदमित्यर्थः कादाचित्कफलत्वं क्षणिकफल स्व॰
त्वमध्रुवमनियतमनैकांतिकफलमित्यावत् १८ ४

संप्रति वाङ्मयं तपोऽपदिशति अनुद्वेगकरमिति सत्यं यथादृष्टार्थवचनं प्रियं श्रुतिसुखं हितं परिणामपथ्यं प्रियहितयोर्विधान्तरेण विभागमाह प्रियेति कथमत्र विशेषणविशेष्यत्वं तदाह अनुद्वेगेति विशेषणानां धर्माणामनुद्वेगकरत्वादीनां विशेषणवाक्येन समुच्चितानां वाक्यस्यापि समुच्चये पर्यवसानमित्याह विशेषणेति किमिति वाक्यमेव विशेष्यते किमिति वा तेषां विधेयः समुच्चयस्तत्राह परेति पदं प्रति विधायकवाक्यमात्रस्य विशेषणत्वस्य वाऽऽप्रयत्नप्रस्तावानुपपत्तिस्तथापि स

अनुद्वेग

अनुद्वेगेति अनुद्वेगकरं प्राणिनां अदुःखकरं वाक्यं सत्यं प्रियहितं च यत् प्रियहिते दृष्टादृष्टार्थे अनुद्वेगकरत्वादिभिर्धर्मैर्वाक्यं विशेष्यते विशेषणधर्मसमुच्चयार्थश्च शब्दः परप्रत्यायनार्थं प्रयुक्तस्य वाक्यस्य सत्यप्रियहितानुद्वेगकरत्वादीनामन्यतमेन द्वाभ्यां त्रिभिर्वा हीनता स्यात् यदि न तद्वाङ्मयं तपः तथा सत्यवाक्यस्येतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा हीनतायां न वाङ्मयं तपस्त्वं तथा प्रियवाक्यस्याप्यन्यतमेन द्वाभ्यां त्रिभिर्वा हीनस्य न वाङ्मयतपस्त्वं

अनुद्वेगकरं वाक्यं सत्यं प्रियं हितं च यत् स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते १५ ॥ श्रीरामचन्द्राय नमः

गी१

तथा हितवाक्यस्यापीतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा वियुक्तस्य न वाङ्मयतपस्त्वं किं पुनस्तत्तपो यत्सत्यं वाक्यमनुद्वेगकरं प्रियं हितं च यत्तत्परमं तपो वाङ्मयं यथा शान्तो भव वत्स स्वाध्यायं योगं चानुतिष्ठ तथा ते श्रेयो भविष्यति स्वाध्यायाभ्यसनं चैव यथाविधि वाङ्मयं तप उच्यते १५

सत्यवाक्ये विशेषणान्तराभावेऽपि वाङ्मयतपस्त्वमित्याशङ्क्याह तथेति तथापि प्रियवाक्यमात्रस्य तथात्वं स्यादित्याशङ्क्याह तथेति तथापि परिणामपथ्यं वाक्यमात्रं तथा भविष्यतीत्याह तथा हितेति कीदृक् तर्हि तपो वाङ्मयमिति प्रश्नपूर्वकं विशदयति किं पुनरिति विशिष्टे वाङ्मये तपसि दृष्टान्तमाह यथेति प्रासङ्गिकत्वे पवित्रपाणित्वमित्यादिविधानमनतिक्रम्य स्वाध्यायस्यावर्तनं यथाविधि वाङ्मये तपस्यन्तर्भवतीत्याह स्वाध्यायेति वाक्प्रायुपेता प्रस्तुता
स्मिन्निति वाङ्मयं वाक्प्रधानमित्यर्थः १५ ॥

गी॰भा॰स॰ कथं निर्देशेनैषां विधानमित्याशंक्याह निर्दिश्यते इति यज्ञादीनां वैगुण्ये प्रतीतिकाले यथोक्तनाम्नामन्यतमोच्चारणे वैगुण्यं तिष्ठतीति भावः कर्मसाद्गुण्यकार
५ णं त्रिविधं नामस्तौति ब्राह्मणा इति २३ पूर्वं सर्गादौ निर्माणं च प्रजापतिकर्तृकं यस्मात् ब्राह्मणादीनां कारणं यस्माच्च ब्रह्मणो निर्देशस्तस्मादित्युपसंहरति

निर्दिश्यतेऽनेनेति निर्देशः त्रिविधो नामनिर्देशो ब्रह्मणः स्मृतश्चिंतितो वेदांतेषु ब्रह्मविद्भिर्ब्राह्मणास्तेन निर्देशेन वेदाश्च यज्ञाश्च विहितानि निर्मि
ताः पुरा पूर्वमिति २३ निर्देशस्तुत्यर्थमुच्यते तस्मादिति तस्मादोमित्युदाहृत्योच्चार्य यज्ञदानतपःक्रियाः यज्ञादिस्वरूपाः क्रियाः प्रवर्तन्ते विधानो
क्ताः शास्त्रचोदिताः सततं सर्वदा ब्रह्मवादिनां ब्रह्मवदनशीलानां २४ तदिति तदित्यनभिसंधाय तदिति ब्रह्माभिधानमुच्चार्य चानभिसंधाय फलं कर्मणः
फलं यज्ञतपःक्रियाः यज्ञक्रियाः तपःक्रियाश्च यज्ञतपःक्रियाः दानक्रियाश्च विविधाः क्षेत्रहिरण्यप्रदानादिलक्षणाः क्रियन्ते निर्वर्त्यन्ते मोक्षकांक्षिभि

ब्रह्मणस्त्रिविधः स्मृतः ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा २३ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः प्रवर्तन्ते विधानो
67 क्ताः सततं ब्रह्मवादिनां २४ तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः दानक्रियाश्च विविधाः क्रियन्ते मोक्षकांक्षिभिः २५ सद्भा
वे साधुभावे च सदित्येतत्प्रयुज्यते प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते २६

द्यावृत्त्या तज्ज्ञानं प्राप्य तस्मिन्नेवासक्तया विषयैर्मुख्येन तत्फलभूतोपरतिष्ठितचैव प्रतिभासमानः स्थितप्रज्ञव्यपदेशभागीत्यर्थः रम
५५

प्रतिवचनमवतारयितुं पातनिकां करोति योहीति हिशब्देन कर्मसंन्यासकारणीभूतविरागतासंपत्तिः सूच्यते।
आदितो ब्रह्मचर्यावस्थायामिति यावत् तत्तानेमेव योगो ब्रह्मभावप्रापकत्वात् तस्मिन्निष्ठा परिसमाप्तिस्तस्यामित्यर्थः क-
र्मैव योगस्तेन कर्मणा एवं संन्यस्तं निष्ठायामेव प्रवृत्त इति शेषः ननु कथमेकेन वा केनार्थद्वयमुपदिश्यते द्वेधार्थे वा काम-
दात्रैवलक्षणमेव साधनं कृतार्थलक्षणस्य तत्स्वरूपत्वेन फलत्वेन साधनत्वानुपपत्तिरितित्त्राह सर्वत्रैवेति यद्यपि कृता-
र्थस्य ज्ञानिनो लक्षणं तद्रूपेण फलत्वात्तत्साधनत्वमपि गच्छति तथापि जिज्ञासोस्तदेव प्रयत्नसाध्यत्वात् साधनत्वं संपद्यते ल-

क्षणवाक्यादितत एव संन्यस्य कर्माणि तानि योगनिष्ठायां प्रवृत्तो यश्च कर्मयोगेन तयोः स्थितप्रज्ञस्य प्रजहातीत्यारभ्याऽ-
ध्यायपरिसमाप्तेः स्थितप्रज्ञलक्षणं साधनं चोपदिश्यते सर्वत्रैव ह्यध्यात्मशास्त्रे कृतार्थलक्षणानि या-

श्रीभगवानुवाच प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्

नि तान्येव साधनान्युपदिश्यन्ते यत्नसाध्यत्वात् यानि यत्नसाध्यानि साधनानि तिलक्षणानि च भवन्ति तानि श्रीभगवानु-
वाच प्रजहातीति प्रकर्षेण जहाति परित्यजति यदा कामान् इच्छाभेदान् हे पार्थ मनोगतान् मनसि प्रविष्टान् हृदि
प्रविष्टान्॥

यस्मिन्काले

क्षणं चात्र तावत्सामर्थ्यलब्धमनूद्यते न विधीयते विदुषो विधिनिषेधागोचरत्वात् तेन जिज्ञासोः साधना-
नुष्ठानाय लक्षणानुवादादेकस्मिन्नेव साधनानुष्ठाने तात्पर्यमित्यर्थः उक्तं चैवं भगवद्भाष्ये मुख्याय यत्ति यानीति लक्षणा-
नि यत्नसामर्थ्यलभ्यानि यत्नसाध्यानीति शेषः स्थितप्रज्ञस्य कामाभावे प्रथमप्रश्नस्योत्तरमाह प्रजहातीति काम-
त्यागस्य प्रकर्षो वासनासहितं कामानामात्मनिष्ठत्वं केचिदिष्यते तदयुक्तं तेषां मनोनिष्ठत्वश्रुतेरित्याशयवा-
नाह मनोगतानिति॥

ज्ञा
लक्षणभेदान्न वा हारो विविदिषोरेव कर्तव्यांतरमुपदिशति किंचेति विवेकवतो विदुषो विवेकजन्या प्रज्ञा कथं प्रतिष्ठां प्रतिपद्यत इत्या-
मिसाशंक्याह यः सर्वत्रेति न च देहजीवनादावस्नेहाच्छुभाशुभप्राप्तौ हर्षविषादौ विदुषो विविदिषोश्चावर्जनीयाविति प्रज्ञास्थैर्यं कथं सि-
द्धिस्तत्राह यो मुनिरिति तत्तदिति शोभनत्वेनाऽशोभनत्वेन वा प्रसिद्धत्वं प्रतिनिर्दिश्यते तदेव विभजते शुभमिति विषये-
ष्वभिष्वंगाभावः शुभादिप्राप्तौ हर्षाद्यभावश्च प्रज्ञास्थैर्यकारणमित्याह तस्येति ५७ जिज्ञासोरेव कर्तव्यांतरं सूचयति किंचेति

ऽभि

किंच यः सर्वत्रेति यो मुनिः सर्वत्र देहजीवनादिष्वप्यनभिस्नेहोऽस्नेहवर्जितः तत्तत्प्राप्य शुभाशुभं तत्तच्छुभमशुभं वा शु
लब्ध्वा नाभिनंदति न द्वेष्टि शुभं प्राप्य न तुष्यति न हृष्यत्यशुभं प्राप्य न द्वेष्टीत्यर्थः तस्यैवं हर्षविषादवर्जितस्य विवेक च

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ५७ यदा संहरते चायं
कूर्मोऽंगानीव सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ५८

जा प्रज्ञा प्रतिष्ठिता ५७ किंच यदा संहरत इति यदा संहरते सम्यक् उपसंहरते चायं ज्ञाननिष्ठायां प्रवृत्तो यतिः कूर्मोऽंगानी-
व यथा कूर्मो भयात्स्वान्यंगान्युपसंहरति सर्वशः सर्वतः एवं ज्ञाननिष्ठः इंद्रियाणींद्रियार्थेभ्यः सर्वविषयेभ्य उपसंहरते तस्य

इंद्रियाणां विषयेभ्यो वैमुख्यस्य प्रज्ञास्थैर्यकारणत्वादादौ जिज्ञासुना तदनुष्ठेयमि\\ प्रज्ञा प्रतिष्ठितेत्युक्तार्थं वाक्यं ५८ ॥ ॥
त्याह यदेति मुमुक्षुणा मोक्षहेतुभूतां प्रार्थयमानेन सर्वेभ्यो विषयेभ्यः सर्वाणींद्रियाणि विमुखानि कर्तव्यानीति श्लोकव्याख्यानेन
कथयति यदेत्यादिना उपसंहारः स्ववशत्वापादानं तच्च सम्यक्त्वमिति द्रष्टव्यं अयमिति प्रकृतस्थितप्रज्ञग्रहणं व्यावर्तयति ज्ञाननिष्ठा-
यामिति इंद्रियोपसंहारस्य प्रसंगरूपत्वं प्राक्स्वसंकोचात्मत्वं दृष्टांतेन दर्शयति कूर्म इति दृष्टांतं व्याकरोति यथेति दार्ष्टांतिकं ज्ञाननि-
ष्ठ इत्यन्तं प्रवर्तयति एवमिति इंद्रियाणां विषयेभ्यो वैमुख्यकरणं प्रज्ञास्थैर्यहेतुरित्युक्तमुपसंहरति तस्येति ५८ ॥ ॥

लक्षणभेदानुवादद्वारा विविदिषोरेव कर्त्तव्यांतरमुपदिशति किंचेति ज्वरशिरोरोगादिकृतानि दुःखान्याध्यात्मिकानि आधि
न्मा शब्देनाधिभौतिकानि माघसर्पादिप्रयुक्तान्याधिदैविकानि चातिवातवर्षादिनिमित्तानि दुःखान्युच्यंते तेषूपनतेष्वपि नो
द्विग्नं मनो यस्य स तथेति संबंधः नोद्विग्नमित्येतद्व्याचष्टे नप्रक्षुभितमिति दुःखानामुक्तानां प्राप्तौ परिहाराक्षमस्य तदनुभव
परिभावितं दुःखमुद्वेगस्तेन सहितं मनो यस्य न भवति स तथेत्याह दुःखप्राप्ताविति मनो यस्य नोद्विग्नमिति पूर्वेणास्य
संबंधः सुखान्यपि दुःखवत्त्रिविधानीति मत्वा तान्यथेसक्तेषु प्राप्तेषु सत्सु तेभ्यो विगतास्पृहा तस्मा यस्य स विगतस्पृह इति योज्य

किंच दुःखेष्विति दुःखेष्वाध्यात्मिकादिषु प्राप्तेषु नोद्विग्नं न प्रक्षुभितं दुःखप्राप्तौ मनो यस्य सोऽनुद्विग्नमनाः तथा सुखे
षु प्राप्तेषु विगतास्पृहा तृष्णा यस्य मनाग्निरिवेंधनाद्याधाने सुखान्यनुवर्द्धते स विगतस्पृहः वीतरागभयक्रोधः ए

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ५६ ॥

रागश्च भयं च क्रोधश्च विगता यस्मात् वीतरागभयक्रोधः स्थितधीः स्थितप्रज्ञो मुनिः संन्यासी तदोच्यते ५६ ॥ ॥

नाम्न तस्य हि प्राप्तानि सुखान्यनुवर्द्धते न स्पृहा विद्वत्तु नैवमिमतद्वैधर्म्यदृष्टांतमाह नाग्निरिवेति यथा हि हात्यसेंधनादेरभ्याधा
नेन वह्निरनुविवर्द्धते तथा ऽहत्यसुखान्युपनतान्यनुविवर्द्धमानापि तत्स्पृहा विदुषो न तामनुविवर्द्धते नहि वह्निरुद्दात्यमुपनतम
पि दृष्ट्वा विह्वलिं गच्छति तेन जितात्मना सुखदुःखयोस्तु स्पोहे योन कर्त्तव्यमाविसर्थः रागादयस्तु तेन कर्त्तव्या न भवंतीत्याह वीतेति
अनुभूताभिनिवेशो विषयेषु रंजनात्मकलस्पार्थे रागः पोत्राप्यक्षतस्य गात्रकंपाद्यादिविकारकारणं भयं क्रोधस्तु परवश
कस्यात्मानं स्वपरापकारसमर्थत्वाज्जिहेतुर्बुद्धिवृत्तिविशेषो भगवतो मुनिरन्यविदि संगोक्षसाहतस्मातीति सुखादिविषयत्वसारे
रागादेश्चाभावावस्थातदेसुच्यते २५६ ॥ ॥

गी भा २०
३६

श्लोकांतरमवतारयति सम्यग्दर्शनेति मनसः स्ववशत्वादेव प्रज्ञास्थैर्यसंभवे किमर्थमिंद्रियाणां स्ववशत्वापादनमित्याशंक्याह यत्नादि
ति ननु विवेकवतो विषयदोषदर्शिनो विषयेभ्यः स्वयमेवेंद्रियाणि आवर्त्तंते किं तत्र प्रज्ञास्थैर्यचिकीर्षता कर्त्तव्यमिति तत्रा
भपो ह यततो हीति विषये भूयोभूयो दोषदर्शनमेव प्रयत्नं हिशब्दस्य यस्मादर्थस्य समासेन संबंधं वक्ष्यति अपिशब्दस्य प्रयत्नं कुर्वतो
पीति संबंधं गृहीत्वा संबंधांतरमाह पुरुषस्येति प्रमथनशीलत्वं प्रकटयति विषयेति विक्षोभस्याकुलीकरणस्य फलमाह आकुली
कृत्येति प्रकाशमेवेत्युक्तं विशदयति पश्यत इति विपश्चितो विदुषोपि प्रकाशमेव प्रकाशशब्दितं विवेकाख्यं विज्ञाने नयुक्त

सम्यक्दर्शनलक्षणं प्रज्ञास्थैर्यं चिकीर्षता देविंद्रियाणि स्ववशे स्थापयितव्यानि यस्मात्तदनवस्थापने दोषमा
112 ह यतते इति यततः यत्नं कुर्वतोपि हि यस्मात् कौंतेय पुरुषस्य विपश्चितो मेधाविनो पीति व्यवहितेन संबंधः इंद्रि
याणि प्रमाथीनि प्रमथनशीलानि विषयाभिमुखं पुरुषं विक्षोभयंत्याकुलीं कुलीकृत्य च हरंति प्रसभं प्रसह्य प्रकाश कुर्वंत्या

यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ६० तानि सर्वाणि संयम्य युक्त आ
मेव पश्यतो विवेकविज्ञानयुक्तं मनः यतस्तस्मात् ६० ॥ सीत मत्परः वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ६१ ॥ ॥
तानीति तानि सर्वाणि संयम्य संयमनं वशीकरणं कृत्वा युक्तः समाहितः सन्नासीत मत्परः अहं वासुदेवः सर्वप्रत्यगात्मा परो यस्य स
मत्परः नान्योहं तस्मादित्यासीतेत्यर्थः एवमासीनस्य यतेर्वशे हि यस्येंद्रियाणि वर्तंते अभ्यासवशात्तस्य प्रज्ञा प्रतिष्ठिता ६१ ॥

मेवं मनो हरंतींद्रियाणीति संबंधः हिशब्दार्थमनूद्य तस्मादिंद्रियाणि स्ववशे स्थापयितव्यानीति पूर्वेण संबंधमभिसंधायाह यतस्तस्मा
दिति ६० इंद्रियाणां स्ववशत्वसंपादनानंतरं कर्त्तव्यमर्थमाह तानीति एवमासीनस्य किं स्यादिति तदाह वशे हीति समाहितस्य विक्षेपवि
कलस्य कथमासनमित्यपेक्षायामाह मत्पर इति परमेश्वरात्मतया कृत्यासनमेव स्फोरयति नान्योहमिति उत्तरार्धं व्याकरोति एवमि एम°
ति हिशब्दार्थं स्फुटयति अभ्यासेति यस्मादात्मनो नाहमन्योस्मीति मायुक्तानुसंधानस्यादरेण नैरंतर्येण दीर्घकालानुसंधानसामर्थ्यादित्य ३६
र्थः अथवा विषयेषु दोषदर्शनाभ्याससामर्थ्यादिंद्रियाणि संयतानीत्यर्थः ६१

इंद्रियाणांविषयेभ्योवैमुख्येपितद्विषयरागानुवृत्तौकथंप्रज्ञालाभःस्यादितिशंकते तन्नेति अनाहारभूमिः तत्राप्यर्थः विषयाननाहरतस्तदुप
भोगविमुखस्येत्यर्थः रागशेषेणोपसंह्रियतेनतर्हिप्रज्ञालाभःसंभवति रागस्यतत्सद्भावेपिबाधितत्वादित्यतआह रसवर्जमिति रागनिवृत्त्यु
स्तनमुस्य व पायमुपदिशन्नुत्तरमाह उच्यतइति विषयोपभोगपराङ्मुखस्यकुतोविषयपरावृत्तिस्तस्यावृत्तिस्त्वभ्यस्तुतेत्याशंक्याह यद्यपी
ति निराहारस्येत्युक्तमाख्यानमनाह्रियमाणविषयस्येतियोविषयप्रवणोनभवतितस्यात्यंतिकेतपसिक्लेशात्मकेव्यवस्थि
तस्यविद्याहीनस्यापीन्द्रियाणिविषयेभ्यःसकाशाद्यद्यपिसंह्रियंतेतथापिरागोवर्द्धिष्यतेसचतत्त्वज्ञानादुद्धिद्यतेइत्यर्थः त

तत्रविषयाननाहरत आतुरस्यापिइंद्रियाणिनिवर्त्तंतेकूर्मोगानीवसंह्रियंतेनतुतद्विषयोरागः रसवर्जंसंह्रीयतइत्यु निवर्त्तते=
न्तेविषयाइति यद्यपिविषयोपलक्षितानिविषयशब्दवाच्यानीन्द्रियाणियथवा विषयाएवंअनाह्रियमाणवि देहिनः
षयस्यनिराहारस्यकष्टेतपसिस्थितस्यमूर्खस्यापिनिवर्त्तंते देहिनोदेहवतोरसवर्जंरसोरागोविषयेषुयः तंवर्जंय

विषयाविनिवर्त्तंतेनिराहारस्यदेहिनः रसवर्जंरसोप्यस्यपरंदृष्ट्वानिवर्त्तते ५९ ५९ ॥ ॥

र्जयित्वारसशब्दोरागेप्रसिद्धः स्वरसेनप्रवृत्तोरसिकोरसज्ञइत्यादिदर्शनात् सोपिरसोरंजनात्मकःसूक्ष्मोस्ययतेःपरंपरमार्थ
तत्त्वंब्रह्मदृष्ट्वाउपलभ्याहमेवतदितिवर्तमानस्यनिवर्त्तते निर्वीजंविषयविज्ञानंसंपद्यतेइत्यर्थःनासतिसम्यग्दर्शनेरस
स्योच्छेदइत्यतःसम्यग्दर्शनात्मिकायाःप्रज्ञायाःस्थैर्यंकर्त्तव्यमित्यभिप्रायः ५९ ॥ ॥ ॥

शब्दस्पर्शादिविषयद्विधारसविषयत्वंनिषेधतिरसशब्दइति तुच्छमपोनायंततोरागकथंप्रसिद्धिरित्याशंक्याह स्वरसेनेति स्वेच्छयेतियाव
तरसिकःस्वेच्छावशवर्तीरसज्ञोविवक्षितज्ञातेत्यर्थः कथंतर्हितस्यनिवृत्तिरतआह सोपीति दृष्ट्वेत्येवोपलक्षिपर्यायोपास्पष्टयति
अहमेवेतिरागापगमेसिद्धमर्थमाहनिर्वीजमितिननुसम्यग्ज्ञानमंतरेणरागोनापगच्छतिचेत्तदपगमाद्धेतोरागवतःसम्यग्ज्ञानोदयोपि
आदितरेतराश्रयतेतिनेत्याह नासतीति इंद्रियाणांविषयदुर्विकल्पेविवेकहारणीत्वेहतेस्थूलोरागोनावर्त्तते तत्सम्यग्ज्ञानोत्पत्तौरसापि त एम०
रागस्यसर्वात्मनानिवृत्त्युपपत्तेर्नेतरेतराश्रयतेत्यर्थः प्रज्ञास्थैर्यस्यसफलत्वेस्थितेफलितमाह तस्मादिति ५९ ॥ ॥ ॥

गी० अ० २ विषयाणांस्मरणमपिचेदनर्थकारणंतर्हिभोगस्तेनजीवनार्थंभुंजानोविषयाननर्थंकथंनप्रतिपद्यतइत्याशंक्याहन्ना
३० नुवादपूर्वकमुत्तरश्लोकतात्पर्यमाह सर्वानर्थस्येति अनर्थमूलकथनानंतर्यमथशब्दार्थः परिहर्तव्योनिर्दिश्यते तत्परि
हारोपायजिज्ञासांदर्शयति दुरन्तीमिति रागद्वेषपूर्वकाप्रवृत्तिरिमत्रानुभवदर्शनार्थोहि शब्दः शास्त्रीयप्रवृत्तिर्व्यासेधार्थं
स्वाभाविकीमुक्तं तत्रैसधिकृतानधिकृतसंप्रयोगोवर्जनीयानं शनपानादीन्देहस्थितेर्हेतूनिति यावत् इंद्रियाणां विषयेषु
सर्वानर्थस्यमूलमुक्तंविषयाभिध्यानमध्येहानोमोक्षकारणमिदमुच्यते रागद्वेषेति रागद्वेषवियुक्तैः रागश्चद्वे मु
षश्चरागद्वेषौतत्सरः सर्वेंद्रियाणांप्रवृत्तिःस्वाभाविकीतत्रयोमुमुक्षुर्भवतिसताभ्यांवियुक्तैःश्रोत्रादिभिरिंद्रि
वश्यैरात्म यैर्विषयानवर्जनीयांश्चरन्नुपलभमानः आत्मनैववश्यानिवशीकृतानितैरात्मवश्यैर्विधेयात्मेज्ञातोविधेयमा स्ते
न्मान्तःकरणंयस्यसोयंप्रसादमधिगच्छतिप्रसादःप्रसन्नतास्वास्थ्यम् ६४ प्रसादेसतिकिंस्यादित्युच्यतेप्रसादेसर्व
रागद्वेषवियुक्तैस्तुविषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छति ६४ प्रसादेसर्वदुःखानांहा
113 दुःखानामाध्यात्मिकादीनांहानिर्विनाशोस्योपजायते ह \\ निरस्योपजायतेप्रसन्नचेतसोह्याशुबुद्धिःपर्यवतिष्ठते ६५ ॥ ॥
जायतेकिंचप्रसन्नचेतसःस्वस्थान्तःकरणस्यहियस्मादाशुशीघ्रंबुद्धिःपर्यवतिष्ठतेआकाशमिवपरिसमंतात्अ
वतिष्ठतेआत्मस्वरूपेणैवनिश्चलाभवतीत्यर्थः एवंप्रसन्नचेतसोस्थितबुद्धेःकृतकृत्यतापत्तस्माद्रागद्वेष ४
प्रवृत्तिश्चेन्नियमानुपपत्तौवर्जनीयेष्वपिस्यादित्या \\ वियुक्तैरिंद्रियैःशास्त्राविरुद्धेष्ववर्जनीयेषुप्रवृत्तःसमाचरेदितिवाक्यार्थः
दित्याशंक्याह आत्मेति अंतःकरणाधीनत्वादिंद्रियाणांतदनियमात्तेषामपिनियमानुपपत्तिरित्याशंक्याह विधेयात्मेति
६४ तथापिनानाविधदुःखाभिभूतस्यान्तःस्वास्थ्यमास्यात्तुशक्यमित्याशयेनपृच्छतिप्रसादइतिश्लोकार्द्धेनोत्तरमाह उच्यतइति
सर्वदुःखहानावुद्धिस्थैर्यस्यापिप्रकृतेनमहास्थैर्यंकथंस्थिरबुद्धिमित्याशंक्याह प्रसन्नेति बुद्धिप्रसादस्यैवफलान्तरमाह किंचेति तस्मा
जतनकृत त्बुद्धिप्रसादार्थंभाति तमम्मिति शेषः श्लोकद्वयप्रसादस्यैवैतदर्थमुक्तातात्पर्यार्थमुपसंहरति एवमिति प्रकृतः सर्वहितोविष राम० ३०
यमात्मवश्यंमनःसन्निति यावत् ६५

समनंतरश्लोकद्वयमवतारयन्नाह अथेति पुरुषार्थोपायोपदेशानंतरमथशब्दार्थः तन्निरूढ्वा हिंसावस्थां दर्शयति इदानीमिति
पराभविष्यतो महात्मनः पंगमिष्यतो विवेकविज्ञानविहीनस्येति यावत् सर्वानर्थफलं विवक्षमाभिधानं तस्य तत्पात्रमनुभवसि
द्धमिति वक्तुमिदमिसुक्तं विषयेषु विशेषबलमारोपितरमणीयत्वं प्रीतिरिति साधारणासक्तिमात्रं उच्यते तेन तस्य सुखं कामस्तज्जनि
क्ता प्रतिबंधेन प्रणाशेन वा प्रतिहतिः ६२ क्रोधस्य संमोहहेतुत्वमनुभवेन दर्शयति क्रुद्धो हि साक्रोशस्य धिक्षिपति

अथेदानीं पराभविष्यतः सर्वानर्थफलमिदमुच्यते ध्यायतइति ध्यायतश्चिंतयतो विषयान् शब्दादिविषयविशेषा
न् आलोचयतः पुरुषस्य संगआसक्तिः प्रीतिः तेषु विषयेषूपजायते तेऽत्सद्यते संगात् प्रीतेः संजायते समुत्प
यस्मात् द्यते कामः तस्मात्कामात्कुतश्चित्प्रतिहतात् क्रोधोभिजायते ६२ क्रोधाद्भवति संमोहो विवेकः कार्या

ध्यायतो विषयान्पुंसः संगस्तेषूपजायते संगात्संजायते कामः कामात्क्रोधोभिजायते ६२ क्रोधाद्भवति सं

कार्यविमर्षो क्रुद्धो हि संमूढः सन् गुरुमप्याक्रोशति // मोहः संमोहात्स्मृतिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणा श्यति
भवतीति संबं ध्यते स्मृतिसंमोहात्स्मृतिविभ्रमः शास्त्राचार्योपदेशाहितसंस्कारजनितायाः स्मृतेः स्यादिभ्रंशो भ्रंशः स्मृत्युत्पत्तिनिमित्तस्या
सौ अनुत्पत्तिस्ततः स्मृतिभ्रंशात्बुद्धेर्नाशः कार्याकार्यविषयविवेकायोग्यता अंतःकरणस्य तद्बुद्धिनाश उच्यते बुद्धिना
शात्प्रणश्यति तावदेव हि पुरुषो यावदंतःकरणं तदीयं कार्याकार्यविवेकयोग्यं तदयोग्यत्वे नष्टएव पुरुषो भवत्य
तः तेनांतःकरणस्य बुद्धेर्नाशात् प्रणश्यति पुरुषार्थायोग्यो भवतीत्यर्थः ६३

तद्योगपलम्भर्षः संमोहः कार्यत्वं
कथयति संमोहादिति स्मृतेर्निमित्तं निवेदं तद्द्वारस्वरूपं निरूपयति प्राप्नोतीति नोपितु एकदेवतस्याः स्वतो नाशं तं भवानं संमो
हाधीनत्वं तस्येत्याशंक्याह स्मृतेरिति स्मृतिभ्रंशोपि कथं बुद्धिनाशः स्वरूपतः शिष्यतीत्याह कार्येति ननु बुद्धेः पस्यत्तिस्स रा
न ति हृस्य बुद्धिनाशे विमर्शप्रकोनकल्प्यते तत्राह तावदेवेति कार्याकार्यविवेचनयोग्यांतःकरणाभावे सत्तोपि पुरुषस
कलं भवदृषूण तत्त्वाविवेकविवृत्तपानेन त्वसमर्थ दृष्टं तदेवाह पुरुषार्थेति ६३

आकांक्षाद्वाराश्लोकांतरमुत्थापयति अयुक्तस्येति विक्षिप्तचेतसो भावनाभावे साक्षात्कारलक्षणा बुद्धिर्न भवतीति हेत्वंतरेण साधयति इंद्रियाणामिति यस्मादेषां तन्मनस्तत्संगेनापि गृह्यते इंद्रियाणां श्रोत्रादीनां विषयाः शब्दादयस्तेषां विकल्पनं मिथ्या विभ्रमग्रहणं तेनेति यावत् स्थितं व्याकरोति उदकइतिकरोति यस्मादयुक्तस्य नो सद्यते बुद्धिरिति योजना ६७ यततो स्तस्मा

स्व

अयुक्तस्य कस्मात् बुद्धिर्नास्तीत्युच्यते इंद्रियाणामिति इंद्रियाणां हि यस्मात् चरतां स्वविषयेषु प्रवर्तमानानां यन्मनोऽनुविधीयते अनुप्रवर्त्तते तदिंद्रियविषयविकल्पनेन प्रवृत्तं मनो अस्य यतेर्हरति प्रज्ञामात्मानात्मविवेकजां कथं वायुर्नावमिवांभस्युदके जिगमिषतां मार्गादुद्धृत्योन्मार्गे यथा वायुर्नावं प्रवर्त्तयत्येवमात्मविषया

नैशयति

इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ६७ तस्माद्यस्य महाबाहो
गृ निहीतानि सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ६८ ॥ ॥ ॥ ॥

114

मतां हित्वा मनो विषयविषमां करोति ६७ यततो ह्यपीत्युपक्रमस्यार्थस्यानेकधोपपत्तिमुक्त्वा तं चार्थं उपपाद्योपसंहरति तस्मादिति इंद्रियाणां प्रवृत्तौ दोषउपपादितो यस्मात् तस्मादिति तस्माद्यस्य हे महाबाहो निगृहीतानि सर्वशः सर्वप्रकारैर्मानसादिभेदैरिंद्रियाणींद्रियार्थेभ्यः शब्दादिभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ६८ ॥ ॥

स्यप

वार्थस्य

।हीत्यादिश्लोकाभ्यामुक्तस्यैव प्रकृतश्लोकाभ्यामपि कथ्यमानत्वात् पुनरुक्तिरित्याशंकां परिहरति यततो हीत्यादिनाध्यायतो विषयानित्यादीनामुपपत्तिवचनमुक्तप्रायं तच्छ्रद्धयोपहितार्थोक्तिद्वारा श्लोकमवतारयति इंद्रियाणामिति अप्रमादिने नमनस्ता यस्मादनुविधीयमानानींद्रियाणि प्रसह्य प्रज्ञामपहरंति तस्मादिति योजना ६८ ॥ ॥ ॥

एम
२८

किंपुनःसलक्षुद्धैवपर्योक्तबुद्धिःसिध्यतिनेत्याह सेयमिति असमाहितस्यापिबुद्धिमात्रमुत्पद्यमानं प्रतिभातीत्याशंक्यविशि नष्टि आत्मस्वरूपेति नहिविक्षिप्तचित्तस्यात्मविषयाबुद्धिरुदेतुमर्हतीत्यत्रहेतुमाह नचेति आत्मज्ञानेश्रद्धादिपाततो जातेस्मृतिसंततानानुकारणंसाक्षात्कारपर्यंतमभिनिवेशोभावनेतिचोच्यते नचासौविक्षिप्तस्यसिध्यतीतिहेत्वर्थविवक्षिता ह आत्मज्ञानेतिभावनाहानाताहानाकारणाभावेपिकास्त्वितिरिसांशंक्याह नचेति असमाहितस्यभावनाभावादितिपाचत आत्म स्वरूप

सेयंप्रसन्नतास्तूयते नास्तीतिनविद्यतेनभवतीत्यर्थः बुद्धिरात्मस्वरूपविषयाअयुक्तस्यासमाहितांतःकरणस्य नचा युक्तस्यभावना आत्मज्ञानाभिनिवेशः तथाचनास्त्यभावयतः आत्मज्ञानाभिनिवेशमकुर्वतः शांतिरुपश

नास्तिबुद्धिरयुक्तस्यनचायुक्तस्यभावना नचाभावयतःशांतिरशांतस्यकुतःसुखम् ६६ ॥ ॥ श्री॥

मोऽशांतस्यकुतःसुखं इंद्रियाणांहिविषयसेवातृष्णातोनिवृत्तिस्तत्सुखंनविषयविषयातृष्णा दुःखमेवहिसान तृष्णायांहिसत्यांसुखस्यगंधमात्रमप्युपपद्यतइत्यर्थः ६६

न्यापाततोज्ञानेश्रवणाद्यावृत्तिरूपंस्मृतिमत्वानस्यापरोक्षत्वयुक्तभावेनात्वर्थेनिवृत्तिःसिध्यतीत्याह उपशमइति अनिवृत्ता नर्थस्यपरमानंदस्यागणद्वमितक्तस्यसंसारिवासिखंनिमग्नस्यसुखविभ्रमोवानसंभवतीत्याह अशांतस्येति तस्यापिविषयसेवि नोवैषयिकंसुखंसंभवतीत्याशंक्याह इंद्रियाणांहीति तस्यात्त्वपरस्यशास्त्रमतिद्रुमानुभवविकंचसुखत्वमितिवक्तुंहिशब्दः। विषयसेवातृष्णयापिविषयोपभोगहानासुखमुपलब्धमित्याशंक्याह दुःखमेवेतितत्राविहितश्रेष्ठोऽनुभवाचयोतीतिदेवस्य पतिनेत्याहिना ६६

गी.भा.२
३९

द्वितीयार्द्धं विभजते यस्यामिति सुप्तप्रसुप्तानां जागरणं विरुद्धमिति साशंकमाह प्रसुप्ता इवेति १ परमार्थतत्वमनुभवतो निवृत्ताविद्यास्तत्वज्ञा
स्येनैर्द्वैतावस्था निशेव सन्नेहेत्याह अविद्यारूपत्वादिति परमार्थावस्था निशा वा विदुषामविदुषां तु द्वैतावस्था तथेति स्थितेन फ
लितमाह अत इति अविद्यावस्थायामेव क्रियाकारकफलभेदप्रतिभानादित्यर्थः विद्योदयेपि तत्प्रतिभासाविशेषात् पूर्ववन्नि
वृत्कर्माणि विधीयेरन्निति साशंकमाह विद्या [illegible]
[illegible] यामिति अविद्यानिवृत्तौ बाधितानुवृत्त्या विभागभानेपि

725 प

यस्यामाहत्यमाह केभेदलक्षणायामविद्यानिद्रायां प्रसुप्तानामेव भूतानि जाग्रतीत्युच्यन्ते तस्यां निशायां प्रसुप्ता इव स्व
२१ मदृष्टयः सा निशाऽविद्यारूपत्वात् परमार्थतत्वं पश्यतो मुनेरतः कर्माणि अविद्यावस्थायामेव चोद्यन्ते न विद्यावस्थायां वि

यस्यां जागर्ति भूतानि सा निशा पश्यतो मुनेः ६९

यायां हिसत्या
घते सर्वे १

५ तरिंशार्वरमिव तमः प्रणाशमुपगच्छति सविद्यामात्रेविनोसनेरविद्याप्रमाणबुद्ध्या गृह्यमाणक्रियाकारकफलभेदरूपास
तीसर्वकर्महेतुत्वं प्रतिपद्यते नाप्रमाणबुद्ध्या [illegible]
गृह्यमाणायाः कर्महेतुत्वोपपत्तेः प्रमाणभूतेन वेदेन मम चोदितं कर्तव्यं कर्मेति हि कर्मणि कर्त्ता प्रवर्त्तते ॥ ॥

नाविकर्मविधिविभागाभिनिवेशाभावादित्यर्थः अविद्यावस्थयात् याक्रियादिभेदप्रमापकप्रमाणानुरूपपाकुज्ञानाराद्यतं प्राप्य कर्महेतु
र्भवति क्रियादिभेदाभिमानसत्तद्धेतुत्वादित्यर्थः न विद्यावस्थायामित्युक्तं प्रपंचयति नाप्रमाणेति उभयत्रापि च विद्यायामविद्यायाःनि
हत्तत्वा क्रियादिभेदं मानमप्रमाणमिति ज्ञाकिरूपयते तत्प्रागवस्थाप्रमाणपयोक्तविभागभागिप्रपंचः विद्या न कर्महेतुत्वं प्रतिपद्यते बाधि
तत्वेनाभासत्वात्तद्धेतुत्वायोगादित्यर्थः विद्याविद्याविभागेनोक्तमेव विशेषं विवृणोति प्रमाणभूतेनेति प्रयोजनेन वेदेन कामनाजी
वनादिमतो मम कर्म विहितं तेन मया तत्कर्तव्यमिति मत्वा नः स्वकर्मणि प्रवृत्तेऽधिक्रियते तं प्रति साधनविशेषवादिनो वेदस्य प्रवर्तक
त्वादित्यर्थः ॥ [illegible] मेव कर्माणीत्युक्तं व्यक्तीकरोति प्रागिति विद्योदयात्पूर्वं बाध
कामावाद्याधिकाः [illegible] १

राम०
३९

आत्मविदः स्थितप्रज्ञस्य सर्वकर्मपरित्यागेऽधिकारस्तद्विपरीतस्य तस्य कर्मणीत्येतस्मिन्नर्थे समनन्तरश्लोकमवतारयति, योय
मिति अविद्यानिवृत्तौ सर्वकर्मनिवृत्तिश्चेत्तन्निवृत्तिरेव कथमित्याशंक्याह अविद्यायाश्चेति स्फुटीकुर्वन्नवान्तरकरण
नां प्रागुक्तस्य प्रवृत्तिवत्त्वविधेर्दर्शने च मिथ्याविरुद्धे ते पराग्दर्शिनस्याभ्यन्तरङ्गाऽविद्याकार्यत्वादात्मदर्शिनस्य च तन्निवृत्तेः कल्प
नात आत्मदर्शनार्थमिन्द्रियाण्यपि यमो निरुद्धानीत्याहेति योजना सर्वप्राणिनां निशा यद्यविवेककरी सत्र हेतुमाह तमः

अविद्या

योयं लौकिको वैदिकश्च व्यवहारः समुत्पन्नविवेकज्ञानस्य स्थितप्रज्ञस्याविद्याकार्यत्वादविद्यानिवृत्तौ निवर्त्तते ऽविद्या
याश्च विद्याविरोधान्निवृत्तिरित्येतमर्थं स्फुटीकुर्वन्नाह, यानीति या निशा रात्रिः सर्वपदार्थानामविवेककरी तमः स्व
भावत्वात सर्वेषां भूतानां सर्वभूतानां किं तत्परमार्थतत्त्वं स्थितप्रज्ञस्य विषयो यथा नक्तंचराणामहरेव सदन्येषां निशा

श

उलूकादि

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ॥ ॥

भवति तद्वन्नक्तंचर
स्थानीयानामज्ञानि
नां सर्वभूतानां नि
शेव निशा १

परमार्थतत्त्वमगोचरत्वादतद्बुद्धीनां तस्यां परमार्थतत्त्वलक्षणायां अज्ञाननिद्रायाः प्रबुद्धो जागर्ति संयमी संयमवान् जि
तेन्द्रियो योगीत्यर्थः श्रीगणेशाय नमः श्रीगणेशाय नमः ॥ ॥

स्वभावत्वादिति सर्वप्राणिसाधारणी भवति हि निशां दर्शयित्वा तामेव प्रकृतावुपयोगेन प्रपञ्च्य पूर्वकं विशदयति किं तदित्यादिना स्थि
तप्रज्ञविषयस्य परमार्थतत्त्वस्य प्रकाशैकस्वभावस्य कथमज्ञानान्प्रति निशात्वमित्याशंक्याह यथेति तत्र हेतुमाह अगोचरत्वादिति
अतद्बुद्धीनां परमार्थतत्त्वातिरिक्तद्वैतप्रपञ्चप्रवृत्तबुद्धीनामप्रतिपन्नत्वात्परमार्थतत्त्वं निशेवाऽविद्यामित्यर्थः तस्यामित्यादि
व्याचष्टे तस्यामिति निशावद्दृश्यमानायामवस्थायामिति यावत् योगीति ज्ञानी कथ्यते ॥ ॥ ॥ ॥

गी॰ धा॰ २
४०

216

नन्वेवं संन्यासिनामपि विद्यावतां विद्याफलस्य मोक्षस्य लब्धुं शक्यत्वात्किमिति विदुषः संन्यासोऽपेक्ष्यते तत्राह विदुष इति आप
तत्त्वज्ञानवतो विवेकवैराग्यादिविशिष्टस्यैषणाभ्यः सर्वाभ्यो व्युत्थितस्य श्रवणादिहीनस्य मुमुक्षोः साक्षात्कारवतो मुख्यसंन्यासिनो
मोक्षो नान्यस्य विषयतृष्णापरिष्कृतस्येत्येतद्दृष्टान्तेन प्रतिपादयितुमनंतरश्लोकमवतारयतीत्यर्थः दृष्टान्तेनेत्यस्य प्रतिपादयितुमि
त्यनेन रागद्वेषवियुक्तैरित्यादिश्लोकोक्तमेवार्थं पुनराहेति योजना आपः समुद्रस्य समंतात्पूर्यमाणत्वे वृद्धिह्रासवर्जितो नदीमास्थि(

चलप्रतिष्ठम

विदुषस्तत्त्वज्ञानसंस्थितमनसस्सततैवमोक्षप्राप्तिर्न तु संन्यासिनः कामकामिन इत्येतमर्थं दृष्टान्तेन प्रतिपादयिष्यन्ना
ह आपूर्यमाणमिति आपूर्यमाणमद्भिरचलतया प्रतिष्ठा यस्य तमचलप्रतिष्ठं समुद्रमापः सर्वतो गताः प्रविशन्ति तथा तस्य

अवस्थिति

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ७०

मविक्रियमेव सन्तं यद्वत्तद्वत्कामा विषयसन्निधावपि सर्वत इच्छाविशेषा यं समुद्रमिवापोऽविकुर्वन्तः प्रविशन्ति सर्वे आत्मन्ये
वप्रलीयन्ते न स्वात्मवशं विकुर्वन्तीति स शान्तिं मोक्षमाप्नोति नेतरः कामकामी काम्यन्त इति कामाः विषयास्तान्कामयितुं शीलं यस्य

मुनिं

तिरापत्तेरित्याशंक्याह अचलेति न हि समुद्रस्योद्रेकात्मकं प्रतिनियतं रूपं कदाचिदपि व्य॥ स कामकामी न प्राप्नोतीत्यर्थः ७०
द्रेकेऽसत्येव तेन तदीयापस्थितिरेकरूपैवेत्यर्थः नतन्नादेयाश्चेदापः समुद्रं गच्छन्ति तर्हि तस्याविक्रियावत्त्वादप्रतिष्ठत्वस्यादित्या
शंक्याह स्वात्मस्थमिति इच्छाविशेषा विषयाणां सन्निधौ विदुषि निर्विकारे प्रविशन्तोऽपि सन्निधाने तस्मिन्प्रविशन्तो विकारमापा
दयेयुरित्याशंक्याह विषयेति प्रवेशं विशदयति सर्वे तदिति यो कामादिस्संस्कृतेर्विषयविमुखस्स निष्कामस्समोऽसौ न कामका
मुक इत्याह सशान्तिमिति ७० ॥

टम्पु॰
४०

सर्वमिदमविद्यामात्रं द्वैतं निशैवेति मत्वा नस्तु न प्रवर्त्तते कर्मणीत्यावर्समाह नास्ति चेति विदुषो न कर्मण्यधिकारश्चेत् साधिकारस्तर्हि कुत्रे-
त्याशंक्याह यस्येति तस्यात्मज्ञस्य फलभूतसंन्यासाधिकारो वाक्यशेषं प्रमाणयति तथा चेति प्रवर्त्तकं प्रमाणं विधिस्तदभावे कर्मस्विव विदु-
षो ज्ञाननिष्ठायामपि प्रवृत्त्यनुपपत्तेरपेक्षणीयो ज्ञानवतोऽपि विधिरिति शङ्कते तत्रापीति किमात्मज्ञानं विधिमपेक्षते किं वात्मा ना-
चक्षुरादि द्यः तस्य स्वरूपं विषयस्यपथ्या प्रमाणप्रमेयमुखेतैर्विध्यनपेक्षत्वादित्याह न स्वात्मेति नद्वितीयपक्षमाह नहीति प्रवर्त्तकप्रमा-
णशब्दितस्य विधेः साध्यविषयत्वादात्मनश्चासाध्यत्वादिति हेतुमाह आत्मत्वादेवेति आत्मतद्ज्ञानयोर्विध्यनपेक्षत्वेऽपि ज्ञा-
त्या निनो मानमेयव्यवहारं प्रति विधेयमर्थं विध्यपेक्षा स्यादित्याशंक्याह तदन्तत्वाच्चेति सर्वेषां प्रमाणानां प्रामाण्यस्यात्मज्ञानोदयाव-

नाविद्यामात्रमिदं सर्वं निशैवेति यस्य तु पुनर्निशैवाविद्यामात्रमिदं सर्वं भेदजातमिति ज्ञानं तस्यात्मज्ञस्य सर्वकर्मसंन्या-
स एवाधिकारो न प्रवृत्तौ तथा च दर्शयिष्यति तद्बुद्धयस्तदात्मान इत्यादिना ज्ञाननिष्ठायामेव तस्याधिकारः तत्राप्रव-
र्त्तकप्रमाणाभावे प्रवृत्त्यनुपपत्तिरिति चेन्न स्वात्मविषयत्वादात्मविज्ञानस्य न ह्यात्मनः स्वात्मनि प्रवर्त्तकप्रमाणापे- दा
क्षता आत्मत्वादेव तदन्तत्वाच्च सर्वप्रमाणानां प्रमाणत्वस्य न ह्यात्मस्वरूपाधिगमे सति पुनः प्रमाणप्रमेयव्य-
वहारः संभवति प्रमातृत्वं ह्यात्मनो निवर्त्तयत्यन्त्यं प्रमाणं निवर्त्तयदेव चाप्रमाणीभवति स्वप्नकालप्रमाणमिव प्रबोधे
लोके च वस्त्वधिगमे प्रवृत्तिहेतुत्वादर्शनात्तस्मान्नात्मविदः कर्मण्यधिकार इति सिद्धं ६९ ॥ ॥

सानत्वात्तस्मिन्नुत्पन्ने व्यवहारस्य निरवकाशत्वान्न तत्प्रति नियमापेक्षा ज्ञानिनो विधिरित्यर्थः उक्तमेवार्थं स्फुटीकरोति नहीति धर्मा-
द्यधिगमवदात्माधिगमेऽपि किमिति प्रव्योक्तो व्यवहारो न भवतीत्याशंक्याह प्रमातृत्वं हीति तन्निवृत्तौ कथमद्वैतज्ञानस्य मामाण्य-
मित्याशंक्याह निवर्त्तयदेवेति प्रमातृत्वं निवर्त्तयदद्वैतज्ञानं स्वयं निवर्त्तते न प्रमाणमिति दृष्टान्तमाह स्वप्नेति आत्मज्ञानस्य विध्यनपेक्ष-
के त्वे हेतुं तस्माह लोके चेति व्यवहारभूमौ हि प्रमाणस्य वस्तुनिश्चयफलपर्यन्तत्वेऽपि प्रवर्त्तकं विधिसापेक्षत्वानुपलम्भादद्वैतज्ञानमपि
प्रमाणत्वान्न विधिमपेक्षते रज्ज्वादिज्ञानवदित्यर्थः आत्मज्ञानवतस्तन्निष्ठायां विधिमन्तरेण ज्ञानमाहात्म्येनैव सिद्धत्वात्तस्य कर्मसं-
न्यासेऽधिकारो न कर्मणीत्युपसंहरति तस्मादिति ६९

तत्रतत्रसंक्षेपविस्तराभ्यांप्रदर्शितांज्ञाननिष्ठामधिकारिसहसंगत्वेनस्तोतुमुत्तरश्लोकमवतारयति सैषेति गृहस्थःसंन्यासीत्युभा
वपिचेन्मुक्तिभागिनौकिंतर्हिकष्टेनसर्वथैवसंन्यासेनेत्याशंक्यसंन्यासिनोऽतिरिक्तानांमंत्रएवसंभवाद्वेष्टितःसंन्यासोमुमुक्षोरि
त्याह एषेति स्थितिमेवव्याचष्टे सर्वमिति नविमुह्यतीतिपुनर्ननंजंतुकर्षणमन्वयपार्थसंन्यासिनोविमोहाभावेपिगृहस्थोधनहा
दिनिमित्तंप्रायेणविमुह्यति विविक्तःसन्परमार्थविवेकरहितोभवतीत्यर्थः यथोक्ताब्राह्मीस्थितिःसर्वकर्मसंन्यासपूर्विका संन्यास= म

सैषाज्ञाननिष्ठास्तूयते एषाब्राह्मीति एषायथोक्ताब्राह्मीब्रह्मणिभवेयंस्थितिःसर्वकर्मसंन्यस्यब्रह्मरूपेणैवा
वस्थानमित्येतत् नैनांस्थितिंप्राप्यलब्ध्वानविमुह्यतिनमोहंप्राप्नोतिस्थित्वास्यांस्थितौब्राह्म्यांयथोक्तायामंत

117

एषाब्राह्मीस्थितिःपार्थनैनांप्राप्यविमुह्यति स्थित्वास्यामंतकालेपिब्रह्मनिर्वाणमृच्छति ७२ ॥ ॥

कालेप्यंतेवयस्यपिब्रह्मनिर्वाणंब्रह्मनिर्वृतिंमोक्षमृच्छतिगच्छतिकिमुवक्तव्यंब्रह्मचर्यादेवसंन्यस्ययावज्जीवंयोब्रह्मण्ये
वावतिष्ठते सब्रह्मनिर्वाणमृच्छतीति ७२ इतिभगवद्गीताशंकरभगवत्पादकृतौगीताभाष्येद्वितीयोऽध्यायःसमाप्तः२

ब्रह्मनिष्ठान्तसांस्थित्वाभ्यामिमामायुश्चतुर्थेपिविभागेकृत्वेत्यर्थः अपिशब्दःसूचितंकैमुतिकन्यायमाह किमुवक्तव्यमितितदे
वंतत्संपरार्थौतदेकंवासांख्यस्यज्ञानादेकाकिनोमुक्तिस्तदुपायश्चेत्येतेतेषामेकैकंश्लोकेप्राधान्येनप्रदर्शितमितिनिष्ठाद्वयमु कं एकैकं रामं
पायोपेयभूतमध्यायेनसिद्धम् ७२ इतिगीताभाष्यटीकानंदगिरौद्वितीयोऽध्यायःसमाप्तः २ ॥ ॥ ॥

परिग्रहस्येनापि मनसा समस्ताभिमानं हित्वा कूटस्थं ब्रह्मात्मानं परिभावयतां ब्रह्मनिर्वाणमाप्नोतेमामं तर्हि मो[illegible]र्थो द्विविधं वनमेवे साशंकाह यस्मादिति शब्दादिविषयप्रवणस्य तत्तदिच्छाभेदभागिनो नमुक्तिरिति व्यतिरेकस सिद्धत्वात् पूर्वोक्तमन्व पंक्तिगमपि तु मनंतरवाक्यमित्यर्थः अशेषविषयत्यागिजीवनमपि कथमित्याशंकाह जीवनेति संभवद्रागद्वेषादिके देशे निवासव्याहसंर्यच रतीत्येतद्व्याचष्टे पर्यटतीति विहायकामानित्यनेन पुनरुक्तिं परिहरति शरीरेति निःस्पृहत्वमुक्तं निर्ममत्वं पुनर्वदन्नक यंस

यस्मादेवं तस्मात् विहायेति परित्यज्य कामान् यः संन्यासी पुमान् सर्वान् अशेषतश्चरति जीवनमात्रचेष्टाशेषः पर्यटतीत्यर्थः निःस्पृहः शरीरजीवनमात्रेऽपि निर्गतास्पृहा यस्य स निःस्पृहः सन् निर्ममः रतिममत्ववर्जितः शरीरजीवनमात्रोचितपरिग्रहेऽपि ममेदमित्यभिनिवेशवर्जितः निर्ममः निरहंकारो विद्यावत्त्वादिनिमित्तात्मसंभावनारहितः इत्यर्थः स एवंभूतः प्रज्ञो ब्रह्मविच्छांतिं सर्वसंसारदुःखोपरमलक्षणां निर्वाणाख्यामधिगच्छति प्राप्नोति ब्रह्मभूतो भवतीत्यर्थः ७१ ॥

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः निर्ममो निर-
हंकारः स शांतिमधिगच्छति ७१

नरुक्तिमार्थिकीं न पश्यतीत्याशंक्याह शरीरजीवनेति अहमहंकारो ममकारस्यावश्यकत्वान्निरहंकारत्वं व्याकरोति विद्यावत्त्वादीति सशांतिमाप्नोतीत्युक्तमुपसंहरति एवंभूत इति संन्यासिनो मोक्षमयेस्ममार्गस्य तद्वैकमिपरित्यागादीनि श्लोकोक्तानि विशेषणानि यत्नसाध्यानि तत्संपत्तिफलं तु कैवल्यमित्यर्थः ७१ ॥ ॥

अर्वांचो निकृष्टाः शाखा इव महदाद्या यस्य तं तथाभूतं संसारवृक्षं पुराणसंमतिमाह पुराणे चेति अव्यक्तमव्याहतं तदेव मूलं तस्मात्प्रभवं प्रभावो
यस्य तत्तथा तस्यैव मूलस्याव्यक्तस्यानुग्रहादतिदृढत्वादुत्थितः संवर्द्धितः तस्य लौकिकवृक्षसाधर्म्यमाह बुद्धीत्यादिना वृक्षस्य हि शाखास्कंधादु
द्भवंति संसारस्य च बुद्धेः सकाशान्नानापरिणामा जायंते तेन बुद्धिरेव स्कंधस्तन्मयस्तत्प्रचुरः यं संसारतरोरिंद्रियाणामंतराणि छिद्राणि कोट
ता४ राणि यस्य स यथा महांति भूतानि वृद्धिव्याप्त्यादीन्याकाशादीनि विशाखा स्तंभा यस्य तथा आजीव्यमुपजीव्यं ब्रह्मणाधिष्ठितो वृक्षो ब्रह्मवृक्षस्तत्त
थापि तानं विनाश्ये तु मशक्यतया सनातनः चिरंतनः एतच्च ब्रह्मणः परस्यात्मनो वनं वननीयं संभजनीयमत्र हि ब्रह्मप्रतिष्ठितं तस्य वृक्षस्य

ऊर्ध्वमूलोऽवाक्शाख इति पुराणे चाव्यक्तमूलप्रभवस्तस्यैवानुग्रहोत्थितः बुद्धिस्कंधमयश्चैवेंद्रियांतरकोटरः महाभूतवि
शाखश्च विषयैः पत्रवांस्तथा धर्माधर्मसुपुष्पश्च सुखदुःखफलोदयः आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः एतद्ब्रह्म
118 वनं चैव ब्रह्माचरति साक्षिवत् ॥ एतच्छित्त्वा च भित्त्वा च ज्ञानेन परमासिना ततश्चात्मरतिं प्राप्य तस्मान्नावर्तते पुनरित्यादि
तमूर्ध्वमूलं संसारमायामयं वृक्षमधःशाखं महदहंकारतन्मात्रादयः शाखा इवास्याधो भवंतीति सोयमधःशाखस्तमधःशा
खं न श्वोपि स्थातेति अश्वत्थस्तं क्षणप्रध्वंसिनमश्वत्थं प्राहुः कथयंति श्रुतिवादाः अव्ययं संसा.... मायाया अनादि
कालप्रवृत्तत्वात्सोयं संसारवृक्षोऽव्ययः अनाद्यंतदेहादिसंतानाश्रयो हि सुप्रसिद्धस्तमव्ययं तस्यैव संसारवृक्षस्य पर्णा
नीदमन्यद्विशेषणं तं छंदांसि ऋग्यजुःसामलक्षणानि यस्य संसारवृक्षस्य पर्णानीव पर्णानि यथा वृक्षस्य पर

[illegible]

साररक्षस्यगदेववृक्षसारभूतं अथवा स्ववृक्षस्य वृक्षस्यानवच्छिन्नस्य संसारमंडलस्य तदेतद्ब्रह्मवनमित्येव न [illegible] नीयं संभजनीयं न हि ब्रह्मातिरिक्तं सं
सारस्यास्तित्वमस्ति ब्रह्मैवाविद्यया संसरतीत्यभ्युपगमादित्यर्थः अतः ब्रह्मतिदृढेनानेनोक्तं संसारवृक्षं छित्त्वा प्रतिबंधकाभावादात्मनिष्ठो भूत्वा पुन
रावृत्तिरहितकैवल्यं प्राप्नोतीत्याह एतदिति अधःशाखमित्येतद्व्याचष्टे महदिति आदिशब्देन इंद्रियादिसंग्रहः संसारवृक्षस्यानित्यत्वं चलत्वं प्रमाण
मालप्राहुरिति क्षणप्रध्वंसिनोऽव्ययत्वं विरुद्धमित्याशंक्याह संसारेति तदेवोपपादयति अनादीति स्वाद्वैतेर्ध्यावरणवाकमेकांशं निरस्त्वारोहावरो ता८ १
हफलाविनाभावविधायित्वादुक्तानि संसारवृक्षोत्तेजिन्निषेधशेषवाचावदवतितेन तानि छंदांसि पर्णानीव भवंतीत्यर्थः

श्रीगणेशायनमः ॐ ज्ञानेन गुणात्यये दर्शिते नाशित्वे तेषां विना ज्ञानेनासंपादनाशित्वेनापि तद्योगपत्त्वान्न ज्ञानं गुणात्ययहेतुरित्याशंकां निर
गुणा स्य साक्षादेव अनुरागादिहेतुसंन्यासं विधित्सुः ब्रह्मतत्त्वस्य परमपुरुषार्थत्वं ताच विविच्य अध्यायान्तरमारभते यस्मादिति कर्मिणां ज्ञानिनं स्वशास्त्रे विहिताः
तत्र कर्मिणां कर्मानुकूलं फलमीश्वरायत्तं फलमत उपपत्तेरितिन्यायात् ज्ञानिनामपि तत्फलमीश्वरायत्तमेव ततो ह्यसंशयविपर्ययादिसुक्तत्वात्तय
स्मादेवं तस्माद्यभक्ताख्येन योगेन मामेव सेवते मत्प्रसादलब्धज्ञानं प्राप्य गुणातीता मुक्ता भवंतीति स्थितमित्यर्थः ये चात्मतत्वमेवं संदेहापपोहेन जा
नंतितेन ज्ञानेन गुणातीताः संतो मुक्तिं गच्छंतीति किमु वक्तव्यमित्यर्थः सिद्धमर्थमाह किमुवक्तव्यमिति आत्मतत्वज्ञानयतः संसारहेतुज्ञानं मो

श्रीगुरवेनमः ॐ यस्मान्मदधीनं कर्मिणां कर्मफलं ज्ञानिनां च ज्ञानफलम् अतो भक्तियोगेन मां ते सेवंते ते मत्प्रसादात् ज्ञानप्राप्तिक्रमेण गुणातीता
मोक्षं गच्छंति किमु वक्तव्यमात्मनस्तत्त्वसम्यग्विज्ञाने तस्मात् भगवानर्जुनेनापृष्टोऽप्यात्मनस्तत्त्वं विवक्षुरुवाच ऊर्द्धमूलमित्यादिनाचतावह

श्रीभगवानुवाच ऊर्द्धमूलमधःशाखमश्वत्थं प्राहुरव्ययम् छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् १

रूपककल्पनया वैराग्यहेतोः संसारस्वरूपं वर्णयति विरक्तस्य हि संसारात् भगवत्तत्त्वज्ञानेऽधिकारो नान्यस्येति ऊर्द्धमूलमिति ऊर्द्धमूलं का
लतः सूक्ष्मत्वात्कारणत्वान्नादित्वान्नित्यत्वान्महत्त्वाच्चोर्द्धमुच्यते ब्रह्माव्यक्तमायाशक्तिमन्मूलमस्येति सोऽयं संसारवृक्षः ऊर्द्धमूलः श्रुतेश्च

उक्तं वा ऊर्द्ध सानुकूलमतोऽर्जुनेन किंतद्वस्त्विति अपृष्टमपि तत्त्वं भगवान् पृष्टाभावेपि तस्यं तत्त्वसंपादनाभिमानादिस्माह अत्रेति तत्त्वे विवक्षितेऽनेकमिति संसारे व
र्णनेन तत्राह तत्रेति अध्यायादिः सप्रम्यर्थः वैराग्यमपि किमितिमय्यपेतन्नाह विरक्तस्येति रतिर्वैराग्यापत्तसंसारवर्णनमिति शेषः नाशसंभावना
येव रूपकं वेधहेतोर्दर्शयति ऊर्द्धमूलमिति कथं कालतः सूक्ष्मत्वं तदाह कारणत्वादिति तदेव कथं कार्यापेक्षं नियत रूवे भावित्वादित्याह या२
नित्यत्वादिति सर्वव्यापितत्त्वोत्कर्षं संभावयति महत्त्वाच्चेति ऊर्द्धमुच्छिन्नमुत्कृष्टमिति यावत् तेन स्यकू. स्य स्यकथं मूलत्वमित्याशंक्याह अव्यक्ते
ति मूलत्वेन श्रुतिमुदाहरति श्रुतेश्चेति ॥१

गी॰भा॰पु॰ कर्मेषु तस्य प्राणिनो कार्यो लोकः मनुष्यश्चासौ लोकश्चेत्यधिकृतो ब्राह्मणादिविशिष्टो देहो मनुष्यलोकः पुनः पुनः रागादिना प्रवर्तित्वेनानादि-
२ त्वान्न संसारवृक्षः समुच्छिद्यते न चोच्छेत्तुं शक्योऽनेकेनापीत्याशंक्याह यस्त्विति यथापूर्ववर्णितं यथा च लोके प्रसिद्धं तथास्य रूपमिह शास्त्रे नमो-
ते यते यथा चास्य ज्ञानायनो प्रलमुक्तमित्याह यथेति तस्याप्रमितत्वे हेतुमाह स्वप्नेति जस्य स्वप्नादिसमत्वे दृष्टनष्टस्वरूपत्वं हेतुः करोति दृष्टेति २ स्यमे-
पजेति शेषः तमेवामेयं तं हेतुं हेत्वावसानमपि तस्य न भातीत्याह अन्तएवेति ज्ञानेन विना भ्रांतिवासनाकर्मणामन्योन्यनिमित्तत्वान्नावसा-
यत्वमेवारोपितः संसारवृक्षः नरूपेति नरूपमस्येह यथावर्णितं तथानैवोपलभ्यते स्वप्नमरीचिउदकमायागंधर्वनगरसमत्वात् दृष्टनष्ट-
स्वरूपो हि स इत्यत एव नान्तो न पर्यन्तो निष्ठा समाप्तिर्वा विद्यते तथा न चादिरिति आरभ्यात्यं प्रवृत्त इति न केनचित् गम्यते न च तं प्रतिष्ठा स्थि-

119

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्वा ३

तिर्मध्यमस्य न केनचिदुपलभ्यते अश्वत्थमेनं यथोक्तं सुविरूढमूलं सुष्ठु विरूढानि विरोहं गतानि मूलानि यस्य तमेनं सुविरूढमूलम्
असंगशस्त्रेण असंगः पुत्रवित्तलोकैषणाभ्यो व्युत्थानं तेनासंगेन शस्त्रेण दृढेन परमात्माभिमुखत्वनिश्चयदृढीकृतेन पुनः पुनर्विवेकाभ्या-
साश्मनिशितेन छित्वा संसारवृक्षं सबीजमुद्धृत्य ३

नेमस्तीत्यर्थः इदं प्रथमत्वमपि नास्य परिच्छेत्तुं शक्यमित्याह तथेति आद्यन्तवत्त्वमध्यमपि नास्य प्रामाणिकमित्याह मध्यमिति संसारवृक्षस्याश्व-
त्थस्य शक्तितः क्षणभंगुरस्य स्वयमेवोच्छेदसंभवात् तं न उच्छेदार्थेन प्रयतितव्यमित्याशंक्याह अश्वत्थमिति मुमुक्षोर्वैराग्यपूर्वकं पारिव्राज्यं स्या-
द्दृढीकृतं तस्यैव विवेकपूर्वकत्वेन स्वोत्पत्तिः पुनः पुनरिति ३ ॥

१८०
२

त्मका

तदेवं प्रपंचयति तत्र्येति उक्ते र्थे हेतुमाह धर्मेति कर्मकांडोनां वेदानामिति शेषः कर्मवृत्तात्व सर्ववेदार्थस्य तत्त्वात्त भीवमुपेत्य व्याचष्टे वेदार्थेति १ समू
लं संसारवृक्षं तानेकुतूहलेहित्वा मूलमेव निःकृष्य त्वाचं शक्यमिति तत्त् तानाधयप्रपंति तव्यमितिमत्त्वा तत्र तानस्तु तिरश्च विवर्ज्जितत्वात् नहीति अव्यय
व संवेधिन्यं परप्रागुक्ता द्तिरिक्ताकल्पनेतियावत् आमनुष्यलोकादावीचेरित्यधःशब्दार्थमाह मनुष्यादिभ्यइति तस्मादेवारभ्य सत्यलोकादीत्यूर्ध्वशब्दा
र्थमाह यावदिति शाखाशब्दार्थं दर्शयति शाखेति तेषां हेतुत्वं गुणत्वेन वृद्धविधत्वस्य च पाति पर्वेति प्रसृतास्ताएां शब्दादिविषया एव प्रवालत्वं शाखासुप
त यावेदाः संसारवृक्षपरिरक्षणार्थो धर्माधर्मतद्धेतुफलप्रकाशनार्थत्वाद्यथाव्याख्यातं संसारवृक्षं समूलं युक्तं वेद स वेदविद्वेदार्थविदिति सर्थः १ नहि
संसारवृक्षादस्मात्समूलात्तु ज्ञेयोन्यो ऽणुमात्रोप्यवशिष्टोस्ति नतः सर्वज्ञः स यो वेद स वेदार्थविदितियस्मात्तस्मात्वं तद्वले सति ते पमंत भवतीति तस्मा से
त् समूलवृक्षं ज्ञानं स्तौति तस्यैव संसारवृक्षस्यापि रावपर्वव्यापारकल्पनोच्यते अधइति अधो मनुष्यादिभ्यो यावत्स्थावरं ईच यावद्ब्रह्मादिभ्यस्तजोधर्म
रस्येतं दतं प याकर्मयथाश्रुतं ज्ञानकर्मफलानि तस्य वृक्षस्य शाखा रवशाखाः प्रसृताः प्राप्ता गुणप्रवृद्धाः गुणैः सत्त्वरजस्तमोभिः प्रवृद्धाः स्थूलीकृता उपा

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके २

दानभूतैर्विषयैः प्रवालाः विषयाः शब्दादयः प्रवालाः पल्लवा देहादिकर्मफलेभ्यः शाखाभ्यः अंकुरीभवंतीव ते न विषयैः प्रवालाः शाखाः संसारवृक्षस्य परमं
मूलमुपादानं पूर्वमुक्तं अथेदानीं कर्मफलजनितरागद्वेषादिवासना मूलानीव धर्माधर्मप्रवृत्तिकारणान्यवांतरभावानि तान्यधश्चेदार्थयेत
पामूलान्यनुसंततानि अनुप्रविष्टानीति कर्मानुबंधीनि कर्म धर्माधर्मलक्षणमनुबंधः पश्चाद्भावीयेषामनुभूतिमनुभवंतीति तानि कर्मानुबंधीनि म
पल्लवमंकुरत्वं स्फोरयति देहादीति ऊर्ध्वमूलमित्यत्र संसारवृक्षस्य मूलमुक्तं ((नुलोके विशेषतो ऽधिकार इति मनुष्याणां धर्माधिकारः प्रसिद्धः २ च्य
किमिदानीमधश्च मूलान्युच्यंते तत्राह संसारेति अनुप्रविष्टत्वं सर्वेषु लिंगेष्वनुगततया संततत्वमविच्छिन्नत्वं रागादीनां कर्मफलजन्यत्वं प्रकट
यति कर्मेति कर्म रागरागादीनामपि पोहेतुहेतुमत्त्वे तेषां तथात्वेनानवच्छिन्नतया प्रवृत्तेः विशेषतो मनुष्यलोके भवतीत्यत्र हेतुमाह अत्र हीति २

गी॰ भा॰
२

तंत्रप्राप्तिहेतुमार्गमाह यति संयोगादिति गमनस्यागमनान्तत्वप्रसिद्धेरयुक्तं पदत्वाद्दृष्टादिरस्तु पसंहरति कथमिति आक्षेपं परिहरति श्रृण्विति भागवत्प्राप्तेर्निवृ
त्तिं तत्त्वाभावं सप्रश्नमर्थः जीवस्य परांशत्वेपि कथमुक्तदोषसमाधिरित्याशंक्य प्रतिबिंबपक्षमाश्रित्य दृष्टांतेन प्रत्याचष्टे यथेति अवच्छेदपक्षमाश्रित्य
दृष्टांतांतरेणोक्तदोषसमाधिं दर्शयति यथावेति आक्षेपसमाधिमुपसंहरति अतइति परस्य निरवयवत्वात्तदंशत्वं जीवस्यायुक्तमितिशंकते
ननु सर्वा हि गतिरागमांता संयोगा वियोगांता इति प्रसिद्धेः कथमुच्यते तद्गतानां नास्ति निवृत्तिरिति शृणु तत्र कारणं ममैवेति ममैव पर
मात्मनोंऽशो भागोऽवयव एकदेश इत्यनर्थांतरं जीवलोके जीवानां लोकः संसारे जीवभूतः भोक्ता कर्तेति प्रसिद्धः सनातनः पुरातनः यथा ज
लसूर्यकः सूर्यांशो जलनिमित्तापाये सूर्यमेव गत्वा न निवर्तते तेनात्मना संगच्छत एवमेव यथा घटाद्युपाधिपरिच्छि
न्नो घटाकाशः आकाशांशः सन् घटादिनिमित्तापाये आकाशं प्राप्य न निवर्तते इत्येवमत उपपन्नमुक्तं यद्गत्वा न निवर्तंत इति ननु निरव

न२

120 ममैवांशो जीवलोके जीवभूतः सनातनः मनःषष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति ७

यवस्य परमात्मनः कुतोऽवयव एकदेशोंऽश इति सावयवत्वे च विनाशप्रसंगोऽवयवविभागादिति नैष दोषः अविद्याकृतोपाधिपरिच्छिन्न एक धाया
देशोंऽश इव कल्पितो यथा दर्शितस्यायमर्थः क्षेत्राध्याये विस्तरशः स च जीवो मदंशकत्वेन कल्पितः कथं संसरत्युत्क्रामति चेत्युच्यते मनःष
ष्ठानींद्रियाणि श्रोत्रादीनि प्रकृतिस्थानि स्वस्थाने कर्णशष्कुल्यादौ प्रकृतौ स्थितानि कर्षत्याकर्षतीति ७

नन्विति तस्य निरवयवत्वे साधयति सावयवत्वेति वस्तुतो निरंशस्यापि परस्य कल्पनया जीवोंऽशो भविष्यतीति परिहरति नैष दोष इति वस्तुतस्तु जी
वस्य नांशत्वं परमात्मनस्तन्मात्रतापादर्शितत्वादित्याह दर्शितश्चेति यद्यपि परस्यांशत्वेन कल्पितो जीवो वस्तुतस्तु तदात्मैव न तावता तस्य संसारत्व न
मुक्तानि वेति शंकते कथमिति जीवस्य संसारमुत्क्रमणं चोपपादयितुमुत्क्रामत्युच्यत इति ॥ ७

प पा२ ॥ ७ ७

१२८
२

उद्धृत्य किं कर्त्तव्यं तदाह तत इति पश्चाद् अश्वत्थादीदृशस्य वस्तुनः परिमार्गितव्यं किं तत्पदं यत्प्रविष्टा न ते तदाह प्रविष्टेति येन सर्वं परं पृष्ठे वा शरणं पुरुषं प्रपद्ये
शरणं गतो भीत्यर्थः द्विविधेवादानुरोधेनेदृशं तमाह शरदिति ४ परिमार्गिणा पूर्वकेषु स्मृतं पदं गच्छंतामंगानां गत्या काश्यपवेदकं क्षयति कथमित्यादिना
मानो ऽहंकारः मोहस्त्वविवेकः जितसंगदोषाः शत्रुमित्रसन्निधावपि द्वेषप्रीतिवर्जिता इत्यर्थः तत्परत्वं श्रवणादिनिष्ठत्वं संन्यासिनो वैराग्यप्रधानत्वमुक्तं सर्वं
तत इति ततः पश्चात्तत्पदं वैष्णवं तत्परिमार्गितव्यं परिमार्गणमन्वेषणं ज्ञातव्यमित्यर्थः यस्मिन्पदे गताः प्रविष्टा न निवर्त्तंति नावर्त्तंते भूयः पुनः सं-
सारे यथा च परिमार्गितव्यमित्याह तमेव चाद्यः पदशब्देनोक्तं चाद्यमादौ भवं पुरुषं प्रपद्ये शरणं परिमार्गितव्यं तच्छरणागत्येत्यर्थः कोसौ पुरुष इत्यत्र
ते यतो यस्मात्पुरुषात्संसारमायावृक्षप्रवृत्तिः प्रसृता निःसृतैन्द्रजालिकादिव माया पुराणी चिरंतनी ४ कथंभूतास्तत्पदं गच्छंतीत्युच्यते निर्मा-
नेति निर्माननमोहाः मानश्च मोहश्च मानमोहौ तौ निर्गतौ येभ्यस्ते निर्माननमोहाः मानमोहवर्जिताः जितसंगदोषाः संगरागद्वेषः संगदोषः जितसंग-

ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्त्तंति भूयः तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ४ निर्माननमो-
हा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छंत्यमूढाः पदमव्ययं तत् ५ न तद्भासयते
सूर्यो न शशांको न पावकः यद्गत्वा न निवर्त्तंते तद्धाम परमं मम ६

दोषो यैस्ते जितसंगदोषाः अध्यात्मनित्याः परमात्मस्वरूपालोचननित्याः विनिवृत्तकामाः विशेषतो निःशेषेण निवृत्ताः कामा येषां ते विनि- शेषतो ५
वृत्तकामाः यतयः संन्यासिनो द्वंद्वैः प्रियाप्रियादिभिर्विमुक्ताः सुखदुःखसंज्ञैः परित्यक्ता गच्छंत्यमूढा मोहवर्जिताः पदमव्ययं तद्यथोक्तं ५ तदेव पदं पुनर्वि-
म शिष्यते नेति तद्धामेति व्यवहितेन धाम्ना संबंधः धाम तेजोरूपं पदं न भासयते सूर्य आदित्यः सर्वावभासनशक्तिमत्त्वेपि सति तथा न शशांकश्चंद्रो न
च पावको नाग्निरपि परमं वैष्णवं पदं गत्वा प्राप्य न निवर्त्तंते यच्च सूर्यादिभिर्न भासयते तद्धाम पदं परमं विष्णोर्मम परं यत्र गत्वा न निवर्त्तंत इत्युक्तं ६
कर्मीणाः ५ आदिशब्देन तद्धेतुरहंमोहवर्जितत्वमुक्तं हेतुः ततः ज्ञानसंन्यासीत्वं ब्रह्मसंदेहे यत्कर्तुं त्यक्तमेतिह्नतापांतो वेद्यं वेदपुमर्थत्वानप्रे : तस्मा दिनि २
सिद्धिरित्साशंक्याह न तद्भासयते त्युक्तमनर्थाक्षिपत्ति यत्तगत्वेति ६ ॥ ॥ ०

गी॰ भा॰ पं॰
४

तर्हि केषामात्मदर्शनं तदाह ये तु पुनरिति १० ज्ञानचक्षुःशब्देन न्यायानुगृहीतेन शास्त्रं ज्ञानसाधनमुक्तं तत्किमिदानीं शास्त्रमात्रेण न्यायानुगृहीतेना-
त्मानं पश्यंतीत्याह केचित्त्विति प्रयत्नः श्रवणमननात्मकः शास्त्रादिप्रमाणैर्यतंतोपीति संबंधः असंस्कृतात्मत्वं प्रकटयति तपसेति दुश्चरितादविरतेः
फलं कथयति अशांतेति अप्रशमबुद्धीनामविवेकिनां सद्भिरश्रवणाच्छिद्रप्लववदिति मत्वाह प्रपंचमिति ११ अनंतरश्लोकचतुष्टयस्य वक्तव्यानुवाद-
ये तु पुनः प्रमाणजनितज्ञानचक्षुषस्ते एनं पश्यंतीत्याह ज्ञानचक्षुषो विविक्तदृष्टय इत्यर्थः १० केचित्तु यतंतः प्रयत्नं कुर्वंतो योगिनः समाहितचित्ता
एनं प्रकृतमात्मानं पश्यंत्ययमहमस्मीति उपलभंते आत्मनि स्वस्यां बुद्धाववस्थितं यतंतोपि शास्त्रादिप्रमाणैरकृतात्मनोऽसंस्कृतात्मानस्त-
पसेंद्रियजयेन च दुश्चरितादनुपरता अशांतदर्पाः प्रयत्नं कुर्वंतोप्यैनं न पश्यंत्यचेतसोऽविवेकिनः ११ यत्पदं सर्वस्यावभासकमप्यग्न्यादित्यादिकं
ह्ला ज्योतिर्न विभासयते यत्प्राप्ताश्च मुमुक्षवः पुनः संसाराभिमुखा न निवर्तंते यस्य च पदस्योपाधिभेदमनुविधीयमाना जीवा घटाकाशादय इवाकाशांशा

यतंतो योगिनश्चैनं पश्यंत्यात्मन्यवस्थितं यतंतोप्यकृतात्मानो नैनं पश्यंत्यचेतसः ११ यदादित्यगतं ते-
जो जगद्भासयतेऽखिलं यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं १२

121

स्तस्य पदस्य सर्वात्मत्वं सर्वव्यवहारास्पदत्वं च विवक्षुः चतुर्भिः श्लोकैर्विभूतिसंक्षेपमाह भगवान् यदिति यदादित्यगतमादित्यसंगतमादित्याश्रयं
किं तत्तेजो दीप्तिः प्रकाशो जगद्भासयते प्रकाशयत्यखिलं समस्तं यच्चंद्रमसि शशभृति तेजोऽवभासकं वर्तते यच्चाग्नौ हुतवहे तत्तेजो विद्धि विजानीहि प्र
मामकं मदीयं मम विष्णोस्तज्ज्योतिः अथवा यदादित्यगतं तेजश्चैतन्यात्मकं ज्योतिः यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं मदीयं मम विष्णोस्तज्ज्यो-
तिः ननु स्थावरेषु जंगमेषु च तत्समानं चैतन्यात्मकं ज्योतिस्तत्र कथमिदं विशेषणं यदादित्यगतमित्यादि १२

हारणात्स्यमाह यत्पदमिति जीवात्मत्वेन चिद्रूपत्वमुक्त्वा तदीयचैतन्येनादित्यादीनामवभासकत्वाच्च ब्रह्मणश्चिद्रूपत्वमित्याह यदादित्येति चिद्रूपस्ये-
वद्ब्रह्मणः सर्वात्मकत्वप्रतिपादकत्वेन श्लोकं व्याचष्टे यदित्यादिना आदित्यादौ तत्र तत्रावस्थितं ब्रह्मचैतन्यं ज्योतिः सर्वावभासकमित्यर्थः ब्रह्मणः सर्वगतत्वेन चि-
नां॰८ द्रूपत्वमत्र विवक्षितमिति व्याख्यांतरमाह अथवेति चैतन्यज्योतिषः सर्वत्राविशेषादादित्यगतविशेषणमयुक्तमिति शंकते नन्विति ७ एम॰
४

६२

स्वस्थाने स्थितानामिंद्रियाणां जीवेनाकर्षणस्य कालं पृच्छति कस्मिन्निति जीवस्योत्क्रांतिर्नेश्वरस्येत्याशंक्येश्वरशब्दार्थमाह देहादीति ७ उत्क्रांत्यनंतर भाविनीं गतिरित्येतदर्थं वशादित्युक्तं अवशिष्टानि श्लोकाक्षराणि व्याचष्टे यदा चेति ८ मनःषष्ठानींद्रियाण्येव प्रग्रहणाति शेषतो दर्शयते कानीति ९

कस्मिन्काले शरीरमिति यच्चापि यदा वाप्युत्क्रामतीश्वरो देहादिसंघातस्वामी जीवस्तदाकर्षतीति श्लोकस्य द्वितीयपादो ऽर्थवशात्प्राथम्येन संबध्यते यदा च पूर्वस्मात् शरीरात् शरीरांतरमाप्नोति तदा गृहीत्वैतानि मनःषष्ठानींद्रियाणि संयाति सम्यग्याति गच्छति किमिवेत्याह वायुः पवनो गंधानिवाशयात्पुष्पादेः ८ कानीति पुनस्तानि श्रोत्रमिति श्रोत्रं चक्षुः स्पर्शनं च त्वगिंद्रियं रसनं घ्राणमेव च मनश्च षष्ठं प्रत्येकमिंद्रियेण सहाधिष्ठाय देहस्थो विषयान् शब्दादीनुपसेवते ९ एवं देहगतं देहात् उत्क्रामंतमिति उत्क्रामंतं परित्यजंतं देहं पू घ्रा

[३]शरीरं यद[४]वाप्नोति य[२]च्चाप्युत्क्रामतीश्व[१]रः गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात् ८
श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च अधिष्ठाय मनश्चायं विषयानुपसेवते ९
उत्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वितं विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः १०

र्वोपात्ते स्थितं वा देहे तिष्ठंतं भुंजानं शब्दादीनुपलभमानं गुणान्वितं सुखदुःखमोहाद्यैर्गुणैरन्वितमनुगतं संप्रयुक्तमित्यर्थः एवंभूतमप्येनमत्यंतदर्शनगोचरं प्राप्तं विमूढा दृष्टादृष्टविषयभोगबलाकृष्टचेतसस्त्वनेकधा मूढा नानुपश्यंति अहो कष्टं वर्तत इत्यनुक्रोशति च टिक

शरीरमित्यादिश्लोके देहादात्मनो ऽतिरेकमुक्त्वा श्रोत्रं चक्षुरित्यादौ त्वाखिलविने विषयेपयोपयंकरणानां प्रवर्तकत्वात्ते भोक्तेति रिक्त्वात्मेश्वरं तदितमुत्क्रांत्यादि कुर्वतस्वरूपत्वात् किमिति सर्वैर्न पश्यंतीत्याशंक्याह एवमिति सन्निहितमपि तेन दर्शनयोग्यमपि विषयपरवशादात्मानं सर्वैर्न पश्यंतीति भगवतोनुक्रोशं दर्शयति एवंभूतमिति ॥ ॥ ॥

गी॰आ॰पं
५

122

भगवतः सर्वात्मत्वे हेत्वन्तरमाह किंचेति अहमेवेत्यहंशब्देन परो लक्ष्यते भूत्वा पचामीति संबंधः परस्यैव जाठरात्मना स्थितौ श्रुतिं प्रमाणयति अयमिति वाक्यशेषमम
ग्निर्वैश्वानरो पति योऽयमिति देहान्तरारंभकत्वेनाये भूतं व्यवच्छिनत्ति येनेति जाठरात्मनापरस्थितस्य देहाश्रितत्वं सिद्धमिति नच पचव्यक्तव्यमित्याह स पुरुषविधं पुरुषे
न वेदेति श्रुतिमाश्रित्याह प्रविष्ट इति परस्य जाठरात्मनो अन्नपाके सहकारिकारणमाह प्राणेति संयुक्तत्वं संक्षिपति तत्त्वमन्नस्य चातुर्विध्यं प्रकटयति भोज्यमिति भोक्ता

ति च्चय

किंच अहमिति अहमेव वैश्वानर उदरस्थोऽग्निर्भूत्वा । अयमग्निर्वैश्वानरो यो । यं ...तः पुरुषे येनेदमन्नं पच्यते इत्यादिश्रुतेर्वैश्वानरः प्राणिनां प्राणवतां दे
हमाश्रितः प्रविष्टः प्राणापानसमायुक्तः प्राणापानाभ्यां समायुक्तः संयुक्तः पचामि पक्तिं करोमि चतुर्विधं चतुःप्रकारमन्नं भक्षं भोज्यं भक्ष्यं चोष्यं लेह्यं
भोक्ताऽग्निर्वैश्वानरोऽग्निर्भोज्यमन्नं सोमस्तदेतदुभयमग्नीषोमौ सर्वमिति पश्यतोऽन्नदोषलेपो न भवति १४ किंचान्यत् सर्वस्येति सर्वस्य प्राणिजातस्या

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधं १४ सर्वस्य चाहं हृ
दि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहं १५

हमात्मा सन् हृदि बुद्धौ सन्निविष्टो ऽतो मत्तः आत्मनः सर्वप्राणिनां स्मृतिर्ज्ञानं च तदपोहनं च येषां पुण्यकर्मिणां च पुण्यकर्मानुरोधेन ज्ञानस्मृ
ती भवतस्तथा पापकर्मिणां पापकर्मानुरूपेण स्मृतिज्ञानयोरपोहनं चापायनमपगमनं च ०

रो वैश्वानरदृष्टिः भोज्ये सोमदृष्टिरेवं भोक्तृभोज्यद्वयं सर्वं जगदग्नीषोमात्मना भुक्तिकाले ध्यायतो भोक्तुरन्नकृतो दोषो नेति प्रासंगिकं सफलं ध्यानं दर्शय
ति भोक्तेति १४ इतश्च सर्वात्मत्वेन सर्वव्यवहारास्पदत्वमीश्वरस्येत्याह किंचेति प्राणिजातं बुद्ध्यादिप्रवृत्तिकं तमात्मत्वेन बुद्धौ सन्निविष्टत्वात् तद्गुणदोषाणा
मशेषाणां द्रष्टृत्वमतोऽहं मध्यस्थगुणदोषद्रष्टृत्वादिति यावत् मत्तः सर्वकर्माध्यक्षाज्जगदाधारादित्यर्थः प्राणिनां स्मृतिज्ञानयोस्तदपायस्य च भगवद
धीनत्वे भगवतो वैषम्यं स्यादित्याशंक्याह येषामिति स्मृतिर्जन्मान्तरानुभूतस्य स्मरणं देशकालस्वभावविप्रकृष्टस्यापि ज्ञानमनुभवः धर्माधर्माभ्यां
विचित्रकार्यं कुर्वतो नेश्वरस्य वैषम्यमिति भावः ०

एव॰
५

सर्वत्र सत्त्वेपि ह्यभिव्यक्तिविशेषाद्विशेषणमिति परिहरति नैष दोष इति तदेव प्रपंचयति आदित्यादिष्विति सर्वत्रैव तन्न ज्योतिषस्तुल्यत्वेपि ह्यभिव्यक्त्याविशेषणोपपत्तिं दृष्टान्तेन स्पष्टयति यथा हीति १२ इतश्च सर्वात्मत्वं प्रकृतपदस्य युक्तमित्याह किंचेति ईश्वरो हि पृथिवीदेवतारूपेण पृथिवीं प्रविश्य भूतग्रामं बिभर्ति जगदीश्वरेण बलेन विधृतेति ततो गुर्व्यपि पृथिवी विदीर्णा नाधो निपततीत्यत्र प्रमाणमाह तथा चेति परस्यैव हिरण्यगर्भात्मनाव

नैष दोषः सत्त्वाधिक्यादाधिक्योपपत्तेः आदित्यादिषु हि सत्त्वमत्यन्तप्रकाशकमत्यन्तभास्वरमतस्तत्रैवाविस्तरं ज्योतिरिति तद्विशिष्यते न तु तत्रैवाधिकमिति यथा हि लोके तुल्येपि मुखसंस्थाने न काष्ठकुड्यादौ मुखमाविर्भवति आदर्शादौ तु स्वच्छे स्वच्छतरे तारतम्येनाविर्भवति तद्वत् १२
किंच गामिति गां पृथिवीमाविश्य प्रविश्य धारयामि भूतानि जगदहमोजसा बलेन यद्बलं कामरागविवर्जितमैश्वरं जगद्विधारणाय पृथिव्यां प्रविष्टं येन गुर्वी पृथिवी नाधः पतति न विदीर्यते विशीर्यते तथा च मन्त्रवर्णः येन द्यौरुग्रा पृथिवी च दृढेति स दाधार पृथिवीमित्यादिश्चातो गामा

गामाविश्य च भूतानि धारयाम्यहमोजसा पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः १३

विश्य भूतानि चराचराणि धारयामीति युक्तमुक्तं किंच पृथिव्यां जाता ओषधीः सर्वा व्रीहियवाद्याः पुष्णामि पुष्टिमतीः रसस्वादुमतीश्च करोमि सोमो भूत्वा रसात्मकः सोमः सन् सर्वरसात्मको रसस्वभावः सर्वरसानामाकरः सोमः स हि सर्वा ओषधीः स्वात्मरसाननुप्रवेशेन पुष्णाति १३

एषा नात्र मन्त्रयोरन्यपरतेति भावः देवतात्मना द्यावापृथिव्योर्गुरुत्वमुद्धरणं तु सामर्थ्यं तथापीश्वरपतनमेव स्वरूपधारणं तदपेक्षं पाठवैलक्षण्यादिति इत्थं ईश्वरस्य सर्वात्मत्वे हेत्वन्तरमाह किंचेति रसात्मकः सोमरूपतापन्नावपि कथमोषधीरीश्वरः सर्वा उह्मातोसारं आह सर्वेति १३

पारांतरं

गी॰भा॰पं ६ कार्यकारणरूपौराशीदर्शयित्वाराश्यंतरंदर्शयति आभ्यामितिवैलक्षण्यफलमाहक्षरेति उपाधिरूपंकृतगुणदोषास्पर्शैःफलितमाह निरपेति आभ्यांक्ष
राक्षराभ्यामितियावत् उत्तमोऽन्यइतिपदद्वयंवस्तुतःसर्वथैवक्षराक्षराभ्यामत्यन्ताभावदृष्ट्यर्थंजडवर्गेसान्यत्वंस्वहृतंस्यात्तंअयंनिरस्यति परमेति लो परस्वपराम
कत्रयमित्युपलक्षणंसर्वजगदपिबिभर्तितन्मध्येतन्मध्येवर्तेतेनतच्छक्तिमीयात्पेतियावत् नगच्छतिनपरंस्यव्याप्यसंसारंवारयति स्वतत्त्वेनजिनचासा
आभ्यांक्षराक्षराभ्यांविलक्षणः क्षराक्षरोपाधिरूपदोषेणास्पृष्टोनित्यशुद्धबुद्धमुक्तस्वभावः उत्तमइति उत्तमउत्कृष्टतमःपुरुषस्त्वन्यःअत्यं
तविलक्षणः आभ्यांपरमात्मेतिपरआसौदेहाद्यविद्याकृतात्मभ्यश्चान्नमयादिभ्यःपंचभ्यस्तेभ्यःआत्माचसर्वभूतानांप्रत्यक्चेतनःपरमात्मे
त्युदाहृतउक्तोवेदांतेषुसएवविशिष्यतेयोलोकत्रयंभूर्भुवःस्वराख्यंस्वकीययाचैतन्यबलशक्त्याविश्यप्रविश्यबिभर्तिस्वरूपसद्भावमात्रेणबि
123 भर्तिधारयति अव्ययोनास्यव्ययोविद्यतेइत्यव्ययईश्वरः सर्वज्ञोनारायणाख्यईशनशीलः यथाव्याख्यातस्येश्वरस्यपुरुषोत्तमस्येतन्ना

उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः योलोकत्रयमाविश्यबिभर्त्यव्ययईश्वरः १७
यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः १८

मप्रसिद्धं १७ तस्यनामनिर्वचनप्रसिद्ध्याऽर्थवत्त्वंनाम्नोदर्शयन्निरतिशयोहमीश्वरइत्यात्मानंदर्शयतिभगवान् यस्मादितियस्मात्क्षरम
स्या तीतोहंसंसारमायावृक्षमश्वत्थाख्यमतिक्रांतोहमक्षरादपिसंसारबीजभूतादपिचोत्तमउत्कृष्टतमऊर्ध्वतमोवाऽतःताभ्यांक्षराक्षराभ्यामुत्तमत्वा
दस्मिभवामिलोकेवेदेचप्रथितःप्रख्यातःपुरुषोत्तमइत्येवंमांभक्तजनाविदुःकवयःकाव्यादिषुवेदेनामनिर्बध्नंतिपुरुषोत्तमोऽयनेनाभिधानेनाभिग
त [illegible]न्योधारयितास्वतोबलत्वादित्याह अव्ययइतिसंपुटमेनतेक्षरमक्षरंचव्यक्ताव्यक्ते णेति १८
मरणेविभ्रमीश्वरइतिश्रुतस्येगृहीत्वात्ईश्वरइतिकिंचलोकवेदयोर्भगवतोनामप्रसिद्धमितिदृष्टप्रपंचत्वमित्याह यथेति १७ अश्वकर्णादिवदस्यनाम्नो
रूढत्वादर्थविशेषाभावाद्भगवतोपिलौकिकेश्वरवदीश्वरत्वंस्यादितिशंकांनिरस्यति तस्येतियस्मादस्यसापेक्षितंनिक्षिपति अतइतिउत्तमःपुरुषद्

विद्वेद्यं परं ब्रह्म भगवतोऽन्यदिति शंकां वारयति वेदैरिति वेदांतानां पौरुषेयत्वं परिहरति वेदेति तदर्थ संप्रदायप्रवर्तकत्वाद्यैर्न द्वैपायनात्मज्ञानवत्त्वमात्रे वेदा
र्थेति १५ उत्तरश्लोकानां तात्पर्यं वक्तुं शंकोत्थयति भगवत्तरेति विशिष्टोपाधिरहितस्यादिः सुषुप्त्याद्यवस्थाप्रोक्तास्तदर्थस्तत्त्वं स्वरूपमाह अथेति न केवलं निरु
त३ पाधिकात्मस्वरूपं निर्धारणार्थं योत्तरग्रंथः किंतु सर्वस्यैव गीताशास्त्रस्यार्थं निर्णीय पर्यमाह तत्त्वेति स एव भगवान् परमात्मना व्यशिवपञ्जं न सर्वात्मत्वेना श्रुत्यादि
शेषप्रसक्तामुक्तं द्वाविमाविति पुरुषोपाधित्वात्पुरुषत्वं न साक्षादिति विवक्षितत्वात् पुरुषाविति परं पुरुषं व्याचक्षते भगवत्तरेति तत्र कार्यलिंगमनुमा

वेदैश्च सर्वैरहमेव च परमात्मा वेद्यो वेदितव्यः वेदांतकृत् वेदांतार्थसंप्रदायकृदित्यर्थः वेदविद्वार्थविदेव चाहं १५ भगवत्तरे ईश्वरस्य कारणत्वस्य सिद्धि
भूतिं सेप उक्तो विशिष्टोपाधिकृतः परादित्यगतेन तत्तरस्यादित्या अयाधुनातनस्यैव क्षराक्षरोपाधिप्रविभक्ततया निरुपाधिकस्य केवलस्य
स्वरूपनिर्दिधारयिषयोत्तरश्लोका आरभ्यंते तत्र सर्वमेवातीतानागतान्तरध्यायार्थं ज्ञानविधारणीकृत्याह द्वाविमाविति द्वौ इमौ पृथग्राशीकृ
तौ पुरुषौ पुरुषोपाधित्वेन लोके संसारे क्षरतीति क्षरः विनाशी राशिः अपरः पुरुषः तद्विपरीतो भगवतो मायाशक्तिः क्षराख्यस्य पुरुष

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते १६

ल सोऽयं जीवोत्पत्तिनिमित्तमनेकसंसारिजंतुकामकर्मादिसंस्काराश्रयोऽक्षरः पुरुष उच्यते कौ तौ पुरुषाविति आह स्वयमेव भगवान् क्षरः सर्वाणि भूता
नि समस्तविकारजातमित्यर्थः कूटस्थः कूटो राशिः राशिरिव स्थितः अथवा कूटो माया वंचना जिह्मता कुटिलेति पर्यायाः अनेकमायादिप्रकारे
ण स्थितः कूटस्थः संसारबीजानंत्यान्न क्षरतीत्यक्षर उच्यते १६ ॥ ७ ११८

नेरूपयति क्षराख्यस्येति मायाशक्तिं विना भोक्तृणां कर्मादिसंस्कारैर्वा क्व कार्योत्पत्तिरित्याशंक्यांतस्य निमित्तत्वेपि मायाशक्तिरूपकारणनिमित्तं मत्वा
ह अनेकेति कामकर्मादित्यादिशब्देन ज्ञानेन गृह्यते पुरुषेति पुरुषे चैवेति पूर्वजयोरिह ग्रहणमिति शंकामाकांक्षाद्वारेण वारयति कौ ताविति कूटस्थ
शब्दार्थमुक्त्वा तेन चिन्तनस्य कूटस्थत्वमिति तापि त्रिगम्यमाह अनेकेति तस्य कथमक्षरत्वं विना ब्रह्मज्ञानमनादित्यादित्याह संसारेति १६

तत्र गमकमाह यत्नमिति भगवत्तत्त्वज्ञाने कृतकृत्यतेत्येतदुपपादयति विशिष्टेति नान्यथेत्युक्तं प्रपंचयति न चेति सत्यपि तत्त्वज्ञाने कर्मणां कर्तव्यत्वान्न कर्तव्यसमाप्तिरित्याशंक्याह सर्वमिति तत्त्वज्ञाने कृतार्थत्वेऽत्र मनोरपि संमतिमाह एतद्धीति भारतेति संबोधनतात्पर्यमाह यत इति

यस्तं वेद स वेदवित् वेदैश्च सर्वैरहमेव वेद्य इति योक्तमिदमुक्तं कथितं मया हे अनघ एतत् शास्त्रं यथादर्शितार्थं बुध्वा बुद्धिमान् स्यात् भवेत् नान्यथा कृतकृत्यश्च भारत कृतं कृत्यं कर्तव्यं येन स कृतकृत्यः विशिष्टजन्मप्रसूतेन ब्राह्मणेन यत्कर्तव्यं तत्सर्वं भगवत्तत्त्वे विदिते भवेत् कृतं भवेदित्यर्थः न चान्यथा कर्तव्यपरिसमाप्यते कस्यचिदित्यभिप्रायः सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते इति चोक्तं एत-

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पंचदशोऽध्यायः समाप्तः

द्धि जन्मसामग्र्यं ब्राह्मणस्य विशेषतः प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा इति च मानवं वचः यत एतत्परमार्थतत्त्वं मत्तः श्रुतवानसि अतः कृतार्थस्त्वं भारतेति २० इति भगवद्गीताभाष्ये शंकरभगवतः कृतौ पंचदशोऽध्यायः समाप्तः १५

सार्थपर्वमत्र इयानि यस्मात् फलं लभ्यते लिंगानि कानि तानीति पृच्छति कैरिति यथोच्छेदो व्याप्यत्वमित्यर्थः प्रश्नान्तरं किमाचार इति तान् सगु
णानन्ययोपायो व्यक्तस्तादृगुपायप्रकारं जिज्ञासया प्रश्नान्तरं कथमिति २१

अमृत

ती

गी·भा·

रतस्य गुणातीतस्य लक्षणान्तरमित्याह । किंचेति मानः सत्कारस्तिरस्कारोऽपमानः परकृतौ तयोः शत्रुपक्षयोः पक्षयोर्नैव विशेषो न कस्यचित्संहेति वचनात् त्याह तुल्य इति विदुषो मित्रादिबुद्ध्यभावात्तुल्यो मित्रारिपक्षयोरित्ययुक्तमित्याशङ्क्याह यद्यपीति सर्वकर्मत्यागे देहधारणमपि न सिद्ध्येत् भावान्न स्यादित्याशङ्क्याह देहेति उक्तविशेषणो गुणातीतो ज्ञातव्यः इत्याह गुणेति २५ यदुक्तमुपेक्षकत्वादि तन्निहि दोषद्वयात्मकं प्रयत्नसाध्यं विद्याधिकारिणा

२०२

किंच मानापमानयोरिति मानापमानयोस्तुल्यः समो निर्विकारः तुल्यो मित्रारिपक्षयोः यद्यपि उदासीना भवन्ति केचित् स्वाभिप्रायेण तथापि पराभिप्रायेण मित्रारिपक्षयोरिव भवन्तीति अयं तु तुल्यो मित्रारिपक्षयोरित्याह सर्वारंभपरित्यागी दृष्टादृष्टार्थानि कर्माण्यारभ्यन्त इत्यारंभाः सर्वांश्चैतानारंभान् सर्वारंभान् परित्यक्तुं शीलमस्येति सर्वारंभपरित्यागी देहधारणमात्रनिमित्तव्यति

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः सर्वारंभपरित्यागी गुणातीतः स उच्यते २५

रेकेण सर्वकर्मपरित्यागीत्यर्थः गुणातीतः स उच्यते २५ उदासीनवदित्यादि गुणातीतः स उच्यते इत्येतदन्तमुक्तं यावत् प्रयत्नसाध्यं तावत् संन्यासिनानुष्ठेयं गुणातीतत्वसाधनं मुमुक्षोः स्थिरीभूतं तु स्वसंवेद्यं सत् गुणातीतस्य यतेर्लक्षणं भवति अधुना कथं च त्रीन् गुणान् अतिवर्तते इति प्रश्नस्य प्रतिवचनमाह ॥ ८॥ ९

त्वेन साधनत्वेनानुष्ठेयमुक्तमुत्पन्नायां तु विद्यायां जीवन्मुक्तस्योक्तधर्मजाते स्थिरीभूतं स्वानुभवसिद्धं लक्षणत्वेन तिष्ठतीत्युक्ते धर्मजाते विभागं दर्शयति उदासीनवदित्यादिना प्रश्नद्वयमेवं परिहृत्य तृतीयं प्रश्नं परिहरति अथेति ॥ ॥

१५०

दृष्टांतं व्याचष्टे यथेति उपेक्षितस्य प्रपाते तत्वापोगादिसर्पैः आत्मविदात्मकौरस्यन्तानेनासीनो निवृत्तकर्तृत्वाभिमानो प्रयतमानो भव तीति दार्ष्टांतिकमाह तथेति गुणातीतस्तोपायमार्गो ज्ञानमेव शब्दादिभिर्विषयैरसकृत्स्पर्शतानात्मा चयवत्समारोसाह गुणैरिति उपनतानां विषयाणां रागद्वेषद्वारा प्रवर्तकत्वमित्येतत्प्रपंचयति तदेतदिति योवतिष्ठतिस गुणातीतः उक्त एवांतेवधः अवपदेस तिष्ठते एत्मनेपदं प्रयोगो कथं पास्मैपदमित्याशंक्याह छंदोभंगेति पाठांतरे नुपाधितानुवर्तिनमा अनुष्ठानेकरणाकारपरिणामानां गुणानां विषयाकारपरिणति उपपत्ते

उदासीनेति उदासीनवद्यथोदासीनो न कस्यचित्पक्षं भजते तथा यं गुणातीतस्तोपायमार्गो वृस्थित आसीन आत्मवित् गुणैर्यः सत्त्वा सीनविचाल्यते विवेकदर्शनावस्थानात् तदेतत्स्फुटीकरोति गुणाः कार्यकरणविषयाकारपरिणता अन्योन्यस्मिन्वर्तंत इति योवतिष्ठ ति छंदोभंगभयात्परस्मैपदप्रयोगः योऽतिष्ठतीति पाठांतरे नेंगते न चलति स्वरूपावस्थ एव भवतीत्यर्थः । किंच समदुःखेति समदुः

उदासीनवदासीनो गुणैर्यो न विचाल्यते गुणा वर्तंत इत्येवं योवतिष्ठति नेंगते २३ समदुःखसुखः स्वस्थः
समलोष्टाश्मकांचनः तुल्यप्रियाप्रियो धीरस्तुल्यनिंदात्मसंस्तुतिः २४

खसुखः समे दुःखसुखे यस्य स समदुःखसुखः स्वस्थः स्वात्मनि स्थितः प्रसन्नः समलोष्टाश्मकांचनः लोष्टवाश्मा च कांचनं च समानि यस्य तुल्यप्रियाप्रियः प्रियं चाप्रियं प्रियाप्रिये समे यस्य तुल्यप्रियाप्रियो धीरो धीमान् तुल्यनिंदात्मसंस्तुतिः निंदा चात्मसंस्तुतिश्च तुल्ये निं दात्मसंस्तुती यस्य स तुल्यनिंदात्मसंस्तुतिः २४

वृत्तिनैमेमेतिपरक्षन स्ववलनपाकुः सुहृद्विमात्मनो नज्ञातानीत्याह मानापमानयोरिति स्व गुणातीतस्य लिंगांतरमाह किंचेति तपोः समत्वरागद्वेषाभ्यां मानापमानयोः कीर्तिलाभिमानानास स्वत्वं प्रसन्नत्वं सान्ध्येरपृष्ठुतात्मिविध्येय स्वविरु हृष्वा प्रियाप्रियेयोः संभवेपिलोकदृष्टिमाधित्यार प्रिये चेति प्रियाप्रियग्रहणो नंमहीनानोंको चलाहीनोद्रात्मणपात्राजनकस्य यग्रहणाभि

स्तु द्वारोषेमित्रात्मसं त्रिराक्त्मनो गुणातीतने २५

सं

गी॰भा॰ष॰तु
२

नित्यत्वमपि भूपपादितं तेन पर्वाभ्यामपौनरुक्त्यं शंकितार्थस्य धर्मशब्दस्य वृत्तरापनुपपत्तिमाशंक्याह ज्ञानेति अर्थैर्यदिपतंबंधोस्य सुलभावैनैयेतुमै
कांतिकस्य सुक्त अव्हारपि मुक्तावाक्यार्थमाह अमृता हीति प्रतिष्ठापस्मादित्यर्वैरासंवेधः तस्मात्स्वगात्म्यपरमात्मतया निश्चयवेसम्य
ग्ज्ञानेनेति योजना अस्य श्लोकस्य पूर्वश्लोकेनैकवाक्यतामाह तदेतदिति विवृणोति तवात्मार्थं प्रपंचयति येनेति साशक्तिः ब्रह्मैवेति कथं
सामानाधिकरण्येनत्राह शक्तीति व्याख्यानांतरमाह अथवेति विशेषणानि पूर्ववद्यौनरुक्त्याविनेतव्यानि तद्वेनाध्यायेन हेत्रंशे च सं

शाश्वतस्य च नित्यस्य धर्मस्य धर्मज्ञानस्य ज्ञानयोगधर्मप्राप्यस्य सुखस्यानंदरूपस्यैकांतिकस्याव्यभिचारिणः अमृतादिस्वभावस्य प
रमानंदरूपस्य परमात्मा प्रत्यगात्मा प्रतिष्ठा सम्यग्ज्ञानेन परमात्मतया निश्चीयते इति तदेतद्ब्रह्मभूयाय कल्पते इत्युक्तं येनेश्वरशक्त्या
भक्तानुग्रहादिप्रयोजनाय ब्रह्म प्रतिष्ठते प्रवर्तते सा शक्तिर्ब्रह्मैवाहं शक्तिशक्तिमतोरनन्यत्वादित्यभिप्रायः यद्वा ब्रह्मशब्दवाच्यत्वा

शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्य च २७ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे॰

त्सविकल्पकं ब्रह्म तस्य ब्रह्मणो निर्विकल्पकोऽहमेव नान्यः प्रतिष्ठाश्रयः किंविशिष्टस्यामरणधर्मकस्याव्ययस्य व्ययरहितस्य किं
च शाश्वतस्य च नित्यस्य धर्मस्य ज्ञाननिष्ठालक्षणस्य सुखस्य तज्जनितस्यैकांतिकस्यैकांतनियतस्य च प्रतिष्ठाहमिति वर्तते २७ श्री
इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यश्रीशंकरभगवतः कृतौ भगवद्गीताभाष्ये चतुर्दशोऽध्यायः

प्र योगस्यक्षेत्राकारणात्त्रैगुण्यं च प्रश्ननिरूपणद्वारेण च सम्यग्ज्ञानस्य सकलसंसारनिवर्तकत्वमित्येतदुपपादयताध्याये स्तोऽर्थतत्साध्यं गुणेभ्य
ल्यत्वादिमुक्तस्य पत्नसिद्धलक्षणमिति निर्धारितं २७ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीशुद्धानंदपूज्यपादशिष्यभगव
दानंदज्ञानविरचितायां गीताभाष्यटीकायां चतुर्दशोऽध्यायः समाप्तः १४ ॥ ॥ ॥

203

१५०
१२

मच्छुव्कसमंसारिविषयत्वेत्र्यावर्जयति ईश्वरमिति तत्रैव नारायणशब्दसंमूर्त्तिभेदो व्यावर्त्तितं तस्य ताटस्थ्यं व्यवच्छिनत्ति सर्वेति मुख्यामुख्याधिकारिभेदेन विकल्पः भक्तियोगस्य पारदृढकत्वं व्यवच्छेत्तुम् अव्यभिचारेणेत्युक्तं तथा च दृढेनेति भजनं परमप्रेमस्तरावधुपासनेन नेतियेषामासेवते पराकुर्वित्तं तांश्चिन्तामहानुत्तं ध्यातीत्यर्थः स भगवदनुग्रहकृतसम्बन्धी संपन्नो विद्वान् जीवन्नेवेत्यर्थः २६ विद्वान्ब्रह्मैवेत्यत्र हेतुं प्रब्रू

मां चेति मां चेश्वरं नारायणं सर्वेम् तद्दृष्टपाश्रितं योपतिः कर्मी वा अव्यभिचारेण न कदाचिद्यो व्यभिचरति भक्तियोगो भजने भक्तिः सैव योगस्तेन विवेकज्ञानान्यके न हि भक्तियोगप्रः सरो भगवदनुग्रहः प्रसादजो भवति भक्तियोगेन सेवते स गुणान्समतीत्यैतान्यपोत्था न ब्रह्मभूयाय भवनं भूयः ब्रह्मभूयाय ब्रह्मभवनाय मोक्षाय कल्पते समर्थो भवतीत्यर्थः २६ उत्तरार्द्धं व्यनेन ब्रू

मां च योऽव्यभिचारेण भक्तियोगेन सेवते स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते २६ ब्रह्मणो हि प्रतिष्ठाहम
मृतस्याव्ययस्य च

स्यतार इति ब्रह्मणः परमात्मनः हि यस्मादहं प्रतितिष्ठत्यस्मिन्निति प्रतिष्ठा अहं प्रत्यगात्मा कीदृशस्य ब्रह्मणः किं विशिष्टस्यामृतस्याविनाशिनोऽव्ययस्याविकारिणः ११ श्रीरामकृष्णाय नमः

ति पुनरिति तत्रोत्तरमाह अव्ययत इति ब्रह्मशब्दस्यापरत्विबाधकं मुख्यार्थग्रहणमभिप्रेत्याह परमात्मन इति तं प्रतितिष्ठत्यस्मिन्प्रत्यगात्मनो परमात्मन इति त्वं तदुपपादयति प्रतितिष्ठतीति यद्ब्रह्मप्रत्यगात्मानि प्रतितिष्ठन्तीति तन्न किं विशेषणाभिप्रायेण तापात्रकमृतस्येत्यादि तच्चामृतशब्देना व्ययपदस्य पुनरुक्तिं परिहरति अविकारिण इति ०

प्रशंन

गी॰ भा॰ टी॰
२

द्रव्ययज्ञस्वाध्यायेनं पंथकारणा दैवी संपदमभिजातस्य विशेषांतराणि दर्शयति किंचेति त्यागशब्देन ज्ञानारंभं कस्मान्नोच्यते नेत आह एवमिति लज्जाकार्यान्निवर्त्तेत गेही निभिन्नामनोवृत्ती २ दैवीसंपदम्प्राप्तस्य विशेषाणान एवपिसंपत्तीस्माह किंचेति व्यावर्त्यकीर्त्तयति नेति अध्यात्माधिकारादितिशेषः क्षमाऽक्रोधयोरेकार्थे

किंच अहिंसेति अहिंसा अहिंसनं प्राणिनां पीडावर्जनं सत्यमप्रियानृतवर्जनं यथाभूतार्थवचनं अक्रोधः परैराक्रुष्टस्याभिहतस्य वा प्राप्तस्य क्रोधस्योपशमनं त्यागः संन्यासः पूर्वदानस्योक्तत्वात् शांतिरंतःकरणस्योपशमः अपैशुनमपिशुनता परस्मै पररंध्रप्रकटीकरणं पैशुनं तदभावोऽपैशुनं दया कृपा भूतेषु दुःखितेषु अलोलुप्त्वमिंद्रियाणां विषयसन्निधावविक्रिया मार्दवं मृदुता अकार्ये ह्रीर्लज्जा अचापलमसति प्रयोजने वाक्पाणिपादादीनामव्यापारयितृत्वं २ किंच तेज इति तेजः प्रागल्भ्यं न त्वक्गता दीप्तिः क्षमाक्रुष्टस्य ताडितस्य वांतर्विक्रियानुत्पत्तिरुत्पन्नायाः प्रशमनमक्रोध

अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशुनम् दयाभूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् २ तेजः क्षमा धृतिः शौ

चमद्रोहो नातिमानिता भवंति संपदं दैवीमभिजातस्य भारत ३

स्य च विशेषः धृतिर्देहेंद्रियेष्ववसादप्राप्तेषु तस्य प्रतिषेधकोंतःकरणवृत्तिविशेषो येनोत्तंभितानि करणानि देहश्च नावसीदंति शौचं द्विविधं मृज्जलाभ्यां कृतं बाह्यं आभ्यंतरं च मनोबुद्ध्योर्नैर्मल्यं मायारागादिकालुष्याभावः एवं द्विविधं शौचं अद्रोहः परजिघांसाभावः अहिंसनं नातिमानिता अत्यर्थं मानोतिमानः स यस्य विद्यते सोतिमानी तद्भावोतिमानिता नातिमानिता तस्या अभावः पूज्यतातिशयभावनाभाववृत्तस्यर्थः भवंत्येतानि संपदमभिजातस्य किंविशिष्टां संपदं दैवीं देवानां संपदमभिलक्ष्य जातस्य देवविभूत्यर्हस्य भाविकल्याणस्येत्यर्थः हे भारत ३

तेनेयोन्यः कृत्कमाशंक्य परिहरति उत्पन्नायाइति तयोरेव विशेषान्नयोन्यः कृतं फलतीत्याह कृत्स्नमिति विशदयति येनेति शौचस्य द्वैविध्यमेव प्रकटयति मृज्जलाभ्यामिति नाद्वे नैर्मल्यमेव स्फोरयति मायेति उक्तमुपसंहरति एवमिति अतिमानित्वाभावमेव व्यनक्ति आत्मनरुक्ति कस्येतानि विशेषणानी संपत्साप्यामा भवतीति साधकस्य मनुष्यदेहस्यैवं कथं दैवसंपदमभिलक्ष्य जातत्वमित्याशंक्याह देवेति ३

204

प
न
न

लक्ष्
२

श्रीगणेशाय नमः ॐ व्यवहितेन संबंधं वदन्नध्यायांतरमवतारयति दैवीति दैवीसंपत्ति राक्षसीमासुरींचैव प्रकृतिं मोहिनीमित्यादावितिरोधः प्रकृतीनां वि
स्तरेणादर्शने कुत्रोपयोगस्त्यांकविभज्योपयोगमाह संसारेति अतीतेचाध्याये कर्मानुबंधीन्यधश्च मूलान्यनुसंततानीत्युक्तं कर्मेयंआवासनाः संसारस्या
वांतरमूले तेनौकास्तामनुष्यदेहे प्राग्भावीयकर्मानुसारेणाव्यक्तमानाः सात्त्विकादिभेदेन दैव्यादिप्रकृतित्रयत्वेन विभक्ताविर्निर्गुणभगवानुक्तवादित्याह भ २
गवानिति अभीहत्ताशात्स्यादिदैवीसंपदेतंहितानुष्ठान निहत्तपरविचनापरस्यआज्ञेनवशीकारणमायाहृदये न्यायाकृत्वावहिरन्यवाच्यवहरणमनंतमयथा

श्रीगुरुभ्यो नमः ॐ दैव्यासुरी राक्षसी चेति प्राणिनां प्रकृतयो नवमेध्याये सूचितास्तासांविस्तारप्रदर्शनाय अभयंसत्त्वसंशुद्धिरित्यादि अध्यायआरभ्यते त
त्र संसारमोक्षाय दैवीप्रकृतिर्निबंधनायासुरी राक्षसी चेति दैव्याआदानाय प्रदर्शनं क्रियते तरयोः परिवर्जनाय च श्रीभगवानुवाच अभयमिति अभयमभीरु
ता सत्त्वसंशुद्धिः सत्त्वस्यांतःकरणस्य संव्यवहारेषु परवंचनमायानृतादिपरिवर्जनं शुद्धभावेन व्यवहार इत्यर्थः ज्ञानयोगव्यवस्थितिः ज्ञानंशास्त्रत आचार्यतश्चा धी
त्मादिपदार्थानां अवगमो वगतानामिंद्रियाद्युपसंहारेणैकाग्रतया स्वात्मसंवेद्यतापादनं योगस्तयोर्ज्ञानयोगयोर्व्यवस्थितिर्व्यवस्थानं तन्निष्ठता

श्रीभगवानुवाच अभयंसत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः दानंदमश्चयज्ञश्चस्वाध्यायस्तपआर्जवम् १

एषां प्रधानानां प्रथमो दैवी सात्त्विकी संपत्पञ्चयेषामधिकृतानां या प्रकृतिः संभवति सा सात्त्विकी उच्यते दानं यथाशक्ति संविभागोन्नादीनां दमश्च
बाह्यकरणानामुपशमो ऽतःकरणस्योपशमं शांतिरिति वक्ष्यति यज्ञश्च श्रौतो ऽग्निहोत्रादिः स्मार्तश्च देवयज्ञादिः स्वाध्याय ऋग्वेदाद्यध्ययनमदृष्टार्थं तपो
वक्ष्यमाणं शारीरादि आर्जवमृजुत्वं सर्वदा १ ॥ श्रीरामचंद्राय नमः

एवं पुनमाहिपदेनविप्रलंभाद्यभिरहः उक्तं सर्वं तं शिष्याह मुदेतिराधेत्प्रभपाद्यात्तानादिसिसंतात्रिधोक्ते तिपातुतत्राभेव सात्त्विकीं प्रकृतिं प्रकटयति पचेति
तानेकर्मणिवाऽधिकृतानामभीरुतायायाप्रकृतिः सातेषांतत्रसात्त्विकीसंपदित्यर्थः महाभाग्यानां प्रत्युक्तमोदैवीसंपदुक्त्वा तत्प्रति सर्वेषां पंचधा संभवेदंस
५ पदं अपरिशांति दानमिति बाह्यकरणविशेषकारणमात्र अंतःकरणस्येतिदेवयज्ञादिरिसाद्याद्दे नवित्तवृत्तोभूतपसोमनुष्यपतस्थे नित्र्यमुक्तं १

गी० भा० बो०
२

न्वध्यायशेषेणासुरसंपद्दर्शनमुपक्रमते तस्यास्त्याज्यत्वेन पंकप्रक्षालनंन्यायावतारादित्याशंक्याह प्रत्यक्षीकरणेति वर्जनीयामासुरीं संपदं विवृणोति प्रवृत्तिं चेति तां विहितां प्रवृत्तिं न जानन्तीत्यर्थः तां च निषिद्धां क्रियां न जानन्तीति संबंधः न शौचमित्यादेस्तात्पर्यमाह अनाचारा इति शौचसत्ययोराचारान्तर्भावेऽपि ब्राह्मणपरिव्राजकन्यायेन पृथगुपादानं ॥७॥ असुराणां जनानां विशेषणान्तरमपि [illegible]त्याह किंचेति विद्यत इत्यादिना पूर्वेण संबंधः शास्त्रैकगम्यमदृष्टमिति भित्तीकृत्य प्रवृ॰

अध्यायपरिसमाप्तेरासुरी संपत्प्राणिविशेषणत्वेन प्रदर्श्यते प्रत्यक्षीकरणेन च शक्यते अस्याः परिवर्जनं कर्तुमिति प्रवृत्तिमिति प्रवृत्तिं च प्रवर्तनं यस्मिन्पुरुषार्थसाधने कर्तव्ये प्रवृत्तिस्तां निवृत्तिं च तद्विपरीतां यस्मादनर्थहेतोर्निवर्तितव्यं सा निवृत्तिस्तां च जना आसुरा न विदुः न जानन्ति न केवलं प्रवृत्तिनिवृत्ती एव न विदुर्न शौचं नापि चाचारो न सत्यं तेषु विद्यते अशौचा अनाचारा मायाविनोऽनृतवादिनो ह्यासुराः ॥७॥ किंच असत्यमिति यथा वयमनृतप्रायास्तथेदं जगत्सर्वं असत्यमप्रतिष्ठं नास्य धर्माधर्मौ प्रतिष्ठा अतोऽप्रतिष्ठं चेति ते आसुरा जना जगदाहुरनीश्वरं न च धर्माधर्मसव्यपेक्षकमस्य शा- ८

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः न शौचं नापि चाचारो न सत्यं तेषु विद्यते ७ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं ॥
अपरस्परसंभूतं किमन्यत्कामहैतुकं ८ एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः प्रभवन्त्युग्रकर्माणः क्षयाय जगतो ९

205

सितेश्वरो न विद्यते इत्यतोऽनीश्वरं जगदाहुः किंच अपरस्परसंभूतं कामप्रयुक्तयोः स्त्रीपुरुषयोरन्योन्यसंयोगाज्जगत्सर्वं संभूतं किमन्यत्कामहैतुकं कामहैतुकमेव कामहैतुकमन्यज्जगतः कारणं न किंचिददृष्टं धर्माधर्मादिकारणान्तरं विद्यते जगतः काम एव प्राणिनां कारणमिति लोकायतिकदृष्टिरियं ८ एतामिति एतां दृष्टिमवष्टभ्याश्रित्य नष्टात्मानो नष्टस्वभावा विभ्रष्टपरलोकसाधना अल्पबुद्धयो विषयविषया अल्पैव बुद्धिर्येषां ते ल्प
ऽल्पबुद्धयः प्रभवन्त्युद्भवन्त्युग्रकर्माणः क्रूरकर्माणो हिंसात्मकाः क्षयाय जगतः प्रभवन्तीति संबंधः जगतोऽहिताः शत्रव इत्यर्थः ९

न किंचेति

सधिष्ठात्रात्मकेन ब्रह्मणा रहितं जगदिष्यते चेत्कथं तदुत्पत्तिरित्याशंक्याह किमन्यदित्यादि आक्षेपस्तत्र समर्थमाह न किंचिदिति ८ यथोक्तां दृष्टिं वृत्तिसहितैव दृष्टैवेत्याशंक्याह एतामिति प्रागुपदिष्टामेतां लोकायतिकदृष्टिमवलम्ब्येति यावत् नष्टस्वभावत्वमेव स्पष्टयति विभ्रष्टेति विषयाण्डशाल्पत्वं दृष्टमात्रोद्देशेन प्रवृत्तत्वं जगतः प्राणिजातस्येति यावत् ९

एवं८
२

आदेयत्वेन दैवीं संपदमुक्त्वा हेयत्वेनासुरीं संपदमाह दंभेति उत्सेको मदो महत्त्वधीर्गर्वहेतुः आत्मन्युत्कृष्टत्वारोपोऽभिमानः क्रोधस्तु कोपापरपर्यायः स्वपरयोरपकारप्रवृत्तिहेतुर्नेत्रादिविकारलिंगोंतःकरणवृत्तिविशेषः पारुष्यं निष्ठुरः प्रसन्नरुक्षवाक्कृत्तस्वभावः पारुष्यंत उपहरति पदेति ४ तामभिजातस्य दंभादीन्यज्ञानांतानि भवंतीत्यनुषज्यते कार्यफलविभागः आसुरीत्युपलक्षणं राक्षसी चेति द्रष्टव्यमित्याह तयोरिति फलविभागो संपदोरेवमुक्ते प्रतीत्यार्जुनस्याभिप्राये भगवतो वचनमित्याह तवेति

त्त अथेदानीमासुरीं संपदुच्यते दंभ इति दंभो धर्मध्वजित्वं दर्पो धनस्वजनादिनिमित्त उत्सेको अतिमानः पूर्वोक्तः क्रोधश्च पारुष्यमेव च परुषवचनं यथा काणं चक्षुष्मान्विरूपं रूपवान्हीनाभिजनमुत्तमाभिजन इत्याद्यज्ञानं चाविवेकः ज्ञानं कर्तव्याकर्तव्यादिमिथ्याप्रत्ययविषयमभिनातसेत्याह असुराणां संपदासुरी तामभिजातस्येत्यर्थः ४ अनयोः संपदोः कार्यमुच्यते दैवीति दैवी संपद्या सा विमोक्षाय संसारबंधनात् निबंधायेति नियतो बंधो निबंधस्तदर्थमासुरी संपन्मता अभिप्रेता या राक्षसी ता तथैवमुक्ते। अर्जुनस्यांतर्गतं भावं किमहमासुरीसंपद्युक्तः किंवा दैवीसंपदित्येवमालोचनारूपमालक्ष्याह भगवान् माशुचः शोकं मा कार्षीः

शि

दंभो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च अज्ञानं चाभिजातस्य पार्थ संपदमासुरी ४ दैवी संपद्विमोक्षाय निबंधायासुरी मता
माशुचः संपदं दैवीमभिजातोसि पांडव ५ द्वौ भूतसर्गौ लोकेस्मिन्दैवो विस्तरशः प्रोक्तः आसुरं पार्थ मे शृणु ६ व आसुर एव च दै

संपदं दैवीमभिजातोसि हे पांडव अभिलक्ष्य जातोसि भाविकल्याणस्त्वमसीत्यर्थः ५ द्वौ भूतेति द्वौ द्विसंख्याकौ भूतसर्गौ भूतानां मनुष्याणां सर्गौ भूतसृष्टी भूतसर्गौ सृज्येते इति सर्गौ भूतान्येव सृज्यमानानि दैवासुरसंपद्युक्तानि द्वौ भूतसर्गावित्युच्येते द्वयाह प्राजापत्या देवाश्चासुराश्चेति श्रुतेः लोकेस्मिन्संसारे इत्यर्थः तेषां द्वैविध्योपपत्तेः कौ तौ भूतसर्गावित्युच्येते प्रकृतावेव दैव आसुर एवोक्तयोरेव पुनरनुवादे प्रयोजनमाह दैवो भूतसर्गः अभयं सत्त्वसंशुद्धिरित्यादिना विस्तरशो विस्तारप्रकारैः प्रोक्तः कथितो नासुरो विस्तरशो नातस्तत्परिवर्जनार्थमासुरं पार्थ मे मम वचनादुच्यमानं विस्तरशः शृणु अवधारय ६

नत्राभिजात्यं हेतुं करोति पांडवेति ५ निर्दिष्टानां राक्षसीं संपत्तत्रैव पतिता कस्मान्नोक्ता तस्या आसुर्यामंतर्भावादित्याह द्वाविति भूतानां द्वैविध्यमानत्वेनोक्तौ यत्रासरामुराहरति द्वेति संपद्द्वययुक्तेभ्योऽतिरिक्तानामपि प्राणिभेदानां संभवात् कुतो देहिनां द्वित्वनियतिरित्याशंक्याह सर्वेषामिति ६

न

इदमन्यत्कुर्वे प्राप्स्यामि आनन्त्येन विपरिवर्जमानमित्येतद्यथोक्तमदभिप्राये प्रतिबंधकः शत्रुरपि न संभवतीत्याह असाविति त्वेजोनिः हीतानां त्वयापि रिभवेपि तुल्या नाशत्रूणां परिभवो निश्चितो न भवतीत्याशंक्याह सर्वेति ऐश्वर्ययोजिरेके पि कुतस्ते भोगसामर्थ्यमित्याशंक्याह अहमिति सिद्धत्वमेव स्फुरयति संपन्न इति १४ बलवानोजस्वी सुखी रोगरहितः विद्यावज्जधनाभिजनेमे तुल्यो नास्तीत्याह आद्य इति तथापि यागदानाभ्यां तत्फलेन वा कश्चिदधिको भविष्यतीत्याह

असौ मयेति असौ देवदत्तनामा मया हतः दुर्जयः शत्रुर्हनिष्ये चान्यानप्येकानपि किमनेके करिष्यंतीति तपस्विनः सर्वथापि नास्ति मत्तुल्यः ईश्वरोऽहं भोगी सर्वप्रकारेणाचसिद्धः हं संपन्नः पुत्रैर्नप्तृभिर्न केवलं मानुषः बलवान् सुखी चाहमेव १४ आढ्य इति आढ्यो धनेन अभिजनवान्सत्पुरुषश्रोत्रियत्वादिसंपन्नस्तेनापि न मम तुल्योऽस्ति कश्चित् कोऽन्योऽस्ति सदृशस्तुल्यो मया किंच यक्ष्ये यागेनाप्यन्यानभिभविष्यामि दास्यामि न

असौ मया हतः शत्रुर्हनिष्ये चापरानपि ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी १४ आढ्योऽभिजनवानस्मि कोऽन्यो
ऽस्ति सदृशो मया यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः १५ अनेकचित्तविभ्रान्ता मोहजालसमावृताः प्रस
क्ताः कामभोगेषु पतन्ति नरकेऽशुचौ १६

टादिभ्यः मोदिष्ये हर्षमतिशयं प्राप्स्यामीत्येवं अज्ञानेन विमोहिता विविधं अविवेकभावमापन्नाः १५ अनेकेति अनेकचित्तविभ्रान्ता उक्तप्रकारैरनेकैश्चित्तैर्विविधं भ्रान्ताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः मोहोऽविवेकस्तानं तदेव जालमिवावरणात्मकत्वात्तेन समावृताः प्रसक्ताः कामभोगेषु तत्रैव निविष्टाः संततेनोपचितकल्मषाः पतन्ति नरके अशुचौ वैतरण्यादौ १६

किंचेति नचैतेषामेषोऽभिप्रायः साधीयानित्याह इत्येवमिति १५ उक्तप्रकारविपर्ययेणात्मानस्य विवेकविकलानां किं स्यादित्यपेक्षायामाह अनेकेति कामादिविषयास्तेषां भोगेषु तत्प्रसक्तेषूपभोगेष्विति यावत् १६ ॥ ॥ ॥ ॥

तानेवं दुराचारान् प्रकारांतरेण विशिनष्टि नैवेति २० तानेव विधांतरेण विशिनष्टि चिंतेति चिंतामात्मीययोगक्षेमोपायालोचनात्मिकामपरिमेयविषयत्वा
त्परिमातुमशक्यामाश्रिता इति संबंधः एष कामोपभोगः परमयतो सुखस्येत्येतावत्सारश्चिकं तु नास्ति सुखमिति निश्चयवंत इत्याह एतावदिति २१ आसुरा
शेवं १ नेव कामेति काममिच्छामाश्रिता वह्निवद्दुःपूरमशक्यपूरणं दंभमानमदान्विताः दंभश्च मानश्च मदश्च दंभमानमदास्तैरन्विताः मोहादविवेकतः गृ न
हीत्वोपादाय असद्ग्राहान् अशुभनिश्चयान् प्रवर्त्तंते लोके अशुचिव्रताः अशुचीनि व्रतानि येषां ते अशुचिव्रताः १० चिंतामिति चिंतामपरिमेयांचापरिमातुमश
क्यते अस्याश्चिंताया इयत्ता अपरिमेया तां प्रलयांतां मरणांतां उपाश्रिताः सदा चिंतापरा इत्यर्थः कामोपभोगपरमाः काम्यंत इति कामाः शब्दा श
दयस्तदुपभोगपरमाः अयमेव परमः पुरुषार्थो यः कामोपभोगस्तेनैव निश्चिता एतावदिति निश्चिताः ११ आशापाशशतैरिति आशापाशशतैः आशा

काममाश्रित्य दुष्पूरं दंभमानमदान्विताः मोहाद्गृहीत्वासद्ग्राहान्प्रवर्त्तंतेऽशुचिव्रताः १० चिंतामपरिमेयांच प्रलयांतामुपाश्रिताः कामोपभोगपरमा
एतावदिति निश्चिताः ११ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ईहंते कामभोगार्थमन्यायेनार्थसंचयान् १२ इदमद्य मया लब्धमिदं
प्राप्स्ये मनोरथं इदमस्तीदमपि मे भविष्यति पुनर्धनम् १३

एवं पाशास्तैश्शतैः आशापाशशतैर्बद्धा नियंत्रिताः संतः आकृष्यमाणाः कामक्रोधपरायणाः कामक्रोधौ परमयनं येषां ते कामक्रोधपरायणाः ईहंते
कामभोगार्थमीहंते चेष्टंते कामभोगार्थं कामप्रयोजनाय न धर्मार्थं अन्यायेनार्थसंचयान् अर्थप्रचयान् अन्यायेन परस्वापहरणादिना इत्यर्थः १२ इद
शश्च तेषामभिप्रायः इदमिति इदं द्रव्यं अद्य इदानीं मया लब्धं इदं अन्यत् प्राप्स्ये मनोरथं मनस्तुष्टिकारं इदं चास्ति इदमपि मे भविष्यत्यागामिनि संवत्सरे पुन
र्धनेनेनाहं धनी प्रविख्यातो भविष्यामि १३ ॥ ॥
"केञपायार्थे विषयानवगतो पायार्थे विषयावाप्त्यर्थेना आशापाशशता ॥
पाशाः स्वपाशास्तेषां शतैर्बद्धा बद्धा इव येयतः पूर्वान्मते तत्र तत्र नीयमाना इत्याह आशापाशेति १२ तेषामभिप्रायोपि विवेकविरोधी इत्याह इदमद्येति
दूष्यंगो हि रागादि १३ ॥ ६

नेव पुनर्विशिनष्टि आशापाशेति अशा ३

207

तेषामुक्तविशेषणानांतामसुराणांकिंस्यादितितत्राहतानिति भगवतोनैर्घृण्यप्रसंगप्रसक्त्यादिशत्ति अधमैति १९ ननुतेषामपिक्रमेणबहूनांजन्मनामंतेश्रेयोभविष्यतिनेत्याह आसुरीमिति तेषामीश्वरप्राप्तिशंकाभावेकथंतन्निषेधस्यादित्याशंक्याहमामित्यादिनो यस्मादासुरीसंपदनर्थपरंपरायाःसर्वेपुरुषार्थपरिपंथिनीतस्माद्यावत्पुरुषःस्वतंत्रोनेकांचित्सारंवश्यकीयांनिमायत्वात्तावदेवतेनासौपरिहरणीयेतिसमुदायार्थः २० कथमासुरीसंपदंतेनभेदवनानत्यमिति तानहंसर्वान्सन्मार्गप्रतिपक्षभजान्साधुद्वेषिणोमांद्विषतश्चक्रूरान्संसारेष्वेवनरकसंसरणमार्गेषुनराधमानधर्मदोषबलात्क्षिपामिपातयामिअजस्रंसंततमशुभानशुभकर्मकारिणआसुरीष्वेवक्रूरकर्मप्रायासुव्याघ्रसिंहादियोनिषुक्षिपामीत्यनेनसंबंधः १९ आसुरीमिति आसुरींयोनिमापन्नाःप्रतिपन्नाःमूढाःस्वविवेकिनःप्रतिजन्मतमोबलास्तवयोनिषुजायमानाअधोगच्छंतीमूढाःमामीश्वरंअप्राप्यअनासाद्यैवकौंतेयततस्तस्मादपियांतिअधमांनिकृष्टतमांगतिमामप्राप्यैवेतिनमत्प्राप्तौकाचिदप्याशंकास्तनो

तानहंद्विषतःक्रूरान्संसारेषुनराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनिषु १९ आसुरींयोनिमापन्नामूढाजन्मनिजन्म
नि मामप्राप्यैवकौंतेयततोयांत्यधमांगतिं २० त्रिविधंनरकस्येदंद्वारंनाशनमात्मनःकामःक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्यजेत्

मद्विष्टसाधुमार्गमप्राप्येत्यर्थः २० सर्वस्याआसुर्याःसंपदःसंक्षेपोपघच्यते यस्मिंत्रिविधेसर्वासुरीसंपद्भेदोनंतोप्यंतर्भवति यत्परिहारेणपरिहृतश्चभवतियन्मूलंसर्वस्यानर्थस्यतदेतदुच्यते त्रिविधमिति त्रिविधंनरकद्वारंत्रिःप्रकारंनरकस्यप्राप्तौद्वारंनाशनमात्मनःपत्तद्वारंप्रविशनराचेनप्रपतिआत्मानामेचित्पुरुषार्थोपयोगयोग्योनभवतीत्येतदुच्यते द्वारंनाशनमात्मनइति किंतत्कामःक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्यजेत्परंएतत्द्वारंनाशनमात्मनस्तस्मात्कामादित्रयमेतत्त्यजेत्त्यागत्तिरिप २१

तोपुरुषोद्वेषेणापिपरित्यज्यशक्येतेत्याशंक्याह सर्वस्मादिति संक्षेपोक्तिफलमाह एतैरिति कामादौत्रिविधेसर्वस्याआसुरीसंपद्भेदस्यांतर्भावेपिकथमसौपरितोपतेतत्राह परिहारेणेति कामादिपरिहारेणासुरीसंपद्भेदपरिहारोपिकथंसर्वानर्थपरिवर्जनमित्याशंक्याह यन्मूलमितिकथमात्मनोनिजस्वरूपांशेकोतितत्राह कर्मेविदिति त्रिविधमपितामसानपगोरशिनमाकाशाद्वारविशेषतोद्रंपयति किंततदितिनस्मादितिव्याचष्टे एतैरितेकामा

श१

दित्यागेसतिअनर्थावरणश्रेयःप्रतिबंधनिवृत्तौज्ञाप्यातात्मीतिभावः २१

सु३।१२

ननु तेषामपि केषांचिद्वैदिके कर्मणि यागदानादौ प्रवृत्तिप्रतिपत्तेरुक्तवैतरणपादौ पतनमिति चेत्तत्राह आत्मेति आसुरीं संपदमभिजातैस्तैर्धर्मे ज्ञातमेवं संचीय-
ते प्रवृत्तेरपि वैदिके कर्मणि नैव पुरुषमिसुक्तं १७ बलं तान्नान्यत्र अहरहर्देवो द्विजं तस्मात् अहंकारमिति अहंकारमेव स्फारयति विद्यमानैरिति अध्यारो-
पितैर्विशिष्टविषयत्वादहंकारस्याविद्यामूलत्वेनाविद्यात्मत्वमाह अविद्याख्य इति विवेकिभिस्त्यज्यत इति यत्नादेव तु सत्वयति कष्टतम इति तदे-
व स्पष्टयति सर्वेति संश्रिता इति संबंधः कार्यकारणसामर्थ्यमुक्तविशेषणाबलं अहंकारएव महद्दोषी रागपर्यन्तत्वेन परिणतो दर्पेत्यं व्याकरोति
आत्मेति आत्मसंभाविताः सर्वगुणविशिष्टतयात्मनैव संभाविता आत्मसंभाविता न साधुभिस्तथा अप्रणतात्मानो धनमानमदान्विता धननिमि-
त्तो मानो मदश्च ताभ्यामन्विताः यजन्ते नामयज्ञैर्नाममात्रैर्यज्ञैस्ते दंभेन धर्मध्वजितया पाखंड विधिपूर्वकं विहितांगेतिकर्तव्यता रहितैः १७ अहमिति
अहंकारं अहंकरणं अहंकारः विद्यमानैरविद्यमानैश्च गुणैरात्मन्यध्यारोपितैर्विशिष्टमात्मानमहमिति मन्यते सोऽहंकारोऽविद्याख्यः कष्टतमः सर्वदोषा-

आत्मसंभाविताः स्तब्धा धनमानमदान्विताः यजन्ते नामयज्ञैस्ते दंभेनाविधिपूर्वकम् १७ अहंकारं बलं दर्पं कामं
क्रोधं च संश्रिताः मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः १८ ॥ ७

णां मूलं सर्वानर्थप्रवृत्तीनां च तथा बलं पराभिभवनिमित्तं कामरागान्वितं दर्पो नाम यस्योद्भवे धर्ममतिक्रामति सोऽयमंतःकरणाश्रयो म
दोषविशेषः सोऽपि पत्यपि विनादोषप्राप्तेऽपि धर्मान्नश्यति हृष्टो दृप्यति दृप्तो हि धर्ममतिक्रमतीति श्रुतेः कामं स्त्र्यादिविषयं क्रोधमनिष्टविषयं एतानन्यांश्च म-
हतो दोषान्संश्रिताः किंचेति मामीश्वरमात्मपरदेहेषु स्वदेहे परदेहेषु च तद्बुद्धिकर्मसाक्षिभूतं मां प्रद्विषंतो मच्छासनातिवर्तित्वं प्रद्वेषस्तं कुर्वन्तो- सां
ऽभ्यसूयकाः सन्मार्गस्थानां गुणेषु असहमानाः १८ ॥ द्वयोर्नामेत्यादिना असंमाभ्यहोषान्मात्तपरिन्न न केवलं उक्तमेव गेवाविरोधः किं-
तु कष्टतममपि विशेषणान्तरमाह किंचेति पद्यमीश्वरं प्रति द्वेषस्तेषां संभाव्यते तथापि कथं स्वदेहे परदेहेषु च तं प्रति द्वेषः न हि तत्र भोक्तारमंतरेणान्य-
रस्यावस्थानमित्याशंक्याह तद्बुद्धीति तेषामीश्वरं प्रति द्वेषमेव प्रकटयति मच्छासनेति ईश्वरशासनस्य श्रुतिस्मृतिरूपत्वात् तदुल्लंघनं तदुक्तानुष्ठान-
पराङ्मुखत्वं १८

सा

वैतै ५२

सम्यग्

शास्त्राद्यत्कर्मणो निष्फलत्वं फलितमाह तस्मादिति कर्तव्याकर्तव्यौ धर्माधर्मौ तत्र शास्त्रस्य प्रमाणत्वेपि मम किं कर्तव्यमित्यपेक्षायामाह ज्ञात्वेति स्वक
र्म क्षत्रियस्य युद्धादि इतिशब्दोऽध्यायसमाप्त्यर्थः तदनेनाध्यायेन प्राग्भवीयकर्मवासनानुसारेणाभिव्यज्यमानसात्विकादिप्रकृतित्रयविभागेन दैवा

तस्मादिति तस्मात् शास्त्रं प्रमाणं ज्ञानसाधनं ते तव कार्याकार्यव्यवस्थितौ कर्तव्याकर्तव्यव्यवस्थायामतो ज्ञात्वा बुद्ध्वा शास्त्रविधानोक्तं
विधिर्विधानं शास्त्रमेव विधानं शास्त्रविधानोक्तं कुर्यात्तन्न कुर्यादित्येवं लक्षणं ज्ञेनोक्तं स्वकर्म यत्तत्कर्तुमिहार्हसि इहेति कर्माधिका

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि २४ इति श्रीभगवद्गीता
सूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे देवासुरसंपद्योगो नाम षोडशोऽध्यायः समाप्तः

धिकारभूमिप्रदर्शनार्थमिति २४ इति श्रीभगवद्गीताभाष्ये शंकरभगवतः कृतौ षोडशोऽध्यायः समाप्तः ॥ ॥ ॥

सुरीसंपद्द्वयमाहात्म्येनाभ्यामुपदिश्य कामक्रोधलोभानपहाय पुरुषार्थिना शास्त्रप्रमाणेन तदुक्तकारिणा भवितव्यमिति निर्द्धारितं २४ इति श्री
मत्परमहंसपरिव्राजकाचार्यस्य श्रीशुद्धानंदपूज्यपादशिष्यभगवदानंदज्ञानविरचितायां गीताभाष्यटीकायां षोडशोऽध्यायः समाप्तः
१६

204

न केवलं श्रेयः समाचरन्नासुरीं संपदं तु जह्यान्मोक्षमेव सम्यग्धीद्वारा लभते किंतु लौकिकमपि सुखमित्यपेरर्थः २२ आसुर्याः संपदो वर्जने श्रेयः सम्यक्करणे किं
कारणं तदाह सर्वस्येति तस्य कारणत्वं साधयति शास्त्रेति उक्तमुपजीव्यानंतरश्लोकं प्रवर्तयति आतरति शिष्यते अनुशिष्यते बोध्यते तेनापूर्वार्थ
एतैरिति एतैर्विमुक्तः कौंतेय तमोद्वारैस्तमसो नरकस्य दुःखमोहात्मकस्य द्वाराणि कामादयस्तैरेतैस्त्रिभिर्विमुक्तो नर आचरत्यनुतिष्ठति किमा
त्मनः श्रेयो यत्प्रतिबद्धः पूर्वं नाचरति तदपगमादाचरति ततस्तदाचरणात्पापानि परांगति मोक्षमपि एति २२ सर्वस्यैतस्यासुरीसंपत्परि
वर्जनेन श्रेयआचरणस्य च शास्त्रं कारणं शास्त्रप्रमाणं दुर्भयं शंक्यं कर्तुं नान्यथा अतः यः शास्त्रेति यः शास्त्रविधिं शास्त्रं वेदस्तत्स्वविधिं कर्त्त

एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः आचरत्यात्मनः श्रेयस्ततो याति परांगति २२ यः शास्त्रविधिमुत्सृज्य
वर्तते कामकारतः न स सिद्धिमवाप्नोति न सुखं न परांगति २३ श्रीरामचंद्रायनमः

व्याकर्तव्यं ज्ञानकारणं विधिप्रतिषेधात्ममुत्सृज्य त्यक्त्वा वर्तते कामकारतः कामप्रयुक्तः सन् न स सिद्धिं पुरुषार्थयोग्यतामवाप्नोति ना
स्मिन्लोके सुखं नापि परां प्रकृष्टां गतिं स्वर्गं मोक्षं वा २३ ॥ ॥ ७

इति शास्त्रं तच्च विधिनिषेधात्मकमित्युपेत्य व्याचष्टे कामेति कामस्य कारणं कामकारः तस्माद्धेतोरित्युपेत्य कामाधीनां शास्त्रविमुखप्रवृत्तिं निरस्यति
कामेति ॥ कामाधीनप्रवृत्तेः सहपर्यायो योग्यत्वं तेषु रत्या योगितिसिद्धिरित्याह नापीति २३ ॥ ॥

जीवानां तु तद्भेदः स्थिरिश्चेद्भाजां वृत्तिश्चेत् प्रिस्थानां नाशे रौरवमिश्रा शंका संसारस्यात्यधर्मत्वे निराहृत्य संघातनिरूपणं कर्तुं संघातो निरूपकात्माऽऽह प्रकृति-
श्चेति भोगश्चापवर्गश्चार्थौ तयोरेव कर्तव्यतया पितावृतं नन्वनेन श्लोकेन शरीरं निर्दिश्यात्मस्ये त्यपि वक्तव्या किमिति संघातस्योपनीतमाह इदमिति उ-
क्तेयं भगवद्वचनमवतारयति तदेतदिति तत्र इदं तु लक्षणे सर्वनाम्ना स्वसमानाने निर्दिशति इदमिति अथ प्रसंगाद्विशिष्टं किंचिदिति शरीरं क्षे-
त्रशरीरस्योत्पत्तिर्नोऽस्मत्वे क्षेत्रनाम्नि निरुक्तमाह क्षतेति क्षयो नाशः क्षरणमपक्षयः बीजभूतं फलमिति न हि दृष्टं सा इदं तु क्षेत्रपदात्तु

का

प्रकृतिश्च त्रिगुणात्मिका सर्वकार्यकरणविषयाकारेण परिणता पुरुषस्य भोगापवर्गार्थकर्तव्यतया देहेंद्रियाद्याकारेण संहन्यते सोऽयं सं-
घात इदं शरीरं तदेतत् श्रीभगवा० इदमिति इदमिति सर्वनाम्नोक्तं विशिनष्टि शरीरमिति हे कौंतेय क्षतत्राणात् क्षयात् क्षरणात् क्षेत्रवद्वा २
अस्मिन्कर्मफलनिर्वृत्तेः क्षेत्रमिति इति शब्दः एवंशब्दपदार्थकः क्षेत्रमित्येवमभिधीयते कथ्यते एतत् शरीरं यो वेत्ति विजानाति आपादतलमस्त-

देहे=

श्रीभगवा० इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः १

शरीरं क्षेत्रं यो

कं ज्ञानेन विषयीकरोति स्वाभाविकेनौपदेशिकेन वा वेदनेन विषयीकरोति विभागशस्तं वेदितारं प्राहुः कथयंति क्षेत्रज्ञ इति इति शब्दः
एवंशब्दपदार्थक एव पूर्ववत् क्षेत्रज्ञ इत्येवमाहुः के तद्विदः ते क्षेत्रक्षेत्रज्ञौ ये विदंति ते तद्विदः १

श

पारिभाषितमिति पदे क्षेत्रशब्दविषयमप्याविष्करोति इत्याह इति शब्द इति क्षेत्रमित्येवमनेन क्षेत्रशब्देनास्य संबन्धः इदं देहमुत्तमांगं ज्ञानेनेति तिरोहितं दृष्ट्वाऽऽहा-
न इति स्वाभाविकेनाव्यामोहमिति ज्ञाने औपदेशिके देहानात्मा इत्यपत्वादिति विभागशः स्वतोऽतिरिक्तत्वेनेत्यर्थः क्षेत्रमित्येवेति शब्दवदस्यापीति
शब्दस्य क्षेत्रज्ञशब्दविषयत्वमाह इतीति क्षेत्रज्ञ इत्येवं क्षेत्रज्ञत्वेन तं प्राहुरिति संबंधः प्रकृतं प्रश्नपूर्वकमाह केत्यादिना १

हे

श्रीगणेशायनमः ॐ प्रथममध्यमयोः षट्कयोस्तत्वंपदार्थावुक्तौ अंतिमस्तु षट्को वाक्यार्थनिष्ठः सम्यग्धीप्रधानो ऽधुनारभ्यते तत्र शेषाध्यायमंतिमं षडध्यायमारभ्य पिण्ड्यवहितं वृत्तं कीर्तयति सप्तम इति प्रकृतिद्वयमस्यानंतं अवारयति ईश्वरस्येति भूमिरित्यादिनोक्तां सत्वादिरूपां प्रकृतिरपरेत्यत्र हेतुमाह संसारेति हेतुत्वान्नामित्यादिनोक्तां प्रकृतिमनुक्रामति परा चेति परत्वे हेतुस्तत्वपरं ईश्वरात्मिकेति किमर्थमीश्वरस्य प्रकृतीद्वयमित्याशंक्य कारणत्वाय याभ्यामित्याह

गुणादि =

सप्तमे ऽध्याये सूचिते द्वे प्रकृती ईश्वरस्य त्रिगुणात्मिका अष्टधा भिन्ना ऽपरा संसारहेतुत्वात् परा चान्या जीवभूता क्षेत्रज्ञलक्षणा ईश्वरात्मिका याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिस्थितिलयहेतुत्वं प्रतिपद्यते तत्र क्षेत्रक्षेत्रज्ञलक्षणप्रकृतीद्वयनिरूपणद्वारेण तद्वत ईश्वरस्य तत्वनिर्धारणार्थं क्षेत्राध्याय आरभ्यते अतीतानंतराध्याये च अद्वेष्टा सर्वभूतानामित्यादिना यावदध्यायपरिसमाप्तिस्तावत्तत्वज्ञानिनां संन्यासिनां निष्ठा यथा वर्तंते इत्येतदुक्तं केन पुनस्ते तत्वज्ञानेन युक्ताः यथोक्तधर्माचरणात् भगवतः प्रिया भवंतीत्येवमर्थश्चायमध्याय आरभ्यते ०

याभ्यामिति वृत्तमनूद्य वक्ष्यमाणाध्यायारंभप्रकारमाह तत्रेति व्यवहितेन संबंधमुक्त्वा ऽव्यवहितेन तं विवक्षुरव्यवहितमनुवदति अतीतेति निष्ठोक्तेरितिसंबंधः निष्ठामेवाचष्टे यथेति वर्तंते धर्मज्ञानमनुतिष्ठंति तथापदर्शितेन प्रकारेण सर्वमुक्तमिति योजना अव्यवहितमेवमनूद्य तेनोत्तरस्य संबंधं गिरते केनेति तत्वज्ञानोक्तेरुक्तार्थेन संगच्छयार्थप्रकारः ०

टी० भा० २

अथ चन्द्रमोक्षाभिवाञ्छितीति निश्चितेनैतस्य संसारित्वे या शंका द्वितीयं हेत्वप्रतिरेकेणेति जीवेश्वरयोरभेदेऽपि तदापि तत्त्वोऽन्यसंसारिभावात्तस्य च संसार निषेधे संसारेऽज्ञानात्तत्त्वं गच्छेत् तयोर्मध्ये पूर्वं गृहस्थेष्टत्वं निराचष्टे तत्रेति संसाराभावे तयोरन्यः पिप्पलं स्वाद्वत्तीत्यादि द्विविधः शास्त्रस्य तद्धेतु कर्मविषय कर्मकाण्डस्याऽनर्थक्यमीमांसा प्रसक्तेश्च संसारे नरस्य तत्र च श्रुते ज्ञानकाण्डस्य मोक्षहेतु ज्ञानार्थस्यानर्थक्यमतो न प्रसंगो यावदिष्टं तेन च संसार भावप्रसंगस्यानिष्टत्वे हेतुं तमाह प्रत्यक्षादीति तत्र प्रत्यक्षविरोधं प्रकटयति प्रत्यक्षेणेति अहमादिशब्दोपात्तमनुमानविरोधमाह जगदिति विभक्ते

ईश्वरव्यतिरेकेणान्यो संसारिणोऽन्यस्याभावात्संसाराभावप्रसंगात्तयोरुभयमनिष्टं बन्धमोक्षहेतुशास्त्रानर्थक्यप्रसंगात् प्रत्यक्षादिप्रमाणविरोधाच्च प्रत्यक्षेण तावत्सुखदुःखतद्धेतुलक्षणः संसार उपलभ्यते जगद्वैचित्र्योपलब्धेश्च धर्माधर्मनिमित्तः संसारोऽनुमीयते सर्वमेतदनुपपन्नमात्मेश्वरैकत्वे न ज्ञानाज्ञानयोरन्यत्वोपपत्तेः दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता नेनतया च तयोर्विद्याविद्याविषययोः फलभेदोऽपि विरुद्धो निर्दिष्टः श्रेयश्च प्रेयश्चेति विद्याविषयः श्रेयः प्रेयस्त्वविद्याकार्यमिति तथा च व्यासः द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः इह द्वे वेह विद्ये इत्याद्यविद्यायाश्च सह कार्येण विद्यया हानं तत्र विहितं श्रुतिस्मृतिन्यायेभ्योऽवगम्यते ०

विचित्रहेतुकं विचित्रकार्यत्वान्मत्रासादादिवदित्यर्थः प्रत्यक्षानुमानागमविरोधाद्युक्तमेकमिवस्य संसारित्वमित्यनेकेऽपि संसारित्वमविद्यातो विद्यातो संसारित्वमिति विभागानुपपत्तिरित्युक्तमाशंक्य दूरमिति स्वरूपतो विरोधवत्फलतोऽपि सोऽस्तीत्याह तयेति फलभेदोक्तिमेवव्याचष्टे विद्येति तयोर्हि धीविलक्षणत्वे वेदव्यासस्यापि संमतिमाह तथाचेति उक्तेऽर्थे भगवतोऽपि संमतिमुदाहरति इहेति द्वयोरपि निष्ठयोस्तुल्यत्वमुपादेयत्वमिति शंकां शातयति अविद्याया इति ०

२७०

एक० २

दृश्यानां दुःखादीनां भेदकानां पापादेर्हि भाविनामनात्मधर्मत्वनिष्ठोपेक्षादेहात्मसु स्कांख्यानामिव तावन्मात्रेण मुक्तिर्न च तत्प्रेप्सितः सर्वदेहेष्वेको ऽसि एवं कस्ये
न परमार्थेनाभेदो ऽसौ कस्य तन्मनूद्य प्रश्नद्वारा दर्शयति राव मित्यादिना यथोक्तलक्षणो दृश्यादेहान्निरूढं दृष्टा मितये चापीति निपातौ जीवस्य सत्त्वज्ञानस्य
देहादन्यत्वज्ञानेन समुच्चयापायो भिन्नकर्मोन क्षेत्रज्ञं मा एवं दृश्यादन्यो देवी विधि किं नु मां चापि विद्धीति तं वक्ष्यते यः सर्वक्षेत्रेष्वेकः क्षेत्रज्ञः तं मामेव विद्धीति संबंधस्तत्र च
एवं तत्र क्षेत्रज्ञ तावुक्तौ किमेतावन्मात्रेण तावनेन तावता तत्र क्षेत्रज्ञमिति क्षेत्रज्ञं यथोक्तलक्षणं चापि मां परमेश्वरमसंसारिणं विद्धि जानीहि यो ऽसौ
सर्वक्षेत्रेष्वेकः क्षेत्रज्ञो ब्रह्मादिस्तंबपर्यंतानेकक्षेत्रोपाधिप्रविभक्तस्तं निरस्तसर्वोपाधिभेदं सदसदादिशब्दप्रत्ययागोचरं विद्धीत्यभिप्रायः हे भारत यस्मात् क्षेत्र - क्षेत्र

ज्ञ

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम गी

क्षेत्रज्ञयाथात्म्यव्यतिरेकेण न ज्ञानगोचरमन्यदवशिष्टमस्ति तस्मात् क्षेत्रक्षेत्रज्ञयोर्ज्ञेयभूतयोर्यज्ज्ञानं क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विषयीक्रियेते
म तज्ज्ञानं सम्यग्ज्ञानमिति मतमभिप्रेतं मम परमेश्वरस्य विष्णोः ननु सर्वक्षेत्रेष्वेक एवेश्वरो नान्यस्तद्व्यतिरिक्तो भोक्ता विद्यते चेत्ततश्चेश्वर
स्य संसारित्वं प्राप्तं २॥

गो ति सर्वेति तन्नहि अविद्योपाधिकभेदभाजः ननु ईश्वरोऽनौच्चस्य कर्मसंसारिणो नवृत्तत्वाद्धीरित्याशंक्याह यस्मादिति ज्ञानं च हि भजते यथा दर्शितं तेश्चवि
शिनष्टि क्षेत्रेति नन्वेवं भेदविनिवृत्तास्त्वान्मिसम्यग्ज्ञानेन निवृत्तिः क्षेत्रज्ञस्य विवेकज्ञानस्य बाध्यबाधकत्वेनात्मानो ह्यात्मोक्षोपपत्तिरेव तेन सम्यक्त्वं ति छि रितिभावः जी
वेश्वरयोरेकत्वमुक्तमाशिंधति नन्विति जीवेश्वरयोरेकत्वे जीवस्येश्वरेणस्य जीवेर्वातरजीवो नाशो जीवस्य परस्मादन्यस्याभावे संसारस्यानिरालंब
नत्वाद्युपपत्तिमाप्त्यासे वनशाश्वत पूर्णांगादिस्यर्थः ७

विद्याविद्याविषयेऽस्तीत्युदाहरति स्मृतयश्चेति तत्राविद्याविषयं वाक्यमाह अज्ञानेनेति विद्याविषयं वाक्यद्वयं दर्शयति इहैवेत्यादिना विद्याफलमनर्थध्वस्तिरविद्याफलमनर्थप्राप्तिरित्येतदन्वयव्यतिरेकाभ्यामापादयितुमिष्यतीत्याह न्यायतश्चेति तत्रैव पुराणसंमतिमाह सर्पानिति उदपानमिति अन्नमनिर्वाच्यमविद्यमाने कूपं यथात्मज्ञाने विशिष्टं फलं स्यात्तथा पश्येति योजना न्यायतश्चेत्यन्वयव्यतिरेकाभ्यां न्यायमुक्तं विवृणोति तथा चेति तत्रादावन्वयमाचष्टे देहादिष्विति अनाद्यनिर्वाच्याविद्यादृष्टिहात्मा देहादावनात्मन्यात्मबुद्धिमादधाति तत्कृतो रागादिना प्रेर्यते तेन तत्फलकामः कर्मानुतिष्ठति तत्कृतौ च यथाकर्म नूतनं देहमादत्ते पुरातनं त्यजतीत्येवमविद्यावतः संसारित्वं सिद्धमित्यर्थः व्यतिरेकमिदानीं दर्शयति देहादीति श्रुतियुक्तिभ्यां

स्मृतयश्च अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः समं पश्यन् हि सर्वत्र इत्याद्याः न्यायतश्च सर्पान् कुशाग्राणि तथोदपानं ज्ञात्वा मनुष्याः परिवर्जयन्ति अज्ञानतस्तत्र पतन्ति केचिज्ज्ञाने फलं पश्य यथा विशिष्टं तथा च देहादिष्वात्मबुद्धिरविद्वान् रागद्वेषादिप्रयुक्तो धर्माधर्मानुष्ठानकृज्जायते म्रियते चेत्यवगम्यते देहादिव्यतिरिक्तात्मदर्शिनो रागद्वेषादिप्रहाणापेक्षधर्माधर्मप्रवृत्त्युपशमान्मुच्यन्त इति न केनचित्प्रत्याख्यातुं शक्यं न्यायतः तत्रैवं सति क्षेत्रज्ञस्येश्वरस्यैव सतोऽविद्याकृतोपाधिभेदतः संसारित्वमिव भवति प

भेदे ज्ञाते रागादिध्वस्त्या कर्मोपरमाद्दोषसंसारासिद्धिरित्यविद्याराहित्ये बन्धध्वस्तिरित्यर्थः उ १ यादेहाद्यात्मत्वमात्मनः॥ क्तान्वयादेरन्यथासिद्धिं शिथिलयति इति नेति उक्तमन्वयादिवादिना केनचिदपि न्यायतो न शक्यं प्रत्याख्यातुं तदन्यथासिद्धिसाधकाभावादित्यर्थः अन्वयादेरनन्यथासिद्धत्वे चोद्यमपि प्राचीनं प्रतिनीतमित्याह तत्रेति ज्ञानाज्ञानयोरुक्तन्यायेन स्वरूपभेदे कार्यभेदे च स्वारस्येन परापरयोरैक्येऽपि बुद्ध्याद्युपाधिभेदादाविद्यकमात्मनः संसारित्वमाभासरूपं प्रातिभासिकं सिध्यतीत्यर्थः आत्मनो ब्रह्मता स्वतश्चेदहमित्यात्मभाने ब्रह्मतापि भायादित्याशङ्क्याह यथेति देहाद्यतिरिक्तस्यात्मनो वैदिकपक्षे स्वतस्त्वेऽपि तस्मिन्नहमिति भात्येव तदतिरिक्तत्वेन भाति किं त्वविद्यातो देहाद्यात्मत्वमेव विपरीतं भासत्तेन

ध्यात्मनो ब्रह्मत्वे स्वाभाविकेऽपि तस्मिन् ब्रह्मत्वेनाभानस्य विद्यातोः
ब्रह्मत्वमेवत्वस्य भातीत्यर्थः॥

211

हो

१-अन्यथा:

राम॰
३

अविद्यासत्कार्याहातखेत्यत्रश्रुतीरुदाहरति ऋतपत्वाविदिति इहेति जीवदवस्थायांचेच्छब्दोविद्योदयेदोलभ्यद्योती अवेदी दहवद्धेतिविदितवानित्यर्थः अथविद्यानंतरमेवसत्यमवितथंपुनरावृत्तिवर्जितंकैवल्यंस्यादित्याह अथेति अविद्याविषयेपि श्रुतिमाह नचेदिति जन्ममरणादिरूपासंसृतिर्विनष्टिः तस्यामहत्वंसम्यग्ज्ञानंविनानिवर्त्तयितुमशक्यत्वं विद्याविषयेश्रु त्यंतरमाह तमेवमिति परमात्मानंप्रत्यक्त्वेनयःसाक्षात्कृतवान्सएवेहजीवन्नेवमुक्तोभवतीत्यर्थः विद्यांविनापिहेत्वंत रतोमुक्तिमाशंक्याह नेति भयहेतुमविद्यांनिराकुर्वतीतज्जंभयमपिनिरस्यति विद्यतेइति अत्रवाक्यांतरमाह विद्वानिति अविद्याविषयेवाक्यांतरमाह अविदुषइति प्रतीच्येकरसेत्वल्पमपि[illegible]भेदंमन्यमानस्यभेददर्शनेनांतरमेवसंसारध्रौव्य

ऋतपत्वाविदिहचेदवेदीदथसत्यमस्तिनचेदिहावेदीन्महतीविनष्टिस्तमेवंविद्वानमृतइहभवतिनान्यःपंथा विद्यतेनायविद्वान्नबिभेतिकुतश्चनअविदुषस्त्वथतस्यभयंभवत्यविद्यायामंतरेवर्त्तमानोब्रह्मवेदब्रह्मैवभ वति अन्योसावन्योहमस्मीतिनसवेदयथापशुरेवंसदेवानामविद्यःसदेदंसर्वंभवतियदाचर्मवदित्याद्याः

मित्यर्थः तत्रैवश्रुत्यंतरमाह अविद्यायामिति तन्मध्येतत्परवशतयास्थिताःस्वत्वमजानंतो ॥ सहत्वदः ॥ देहाद्यभिमानवंतोमूढाः संसरंतीत्यर्थः विद्याविषयेश्रुत्यंतरमाह ब्रह्मेति अविद्याविषयेश्रुत्यंतरमाह अन्योसा विति भेददृष्टिमनूद्यतन्निदानमविद्यैत्याह नेति सचमनुष्याणांपशुवद्देवादीनांप्रेष्यतांप्राप्नोतीत्याह यथेति विषयेवाक्यांतरमाह आत्मवदिति इदंसर्वंप्रत्यग्भूतंपरंब्रह्मेत्यर्थः ज्ञानादेवतुकैवल्यमित्यत्रश्रुत्यंतरमाह यदेति नखल्वाकाशंचर्मवन्मानवोवेष्टयितुमीष्टेतथापरमात्मानंप्रत्यक्त्वेनाननुभूयनमुच्यतइत्यर्थः आदित देनानुक्ताविद्याविद्याफलभेदाःश्रुत्यंतरोक्ताः नाक्षिप्यंतेनप्राप्नोमारापंस्तुवयति सहत्वद

दिनकृ =

त्म

दिन

ईं

सुखित्वादिरात्मधर्मो नेति पक्षेऽपि नास्ति विरोधहेतुरित्याशंक्याह नेति तदेवानुमानं स्फारयति अविद्येति विमतं नात्मधर्मः आगमापायित्वात्संसारवदित्यनुमानान्तरमाह दृश्यत्वादिति आदिशब्दाद्दृश्यत्वजडत्वादि गृह्यते सुखादीनां जरादिवदनात्मधर्मत्वाभावे तस्य वस्तुतोऽसंसारित्वेति फलितमाह तत्रेति आरोपितेनाधिष्ठानस्य वस्तुतोऽस्पर्शे दृष्टान्तमाह यथेति यथाभिन्नस्यात्मनः संसारित्वमध्यस्तमिति स्थिते परस्य संसारित्वापादनं तदपक्रममित्याह एवं चेति आत्मनि संसारस्यारोपितत्वात्तदभिन्ने परस्मिन्नादं कैवं तस्याकर्तृत्येतदुपपादयति नहीति स्थाणोः पुरुषनिश्चयवदात्मनो देहाद्यात्मत्वनिश्चयस्याध्यस्तत्वेनास्पर्शे दृष्टान्तस्य ज्ञेयमात्रविषयत्वादितरस्य ज्ञेयज्ञातृविषयत्वादित्यक्रममनुवदति यत्त्विति वैषम्यं दूषयति तदसदिति तर्हि केन सममिति पृछा।

क्षेत्रस्य धर्माः सुखदुःखमोहेच्छादयो केचन ज्ञातुरात्मनो भवंति अविद्याध्यारोपिताः जरामरणादयस्तु न भवंतीति विशेषहेतुर्वक्तव्यो न भवतीत्यस्त्यनुमानमविद्याध्यारोपितत्वाज्जरादिवदिति हेयत्वादुपादेयत्वाच्चेत्यादि तत्रैवं सति कर्तृत्वभोक्तृत्वलक्षणः संसारो ज्ञेयस्थो ज्ञातर्यविद्ययाध्यारोपित इति न तेन ज्ञातुः किंचिद्दुष्यति यथा बालैरध्यारोपितेनाकाशस्य तलमलवत्त्वादिना एवं च सति सर्वक्षेत्रेष्वपि सतो भगवतः क्षेत्रज्ञस्येश्वरस्य संसारित्वगंधमात्रमपि नाशंक्यं नहि क्वचिदपि लोकेऽविद्याध्यस्तेन धर्मेण कस्यचिदुपकारोऽपकारो वा दृष्टो यत्तूक्तं न समो दृष्टांत इति तदसत् कथं अविद्याध्यासमात्रं हि दृष्टांतदार्ष्टांतिकयोः साधर्म्यं विवक्षितं तन्न व्यभिचरति यत्तु ज्ञातरि व्यभिचरतीति मन्यसे तस्याप्यनैकांतिकत्वं दर्शितं जरादिभिरविद्यावत्वात् क्षेत्रज्ञस्य संसारित्वमिति चेन्न॥

ति कथमिति अभीष्टसाधर्म्यं दर्शयति अविद्येति तस्योभयत्रानुगतिमाह तन्नेति ज्ञेयांतरे ज्ञेयस्यारोपनियमात्तु ज्ञातरि नारोपः स्यादित्याशंक्याह यत्त्विति नायं नियमो ज्ञातरि जराद्यारोपस्योक्तत्वादित्याह तस्यापीति ज्ञेयस्यैव ज्ञेयांतरेऽध्यासनियमस्येति यावत् अतो ज्ञातरि नारोपव्यभिचारशंकेत्यर्थः आत्मन्यविद्याध्यासे तत्राविद्यायाः स्वाभाविकत्वात्तदधीनत्वं संसारित्वमपि तथा स्यादिति शंकते अविद्यावत्वादिति काविद्या विपरीतग्रहादिर्वा अनाद्यनिर्वाच्याज्ञानं वा नाद्यो विपरीतग्रहादेस्तमःप्रहितानिर्वाच्याज्ञानकार्यत्वात्तन्निष्ठस्यात्मधर्मत्वायोगादित्याह नेत्यादिना॥

जरा

आत्मनो देहाद्यात्मत्वमाविद्यकं भातीत्यक्रमत्वभयेन स्पष्टयति सर्वेति अतस्मिंस्तद्बुद्धिरविद्याकृतेत्यत्र दृष्टान्तमाह यथेति पुरस्थे
नेवस्तुनि स्थाणौ वाविद्यया पुमानिति निश्चयो जायते तथा देहादावनात्मन्यात्मधीरविद्याजेति निश्चितेत्यर्थः देहात्मनोरैक्यज्ञाने देहधर्म
स्य जरादेरात्मन्यात्मधर्मस्य च चैतन्यादेर्देहे विनिमयः स्यादित्याशंक्याह नेवेति स्थाणौ पुरुषत्वं भ्रान्त्या भातीत्येतावता पुरुषधर्मः शिरः
पाण्यादिर्न स्थाणोर्भवति तद्धर्मो वा वक्रत्वादिर्न पुंसो दृश्यते मिथ्याध्यस्तेनात्मना ह्यस्तु तो धर्मो ऽतिकरादिनिदृष्टान्तमुक्त्वा दार्ष्टा
न्तिकमाह तथेति जरादेरनात्मधर्मत्वेऽपि सुखादेरात्मधर्मत्वमिति केचित्तान्प्रत्याह सदेति कामसंकल्पादिस्तु नैरनात्मधर्मत्व

सर्वं जडत्वं हि प्रसिद्धं देहादिष्वनात्मस्वात्मभावो निश्चितोऽविद्याकृतो यथा स्थाणौ पुरुषनिश्चयो नैवेतावता पुरुष
धर्मः स्थाणोर्भवति स्थाणुधर्मो वा पुरुषस्य तथा न चैतन्यधर्मो देहस्य देहधर्मो वा चैतन्यस्य सुखदुःखमोहा
त्मकत्वादिरात्मनो न युक्तोऽविद्याकृतत्वाविशेषाज्जरामरणवन्न तुल्यत्वादिति चेत् स्थाणुपुरुषौ ज्ञेयावेव स
न्तौ ज्ञात्रान्योन्यस्मिन्नध्यस्तावविद्यया देहात्मनोस्तु ज्ञेयज्ञात्रोरेवेतरेतराध्यास इति न समो दृष्टान्तोऽतो देहध
र्मो ज्ञेयोऽपि ज्ञातुरात्मनो भवतीति चेन्नाचैतन्यादिप्रसंगाद्यदि हि ज्ञेयस्य देहादेः॥ ॥

त्वानादित्यर्थः किंच विमतो नात्मधर्मोऽविद्याकृतत्वाज्जरादिवन्न चेहेत्वसिद्धिरतस्मिंस्तद्बुद्धिविषयत्वेन स्थाणौ पुरुषत्वव
दविद्याकृतत्वस्योक्तत्वादिति मत्वाह अविद्येति स्थाणौ पुरुषत्ववदविद्यत्वे देहादेरुक्ते दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यादि
तिशंकते नेति तदेव प्रपंचयति स्थाणुरित्यादिना ज्ञेयस्य ज्ञेयान्तरेऽध्यासाद्द्वयोर्भयोर्ज्ञेयत्वसापेक्षा दृष्टान्तस्य व्याप्याश्र
सस्यापि साम्याद्धानिरित्यर्थः देहात्मवद्धर्मेमत्वाभावे फलितमाह अत इति उपाधिधर्माणां सुखादीनामुपहिते जीवे वक्तव्य
मफल्कमतिप्रसंगादिति परिहरति नेत्यादिनाऽपि प्रसंगमेव प्रकटयति यदीति सुखादीनामात्मधर्मत्वं चेदुपाधिधर्मत्वाद
चैतन्यं जरादिकं चात्मनो दुर्वारं स्यादित्यर्थः॥

नकरणोंचक्षुषीत्यादिनोक्तमेवंपरिहारंप्रपंचयति तन्नेत्यादिना तिमिरादिदोषवत्त्वतोविपरीतग्रहादिक्लंनग्रहीतुरात्मनोस्तीत्यत्रहेतु
माह चक्षुष इति तदुक्तेनांजनादिसंस्कारेणतिमिरादेरपाकृतेदेवदत्तस्यग्रहीतुर्दोषाद्यनुपलंभान्नतस्यधर्मत्वमतोविमतंनतत्त्वतो
नात्मधर्मोदोषत्वात्तत्कार्यत्वाद्वासंमतवदित्यर्थः किंचविपरीतग्रहादितत्त्वतोनात्मधर्मोवेद्यत्वात्संप्रतिपन्नवदित्याह संवेद्यत्वाच्चेति
किंचयद्वेद्यंतत्तस्मातिरिक्तवेद्यंयथादीपादीतिव्याप्तेर्विपरीतग्रहादीनामपिवेद्यत्वादतिरिक्तवेद्यत्वेसंवेदितानसंवेद्यधर्मत्वान्वेदित
त्वाद्यथादेवदत्तोनस्वसंवेद्यरूपादिमानित्यनुमानांतरमाह संवेद्यत्वादेवेति किंचविपरीतग्रहादयस्तत्त्वतोनात्मधर्माव्यभिचारित्वा

तन्नयथाकरणेचक्षुषिविपरीतग्राहकादिदोषस्यदर्शनान्नविपरीतादिग्रहणं तन्निमित्तंवा तैमिरकत्वादिदोषोग्र
हीतुश्चक्षुषःसंस्कारेणतिमिरेऽपनीतेग्रहीतुरदर्शनान्नग्रहीतुर्धर्मोयथातथासर्वत्रैवाग्रहणविपरीतसंशयप्रत्य ग
यास्तन्निमित्ताःकरणस्यैवकस्यचिद्भवितुमर्हन्तिनज्ञातुःक्षेत्रज्ञस्यसंवेद्यत्वाच्चनैतेप्रदीपप्रकाशवन्नज्ञातृधर्म
त्वंसंवेद्यत्वादेवस्वात्मव्यतिरिक्तसंवेद्यत्वंसर्वकरणवियोगेचकैवल्येसर्ववादिभिरविद्यादिदोषवत्त्वानभ्युपगमादा
त्मनोयदिक्षेत्रज्ञस्याग्न्युष्णवत्स्वोधर्मस्ततोनकदाचिदपितेनवियोगःस्यादविक्रियस्यचव्योमवत्सर्वगतस्यामूर्तस्या
सं त्मनःकेनचित्संयोगवियोगानुपपत्तेःसिद्धंक्षेत्रज्ञस्यनित्यमेवेश्वरत्वमनादित्वान्निर्गुणत्वादित्यादीश्वरवचनाच्चनन्वेवं

त्क्षणत्वादिवदित्याह सर्वेति उक्तमेवविवृण्वन्नात्मनोविपरीतग्रहादिः ॥सतिसंसारसंसारित्वाभावेशास्त्रानर्थक्यादिदोषः
स्वाभाविकोवागंतुकोवेतिविकल्प्याद्यंदूषयति आत्मन इति अतोनिर्मोक्षोऽविद्यातज्जध्वस्तेरभावादितिभावः आगंतुकोपिस्व
तश्चेदमुक्तिःपरतश्चेत्तत्राह अविक्रियस्येति विभुत्वादविक्रियत्वादमूर्तत्वाच्चात्माव्योमवन्नकेनचित्संयोगविभागावनुभवति
नहिविक्रियाभावेव्योम्निवस्तुनःसंयोगविभागावसंगत्वाच्चात्मनस्तदसंयोगान्नपरतोपितस्मिन्विपरीतग्रहादीत्यर्थः तस्मा
त्मधर्मत्वाभावेफलितमाह सिद्धमिति आत्मनोनिर्धर्मकत्वेभगवदनुमतिमाह अनादित्वादिति ईश्वरत्वस्यात्मनःसंसारि
त्वेविधिशास्त्रस्याप्रसादेश्चानर्थक्यात्तात्विकमेवतस्यसंसा
रित्वमितिशंकतेनन्विति॥

स्याहेति॥

विद्याति॰

तदेव प्रपंचयति तामसो हीति आवरणात्मकत्वं वस्तुनिः सम्यक्प्रकाशप्रतिबंधकत्वं विपरीतग्रहणादेरविद्याकार्यत्वं विद्यायाह्लेन सायति विवेकेति न च कारणाविद्या नाद्यनिर्वाच्या आत्मधर्मः स्यादिति युक्तमनिर्वाच्यत्वादेव तस्यास्तद्धर्मस्य दुर्वचत्वादिति भावः किं च विपरीतग्रहादेरन्वयव्यतिरेकाभ्यां दोषजन्यत्वावगमादपि नात्मधर्मतेत्याह तामसेचेति तमःशब्देनाज्ञानोत्थवस्तुप्रकाशप्रतिबंधकतिमिरकाचादिदोषस्तस्मिन्नस्त्यज्ञानेमिथ्याधीः संशयश्चेति त्रयस्योपलंभात्सति तस्मिन्नप्रतीतेरन्वयव्यतिरेकाभ्यां विपरीतज्ञानादेर्दोषाधीनत्वाधिगमान्न केवलात्मधर्मतेत्यर्थः दोषस्य निमित्तत्वान्न भावकार्यस्योपादाननियमादनिर्वाच्याविद्या

अविद्यायास्तामसत्वात्तामसो हि प्रत्ययः आवरणात्मकत्वादविद्याविपरीतग्राहकः संशयोपस्थापको वाऽग्रहणात्मको वा विवेकप्रकाशभावे तदभावात्तामसे त्वावरणात्मके तिमिरादिदोषे सत्यग्रहणादेरविद्यात्रयस्योपलब्धेः आहैवं तर्हि ज्ञातृधर्मोऽविद्या न करणे चक्षुषि तैमिरिकत्वादिदोषोपलब्धेर्न तु मन्यसे ज्ञानधर्मोऽविद्या तदेवं चाविद्याधर्मवत्वं क्षेत्रज्ञस्य संसारित्वं तत्र यदुक्तमीश्वर एव क्षेत्रज्ञो न संसारीत्येतदयुक्तमिति॥ ॥

याभ्यासमंते रात्मैव विपर्ययादेरुपादानमिति चोदयति अग्रहेति विपरीतग्रहादेर्दोषोत्थत्वे समर्थः अग्रहादित्रितयमविद्याविपर्ययादेः सत्योपादानत्वे सत्त्वप्रसंगान्नात्मा तदुपादानं किं तु दोषस्य चक्षुरादिधर्मकत्वं ग्रहणादग्रहणादेरपि दोषत्वात्करणधर्मत्वे करणमविद्योत्पत्तेः करणं न चेतनं तु रविद्यासिद्धेरिति वाच्यमज्ञोऽहमित्यनुभवात्तावेच्च परामर्शात्तदवगमात्कार्यलिंगकानुमानादागमाच्चेतनत्वसिद्धेरिति परिहरति नेत्यादिना संगृहीतचोद्यपरिहारयोर्ग्रंथं विवृणोति यत्त्विति अविद्यावत्त्वेऽपि ज्ञातुरसंसारित्वात्तु तर्हि छीरगवदविद्या किं करिष्यतीत्याशंक्याह तदेवेति मिथ्याज्ञानादिवत्त्वमेवात्मनः संसारित्वमिति स्थिते फलितमाह तत्रेति॥ ॥

गु

या

ध्ये॥

गी·भा·१३ द्वितीये पि क्रमभाविन्योरवस्थयोर्निर्निमित्तत्वं सनिमित्तत्वं चेति विकल्प्याद्ये सदाप्रसंगाद्बंधमोक्षयोरव्यवस्था स्यादित्याह क्रमेति क वि
६ ल्पांतरं निरस्यति अन्येति बंधमोक्षावस्थे न परमार्थे अस्वाभाविकत्वात्स्फटिकलौहित्यवदिति स्थिते फलितमाह तथा चेति वस्तुत्व
मिच्छताः वस्थयोरवस्तुत्वोपगमादित्यर्थः इतश्चावस्थयोर्न वस्तुत्वमित्याह किंचेति अवस्थयोर्वस्तुत्वमिच्छता तयोर्यौगपद्यायो
गाद्वा क्रमे बंधस्य पूर्वत्वं मुक्तेश्च पश्चात्त्वमिति स्थिते बंधस्यादित्वकृतं दोषमाह बंधेति तस्याकृताभ्यागमकृतविनाशनिवृत्तयेऽना ष्या
दित्वमेष्टव्यमंतवत्त्वं च मुक्त्यर्थमास्थेयं न च तद्घटादिभावरूपं नित्यं यथात्मेति आदि विरुद्धमित्यर्थः मोक्षस्य च स्वात्मकृतं दोष

214

स्थितिगती इवैकस्मिन्क्रमभावित्वेन निर्निमित्तत्वे निर्मोक्षप्रसंगो निमित्तत्वे च स्वतोऽभावादपरमार्थत्वप्रसंगः तथा च सत्यभ्युपगमहानिः किंच बंधमुक्तावस्थयोः पौर्वापर्यनिरूपणायां बंधावस्था पूर्वं प्रकल्प्य अनादिमत्यंतवती च तच्च प्रमाणविरुद्धं तथा मोक्षावस्थादिमत्यनंतवती च प्रमाणविरुद्धैवाभ्युपगम्यते न चावस्थावतोऽवस्थांतरं गच्छतो नित्यत्वमुपपादयितुं शक्यम् अथानित्यत्वदोषपरिहाराय बंधमुक्तावस्थाभेदो न कल्प्यते अतो द्वैतिनामपि शास्त्रानर्थक्यदोषोऽपरिहार्य एवेति समानत्वान्नाद्वैतवादिना परिहर्तव्यो दोषः न च शास्त्रानर्थक्यं यथाप्रसिद्धाविद्व

शुद्धि माह तथेति सा हि ज्ञानादिसाध्यत्वादादिमती पुनरावृत्त्यनंगीकारादनंता च तच्च यत्सादिभाव॥ त्पुरुषविषयत्वात्शास्त्रस्य॥
रूपं तदंतवद्यथा घटादीति आगमांतरविरुद्धमित्यर्थः किंच क्रमभाविनीभ्यामवस्थाभ्यामात्मा संबध्यते न वा प्रथमे पूर्वावस्थ
या यासहैवोत्तरावस्थां गच्छति चेदुत्तरावस्थायामपि पूर्वावस्थाऽवस्थानादनिर्मोक्षः पूर्वावस्थां त्यक्त्वोत्तरावस्थां गच्छति तदा ॥ राम०
पूर्वसंगोत्तरसंगयोरात्मनः सातिशयत्वान्नित्यत्वानुपपत्तिरित्याह नचेति आत्मनोऽवस्थाद्वयसंबंधो नास्तीति द्वैतोपगमन् ष्टे ६
दूषयति अथेत्यादिना तर्हि पक्षद्वयेऽपि दोषसाम्यान्नाद्वैतमतानुरागे हेतुरित्याशंक्याविद्याविषये चेत्युक्तं विवृणोति ष्ट

विद्यावस्थायामविद्यावस्थायां वा शास्त्रानर्थक्यमिति विकल्प्याद्यं प्रत्याह नसर्वैरिति विदुषो मुक्तस्य संसारतदाधारत्वयोरभावस्य सर्वे वादिसंमतत्वात्तत्र शास्त्रानर्थक्यादिचोद्यमप्येव न प्रतिविधेयमित्यर्थः संग्रहवाक्यं विवृणोति सर्वैरिति अभिप्रायोऽज्ञानात्मकेस्वाभिप्राय माह कथमित्यादिना तर्हि मुक्तान्प्रति विधिशास्त्रस्याप्रामाण्यादेश्चानर्थक्यमित्याशंक्याह नचेति नह्यव्यवहारातीतेषु गुणदोषाशंके त्यर्थः द्वैतिनां मते मुक्तात्मस्विवास्मत्पक्षेपि ईश्वरस्येश्वरत्वे न प्रति च शास्त्राद्यानर्थक्यं विद्यावस्थायामाश्रितमिति फलितमाह न

न सर्वैरभ्युपगमत्वात् सर्वैर्ह्यात्मवादिभिरभ्युपगतो दोषो नैकेन परिहर्तव्यो भवति कथमभ्युपगत इति मुक्तात्मनां संसारसंसारित्वव्यवहाराभावः सर्वैरेवात्मवादिभिरिष्यते नचैतेषां शास्त्रानर्थक्यादिदोषप्राप्तिरभ्युपगता तथा नः क्षेत्रज्ञानामीश्वरैकत्वे सति शास्त्रानर्थक्यं भवतु अविद्याविषये चार्थवत्त्वं यथा द्वैतिनां सर्वेषां बंधावस्थायामेव शास्त्राद्यर्थवत्त्वं न मुक्तावस्थायामेवं न तु आत्मनो बंधमुक्तावस्थे परमार्थत एव वस्तुभूते द्वैतिनां नः सर्वेषामतो हेयोपादेयतत्साधनसद्भावे शास्त्राद्यर्थवत्त्वं स्यात् द्वैतिनां पुनर्द्वैतस्यापरमार्थत्वादविद्याकृतत्वाद्बंधावस्थायामात्मनः परमार्थत्वे निर्विषयत्वात् शास्त्राद्यानर्थक्यमिति चेन्नात्मनोऽवस्थाभेदानुपपत्तेः यदि तावदात्मनो बंधमुक्तावस्थे फग

थेति द्वितीयं दूषयति अविद्येति तदेव दृष्टांतेन विवृणोति यथेति २ ॥ यस्मात्तां क्रमेण वा युगपत्तावद्विरोधान्न संभवतः॥ वमद्वैतिनामपि विद्योदयात्प्रागर्थवत्त्वं शास्त्रादेरिति दोषः द्वैतिभिरद्वैतिनां न साम्यमिति शंकते नन्विति अवस्थयोर्वस्तुत्वेत न्मते शास्त्राद्यर्थवत्त्वे फलितमाह अत इति सिद्धांते तु नावस्थयोर्वस्तुतेति वैषम्यमाह अद्वैतिनामिति व्यावहारिकं द्वैतं तन्मते पि स्वीकृतमित्याशंक्याह अविद्येति कल्पितद्वैतेन व्यवहारान्न तस्य वस्तुतेत्यर्थः बंधावस्थाया वस्तुतत्वाभावे दोषांतरमाह बंधेति आत्मनस्तत्त्वतोऽवस्थाभेदो द्वैतिनामपि नास्तीति परिहरति नेति अनुपपत्तिं दर्शयितुं विकल्पयति यदीति तत्राद्यं दूष पति युगपदिति ॥

प२

स्प

अ

विदुषोपिएवमाविद्यकंसंबंधमपेक्ष्यविधिनिषेधविषयांधियमुक्तामेवव्यक्तीकरोति दृष्टेति नन्वविदुषोमिथ्याभिमानवन्नविदुषःसोस्तुवर्त्ततेतथाचाविद्यासंबंधापेक्षयानयुक्ताविदुषोयथोक्ताधीरितितत्राह यथेति पितापुत्रौभ्रातेत्यादीनांमिथोन्यत्वदृष्टावप्यन्योन्यनियोगार्थस्यनिषेधार्थस्यचधीर्दृष्टापितरमधिकृत्यविधौनिषेधेवातस्यतदनुष्ठानाशक्तौपुत्रस्यतद्विषयाधीर्दृष्टान्यथातःसंप्रतियदाप्रैष्यन्मन्यतेऽथपुत्रमाह त्वंब्रह्मत्वंयज्ञस्त्वंलोकइत्यादि संप्रतिपत्त्याभृत्यादेर्वानुष्ठानस्यपुत्रकार्यताप्रतिपादनात्पुत्रेचाधिकृत्यविधिनिषेधप्रवृत्तौतस्यतदुक्तौपितुस्तत्त्वधीरूपगतातथाभ्रात्रादिष्वपिदृष्टव्यंएवंविदुषोहेतुफलाभ्या

शास्त्रार्थविषयाफलहेतुभ्यामन्यात्मत्वदर्शनेपिसतिइष्टफलहेतोः प्रवर्तितोस्म्यनिष्टफलहेतोश्चनिवर्तितोस्मीतियथापितृपुत्रादिनामितरेतरात्मान्यत्वदर्शनेसत्यप्यन्योन्यनियोगप्रतिषेधार्थप्रतिपत्तिर्व्यतिरिक्तात्मदर्शनप्रतिपत्तेः प्रागेवफलहेत्वोरात्माभिमानस्यसिद्धत्वात्प्रतिपन्ननियोगप्रतिषेधार्थोहिफलहेतुभ्यामात्मनोन्यत्वंप्रतिपद्यतेनपूर्वंतस्माद्विधिप्रतिषेधशास्त्रमविद्वद्विषयमितिसिद्धं॥ ॥

मन्यत्वदर्शनेपिप्राक्कालीनाविद्यकदेहादिसंबंधादविरुद्धाविधिनिषेधार्थाधीरित्यर्थः पुत्रादीनांमिथ्याभिमानान्नियोनियोगधीर्युक्तानतत्त्वदर्शिनस्तुतदभावान्नदेहादिसंबंधाधीनानियोगधीरितिपरिहरति नेत्यादिना किंचसर्वापेक्षायज्ञादिश्रुतेरश्ववदितिसर्वापेक्षाधिकरणेसम्यग्ज्ञानस्यादृष्टसाध्यत्वोक्तेर्विधिनिषेधार्थानुष्ठानंसम्यग्ज्ञानात्पूर्वमितिकुतोविदुषस्तदनुष्ठानमित्याह प्रतिपन्नेति सत्यदृष्टेसम्यग्धीहेतौसति चाशुद्धेस्तदभावादन्वयव्यतिरेकाभ्यांविविदिषावाक्याच्चविधिनिषेधानुष्ठानात्पूर्वंनसम्यग्धीरित्याह नपूर्वमिति विधिनिषेधयोर्विद्वद्विषयत्वायोगेफलितमाह
तस्मादिति॥ त्पर

न्तरेव स्फुटयति अविद्वांसो हीति फलं भोक्तृत्वं हेतुः यद्वा फलं देहविशेषो हेतुरहंकृतयोरनात्मनोर्भोक्ताहं कर्ताहं मनुष्योऽहमित्याद्यात्मदर्शनमधिकारकारणं तेनाविद्वद्विषयं विधिनिषेधशास्त्रमित्यर्थः विद्वांसमपि मनुष्योऽहमित्यादिव्यवहारात्तद्विषयं शास्त्रं किं न स्यादित्याशंक्याह नेति भोक्तृत्वकर्तृत्वाभ्यां ब्राह्मण्यादिमतो देहाद्भिन्नाच्चात्मनोऽन्यत्वं पश्यतो न विधिनिषेधाधिकारित्वमुक्तफलाद्यनात्मात्मीयाभिमानाभावादित्यर्थः आत्मनो देहादेरन्यत्वदर्शिनो न देहाद्यात्मधीरित्येतदुपपादयति न हीति विदुषो न विधिनिषेधाधिकारित्वमुक्तमुपसंहरति तस्मादिति शास्त्रस्याविद्वद्विषयत्वमिव विद्वद्विषयत्वमपि मेतव्यमुभयोरपि शास्त्रप्रवृत्त्यविशेषादित्याशंक्याह न हीति तत्रस्थो यस्मिन्देशे देवदत्तः स्थितस्तत्रैव वर्तमानः स

> अविदुषां हि फलहेत्वोरनात्मनोरात्मदर्शनं न विदुषां विदुषां हि फलहेतुभ्यामात्मनोऽन्यत्वदर्शने सति तयोरहमित्यात्मदर्शनानुपपत्तेः न ह्यत्यन्तमूढ उन्मत्तादिरपि जलाग्न्योः छायाप्रकाशयोर्वा ऐकात्म्यं पश्यति किमुत विवेकी तस्मान्न विधिप्रतिषेधशास्त्रं तावत्फलहेतुभ्यामात्मनोऽन्यत्वदर्शिनो भवति न हि देवदत्त त्वमिदं कुर्विति कस्मिंश्चित्कर्मणि नियुक्ते विष्णुमित्रोऽहं नियुक्त इति तत्रस्थोऽपि नियोगं शृण्वन्नपि प्रतिपद्यते नियोगविषयविवेकाग्रहणात्तूपपद्यते प्रतिपत्तिः तथा फलहेत्वोरपि ननु प्राकृतसंबंधापेक्षया युक्तैव प्रतिपत्तिः॥

न्नित्यर्थः ननु देवदत्ते नियुक्ते विष्णुमित्रोऽपि कदाचिन्नियुक्तोऽस्मीति प्रतिपद्यते तस्मान्नियोगविषयभ्रान्तियोऽज्ञानादात्मनोऽविवेकाग्रहणान्नियोज्यत्वभ्रान्तेरित्याह नियोगेति अविवेकिनो नियोज्यधीर्भवतीति दृष्टांततुल्यात्फलहेतौ चात्मदृष्टिविशिष्टस्याविदुषः संभवत्येव विधिनिषेधाधिकारित्वमेवेत्याशंक्याह तथेति विधिनिषेधशास्त्रमविद्वद्विषयमिति वदता शास्त्रानर्थक्यं समाहितं संप्रति शास्त्रस्याविद्वद्विषयत्वेनैवार्थवत्त्वं शास्त्रसमर्थनमिति शंकते नन्विति प्रकृतिरविद्या तज्जातो यो देहाद्यभिमानात्मा संबंधो विद्योदयात्प्रागनुभूतस्तद्रूपेणापि विधिना प्रवर्तितो निषेधेन निवर्तितोऽस्मीति विधिनिषेधविषयासत्त्वादपि विधिशास्त्रार्थधीर्युक्तैवेत्यर्थः॥

गी॰भा॰१३
८

विधांतरेण शास्त्रस्यानर्थक्यं चोदयति विवेकिनामिति दृष्टा हि तेषां विधिनिषेधयोरप्रवृत्तिर्नहि देहादिभ्यो निष्कृष्टमात्मानं दृष्टवतां तयोरधिकारस्तेन तान्प्रति शास्त्रमनर्थवन्न च देहाद्यात्मत्वदृशस्तत्राधिक्रियंते तेषां यद्यदाचरतीति न्यायेन विवेकिनोनुगच्छंतां किंद्वाराव प्रवृत्तेरतोधिकार्यभावाद्विध्यादिशास्त्रस्य तदनुसारिशिष्टाचारस्य चानर्थक्यमित्यर्थः किं सर्वेषां विवेकित्वादधिकार्यभावादानर्थक्यं शास्त्रस्योच्यते किं वा कस्यचिदेव विवेकित्वेपि तदनुवर्तित्वादन्येषामप्रवृत्तेरानर्थक्यं चोद्यते तत्र प्रथमं प्रत्याह नकस्यचिदिति मनुष्याणां सहस्रेष्विति न्यायेनोक्तमेव स्फुटयति अनेकेष्विति तत्रानुभवानुरोधेन दृष्टांतमाह यथेति द्वितीयं दूषयति न चे

विवेकिनामप्रवृत्तिदर्शनात्तदनुगामिनामप्रवृत्तौ शास्त्रानर्थक्यमिति चेन्न कस्यचिदेव विवेकोपपत्तेरनेकेषु हि प्राणिषु कश्चिदेव विवेकी स्याद्यथेदानीं न च विवेकिनमनुवर्तंते मूढा रागादिदोषतंत्रत्वात्प्रवृत्तेरभिचरणादौ च प्रवृत्तिदर्शनात्स्वाभाव्याच्च प्रवृत्तेः स्वभावस्तु प्रवर्तत इति ह्युक्तं तस्मादविद्यामात्रे संसारो यथादृष्टविषय एव ॥

226

ति किंच विवेकिनामप्रवृत्तावन्येषामप्यप्रवृत्तिरित्याशंक्य नियतं श्येनादौ तदप्रवृत्तावपीतरप्रवृत्तेरित्याह अभिचरणादौ चेति अविवेकिनां रागादिद्वारा प्रवृत्त्यास्पदं सर्वं संग्रहीतुमादिपदं इतश्चाविवेकिनां प्रवृत्त्यभावेपि नाज्ञस्याप्रवृत्तिरित्याह स्वाभाव्याच्चेति प्रवृत्तेः स्वभावाख्याज्ञानकार्यत्वे भगवद्वाक्यमनुकूलयति स्वभावस्त्विति प्रवृत्तेरज्ञानजत्वे विधिनिषेधाधीनप्रवृत्तिनिवृत्त्यात्मकबंधस्याविद्यामात्रत्वादविद्वद्विषयत्वं शास्त्रस्य सिद्धमिति फलितमाह तस्मादिति दृष्टमेवानुसरन्नविद्वान्यथादृष्टस्तद्विषयस्तदाश्रयः संसारस्तथा च प्रवृत्तिनिवृत्त्यात्मकसंसारस्याविद्वद्विषयत्वात्तद्धेतुविधिशास्त्रस्यापि तद्विषयत्वमित्यर्थः ॥

न

राम॰
८

समाधानाभ्यां

शास्त्रस्याविरुद्धविषयत्वेनोक्तमर्थं बलमाक्षेपसमाधिभ्यां प्रपंचयितुमाक्षिपति नन्विति चकारादूर्ध्वमप्रवृत्तिरिति संबध्यते आत्मनो देहाद्यतिरेकं प्रपद्यतां देहाद्यभिमानरूपाधिकारहेत्वभावाद्विहिते यागादावप्रवृत्तिर्निषेधाच्चाभक्ष्यभक्षणादेर्न निवृत्तिरतस्तेषां प्रवृत्तिनिवृत्त्योरभावे देहाद्यात्मत्वमनुभवतामपि तत्पक्षे तेषां पारलौकिकभोक्तृप्रतिपत्त्यभावादित्यर्थः विदुषामविदुषां च प्रवृत्तिनिवृत्त्यभावे फलितमाह अतइति आत्मनो देहाद्यतिरिक्तं परोक्षमपरोक्षं च देहाद्यात्मत्वं प्रपद्यतः शास्त्रानुरोधादेव प्रवृत्तिनिवृत्त्युपपत्तेर्न शास्त्रानर्थक्यमित्युत्तरमाह नेत्यादिना प्रसिद्धं तत्र शास्त्री

ननु स्वर्गकामो यजेत कलंजं न भक्षयेदित्यादावात्मव्यतिरेकदर्शिनामप्रवृत्तौ केवलदेहाद्यात्मदृष्टीनां चातः कर्तुरभावाच्छास्त्रानर्थक्यमिति चेन्न यथाप्रसिद्धित एव प्रवृत्तिनिवृत्त्युपपत्तेः ईश्वरक्षेत्रज्ञैकत्वदर्शी ब्रह्मवित्तावन्न प्रवर्तते तथा नैरात्म्यवाद्यपि नास्ति परलोक इति न प्रवर्तते यथाप्रसिद्धस्तु विधिप्रतिषेधश्रवणान्यथानुपपत्त्यानुमितात्मास्तित्व आत्मविशेषानभिज्ञः कर्मफलसंजाततृष्णः श्रद्दधानतया च प्रवर्तत इति सर्वेषां

पाभिमता एतद्देवविन्न एव न ब्रह्मविदो वा नैरात्म्यवादिनो वा परोक्षज्ञानवतो वा प्र ॥नः प्रत्यक्षमतो न शास्त्रानर्थक्यं॥

प्रवर्त्ते

वृत्तिनिवृत्ती विवक्ष्यसीति विकल्प्याद्यं दूषयति ईश्वरेति नैनिवर्तते चेत्यपि द्रष्टव्यं द्वितीयं निरस्यति तथेति पूर्ववदत्रापि संबंधः तृतीयमंगीकरोति यथेति विधिनिषेधाधीनां प्रसिद्धिमनुरुन्धानः सन्निति यावत् चकारान्निवर्तते चेत्यनुकृष्यते ब्रह्मविदं नैरात्म्यवादिनं च त्यक्त्वा देहाद्यतिरिक्तमात्मानं परोक्षमपरोक्षं च देहाद्यात्मत्वं प्रपद्यतो विधिनिषेधाधिकारित्वे सिद्धे फलमाह अतइति॥

तृतीयमुत्थापयति इदं चेति सिद्धांतादविशेषमाशंक्य क्षेत्रस्य क्षेत्रज्ञानं वस्तुतो भिन्नत्वेन तद्विषयत्वांगीकारान्नैवमित्याह क्षेत्रं चेति अहंधीविषयस्यात्मनो वस्तुतः संसारित्वस्वीकाराच्च सिद्धांताभेदोस्तीत्याह अहं त्विति संसारित्वमेव स्फोरयति सुखीति संसारस्य वस्तुत्वे तदनिवृत्त्यापुमर्थासिद्धिरित्याशंक्याह संसारेति कथं तदुपरमस्य हेतुं विना कर्तव्यत्वमित्याशंक्याह क्षेत्रेति क्षेत्रज्ञात्वत्तो निकृष्टस्य क्षेत्रज्ञस्य ज्ञानेन कथं संसारोपरतिमुत्पादयेदित्याशंक्याह ध्यानेनेति संसारित्वमात्मनो बुध्यमानस्य तद्धितादीश्वरादन्यत्वमिति वक्तुमितिशब्दः तदेवान्यत्वमुपपादयति यश्चेति ममसंसारिणः संसारीश्वरत्वं कर्तव्यमित्येवं यो बुध्यते यो वा तथाविधं ज्ञानेन तव कर्तव्यमित्युपदिशति सक्षेत्रज्ञादीश्वरादन्यो ज्ञेयोन्यथोपदेशानर्थक्यादित्यर्थः आत्मा संसारी परस्मा

इदं चान्यत्पांडित्यं कस्यचिदस्तु क्षेत्रज्ञ ईश्वर एव क्षेत्रं चान्यत्क्षेत्रज्ञस्य विषयः अहं तु संसारी सुखी दुःखी च मूढो जातो मृतो विफलः क्षीणो बद्धोऽहं ममैवेत्येवमादयः सर्वे आत्मनि अध्यारोप्य तेषां संसारोपरमश्च मम कर्तव्यः क्षेत्रक्षेत्रज्ञविज्ञानेन ध्यानेन चेश्वरं क्षेत्रज्ञं साक्षात्कृत्वा तत्स्वरूपावस्थानेनेति यश्चैवं बुध्यते यश्च बोधयति नासौ क्षेत्रज्ञ इत्येवं मन्वानो यः स पंडितापसदः संसारमोक्षयोः शास्त्रस्य चार्थवत्त्वं करोमीत्यात्महा॥ ॥

दात्मनोन्यस्तस्य ध्यानाधीनज्ञानेनेश्वरत्वं कर्तव्यमित्येन तज्ज्ञानं पांडित्यमिति मतं दूषयति एवमिति अयमात्मा ब्रह्मेत्यात्मनो ब्रह्मत्वश्रुतिविरोधादित्यर्थः ननु संसारस्य वस्तुत्वांगीकारात्तत्प्रतीत्यवस्थायां कर्मकांडस्यार्थवत्त्वं संसारित्वनिरासेनात्मनो ब्रह्मत्वे ध्यानादिना साधिते मोक्षावस्थायां ज्ञानकांडस्यार्थवत्त्वं तत्कथं यथोक्तज्ञानवान् पंडितापसदत्वेनाक्षिप्यते तत्राह संसारेति करोमीति मन्यमानो यः स पंडितापसद इति एवैशासंबंधः कर्मकांडे हि कल्पितं संसारित्वमधिकृत्य साध्यसाधनसंबंधबोधपदर्थवदिष्टं ज्ञानकांडमपि तथाविधसंसारित्वं पराकृत्याखंडैकरसे प्रत्यग्ब्रह्मणि पर्यवस्यदर्थवद्भवेदित्यर्थः किंचात्मनः शास्त्रसिद्धं ब्रह्मत्वं त्यक्त्वाब्रह्मत्वं कल्पयन्नात्महा भूत्वा लोकद्वयबहिर्भूतः स्यादित्याह आत्महेति॥

क्षेत्रज्ञं क्षेत्रज्ञस्य

नन्वविद्या क्षेत्रज्ञमाश्रयंती स्वकार्यं संसारमपि तस्मिन्नाधत्ते तेनास्यैव शास्त्राधिकारित्वं नेत्याह नेति अविद्यादेः शुद्धे क्षेत्रज्ञे वस्तुतोऽसंबंधेपि तस्मिन्नारोपितं तमेव दुःखीकरोतीत्यत्राह नचेति तदेव दृष्टान्तेन दर्शयति नहीति क्षेत्रज्ञस्य वस्तुनोऽविद्याऽसंबंधे भगवद्वचोपि द्योतकमित्याह अत इति क्षेत्रज्ञेश्वरयोरैक्ये किमित्यसावात्मानमहमिति बुध्यमानोपि स्वस्येश्वरत्वमीश्वरोस्मीति न बुध्यते तत्राह अज्ञानेनेति आत्मनो वस्तुतः संसारासंस्पर्शे विद्वदनुभवविरोधः स्यादिति चोदयति अथेति एवमित्यभिजात्यादिवैशिष्ट्यमुक्तं इदमा क्षेत्रकलत्रादि पंडितानामपि प्रतीतं संसारित्वमिति शेषः किं पांडित्यं देहाद्यात्मदर्शनं किंवा कूटस्थात्मदृष्टिराद्ये संसारित्वादृष्टेरिति विकल्प्याद्यं निराकुर्वन्नाह शृण्विति तत्त्ववस्तुतोसंसारित्वाविरोधि प्रातिभासिकत्वं संसारित्वमिति शेषः

न क्षेत्रज्ञस्य केवलस्याविद्या तत्कार्यं च न च मिथ्याज्ञानं परमार्थवस्तु दूषयितुं समर्थं न ह्यूषरदेशं स्नेहेन पंकीकर्तुं शक्नोति मरीच्युदकं तथाविद्या क्षेत्रज्ञस्य न किंचित्कर्तुं शक्नोत्यतश्चेदमुक्तं क्षेत्रज्ञं चापि मां विद्धि अज्ञानेनावृतं ज्ञानमिति च अथ किमिदं संसारिणामिवाहमेवं ममैवेदमिति पंडितानामपि शृण्विदं तत्पांडित्यं यत्क्षेत्र एवात्मदर्शनं यदि पुनः क्षेत्रज्ञमविक्रियं पश्येयुस्ततो न भोगं कर्म वाकांक्षेयुर्मम स्यादिति विक्रियैव भोगकर्मणी अथैवं सति फलार्थित्वादविद्वान्प्रवर्तते विदुषः पुनरविक्रियात्मदर्शिनः फलार्थित्वाभावात्प्रवृत्त्यनुपपत्तौ कार्यकरणसंघातव्यापा ((रोपरमे निवृत्तिरुपचर्यते))

संसारि

द्वितीयं दूषयति यदीति नहि कूटस्थात्मविषयं संसारित्वं प्रतीयते येन वस्तुतोऽसंसारित्वं विरुध्येत कूटस्थात्मधीविरुद्धायाः संसारित्वबुद्धेरनवकाशित्वादित्यर्थः आत्मानमविक्रियं पश्यतोपि कुतो भोगकर्मणी न स्यातामित्याह विक्रियेति अविक्रियात्मबुद्धेर्भोगकर्माकांक्षयोरभावे कस्य शास्त्रप्रवृत्तिरित्याशंक्याह अथेति फलार्थित्वाभावाद्विदुषो न कर्मणि प्रवृत्तिरित्येवं स्थिते सत्यनंतरमविद्वान्फलार्थित्वादनुपायेकर्मणि प्रवर्तते शास्त्राधिकारीत्यर्थः विदुषो वैधप्रवृत्त्यभावे निषेधाधीननिवृत्तेरविदुषेच त्वात्तस्य निवृत्तिनिष्ठत्वासिद्धेरित्याशंक्याह वि

गी·भा·१३
१०

228

नतावदविद्यासंसारंसंसारिणांचकल्पयंतीस्वतंत्रा[illegible]व्याघातात्सारं तेष्वेवाश्रयांतराभावात्क्षेत्रज्ञस्यतद्वत्त्वेसंसारित्वमितिशंकते
नन्विति नचाविद्यावत्त्वमविद्याकृतमनवस्थानादितिभावः यत्नत्वान्नदंष्ट्रोरगवदविद्याकिंकरिष्यतीतितत्राह तत्कृतंचेति अविद्या
तज्ज्ञयोर्ज्ञेयत्वान्नात्मधर्मतेत्युत्तरमाह नेत्यादिना तदेवप्रपंचयति यावदिति ज्ञेयस्यक्षेत्रधर्मत्वेपिक्षेत्रद्वाराक्षेत्रज्ञस्यतत्कृतदो
षवत्त्वेसाशंकमाह नचेति क्षेत्रस्यापिज्ञेयत्वान्नतेनचितोवस्तुनःस्पर्शोस्तीत्युपपादयति यदीति धर्मधर्मित्वेनसंसर्गेपिज्ञेय
त्वेकाक्षतिरित्याशंक्याह यदीति आत्मधर्मस्यात्मनाज्ञेयत्वेतस्यापिज्ञेयत्वापत्याकर्मकर्तृविरोधःस्यादित्यर्थः किंचविम

नन्वविद्यावत्त्वमेवक्षेत्रज्ञस्यसंसारित्वदोषस्तत्कृतंचदुःखित्वादिप्रत्यक्षमुपलभ्यतेनज्ञेयस्यक्षेत्रधर्मत्वात् ज्ञा
तुःक्षेत्रज्ञस्यतत्कृतदोषानुपपत्तेः यावत्किंचित्क्षेत्रज्ञस्यदोषजातमविद्यमानमासंजयति तस्यज्ञेयत्वोपपत्तेः
क्षेत्रधर्मत्वमेवनक्षेत्रज्ञधर्मत्वंनचतेनक्षेत्रज्ञोदुष्यतिज्ञेयेनतुज्ञातुःसंसर्गानुपपत्तेःयदिहिसंसर्गःस्यात्ज्ञे
यत्वमेवनोपपद्येतयद्यात्मनोधर्मोऽविद्यावत्त्वंदुःखित्वादिचकथंभोप्रत्यक्षमुपलभ्यते कथंवाक्षेत्रधर्मः ज्ञेयं =ष्टंभा
चसर्वंक्षेत्रंज्ञातैवक्षेत्रज्ञइत्यवधारितेऽविद्यादुःखित्वादेःक्षेत्रज्ञविशेषणत्वंक्षेत्रज्ञधर्मत्वंतस्यचप्रत्यक्षोपल

तंनक्षेत्रज्ञाश्रितंतद्धेयत्वाद्रूपादिवदित्याह कथंवेति किंचमहाभूतानीत्या ((भ्यत्वमितिविरुद्धमुच्यते ऽविद्यामात्राव·
दिनाज्ञेयमात्रस्यक्षेत्रांतर्भावान्नाविद्यादेर्ज्ञातृधर्मतेत्याह ज्ञेयंचेति किंचैतयोर्वेत्तीत्युक्तत्वात्क्षेत्र[illegible]दिमाह ज्ञ =[illegible]
ज्ञस्यज्ञातृत्वनिर्णयान्नतत्रज्ञेयंकिंचित्प्रविशतीत्याह ज्ञातेवेति क्षेत्रक्षेत्रज्ञयोरेवंस्वाभाव्येसिद्धेक्षेत्रधर्मत्वमविद्यादेरि
तिफलितमाह इत्यवधारितइति विरोधाच्चनक्षेत्रज्ञधर्मत्वं अविद्यादेरित्याह क्षेत्रज्ञेति विरुद्धवादित्वमस्यलंदर्शयति अ
सिद्ध२

राम·
१०

ननु क्षेत्रज्ञं चापि मां विद्धीत्यनेन न सर्वक्षेत्रांतर्यामी परो जीवादन्यो निरूप्यते न जीवस्येश्वरत्वमत्र प्रतिपाद्यते तत्कथमित्यमाक्षिप्यते तत्राह कथमिति किंच तत्त्वमसीति वचःप्रसिद्धक्षेत्रज्ञानुवादेनाप्रसिद्धं तस्येश्वरत्वमिहोपदिशतः कृतस्य हानिमकृतस्य च जीवेश्वरयोस्तात्विकभेदस्य कल्पनां कुर्वन्कथं व्यामूढो न स्यादित्याह कृतेति ननु केचन व्याख्यातारो यथोक्तं पाठं त्यं पुरस्कृत्य क्षेत्रज्ञं चापीत्यादिश्लोकं व्याख्यातवंतः तत्कथमुक्तं पांडित्यमास्थातुष्णींमूढत्वं तत्राह तस्मादिति क्षेत्रज्ञं चापीत्यत्र क्षेत्रज्ञेश्वरयोरैकं तत्त्वाभीष्टं स्यहपि तु प्रत्यक्तमेव बोधमनुद्रवति पण्डितमिति तात्विकमेकत्वमतात्विकं संसारित्वमित्यंगीकृ-

त्वयं मूढोऽन्यांश्च व्यामोहयति शास्त्रार्थसंप्रदायरहितत्वात् कृतहानिमकृताभ्यागमं च कुर्वंस्तस्मादसंप्रदायवित्सर्वशास्त्रविदपि मूर्खवदेवोपेक्षणीयः यत्तूक्तमीश्वरस्य क्षेत्रज्ञैकत्वे संसारित्वं प्राप्नोति क्षेत्रज्ञानां चेश्वरैकत्वे संसारिणोऽभावात्संसाराभावप्रसंग इत्येतौ दोषौ प्रत्युक्तौ विद्याविद्ययोर्वैलक्षण्याभ्युपगमादिति कथमविद्यापरिकल्पितदोषेण तद्विषयं वस्तु पारमार्थिकं न दुष्यतीति तथा च दृष्टांतो दर्शितो मरीच्यंभसोषरदेशो न पंकीक्रियत इति संसारिणोऽभावात्संसाराभावप्रसंगदोषोऽपि संसारसंसारिणोरविद्याकल्पितत्वोपपत्त्या प्रत्युक्तो ॥ २१

क्तमेव समाधिं स्मारयति एताविति ईश्वरस्य संसारित्वं संसार्यभावेन संसाराभावश्चेत्युक्तौ दोषौ विद्याविद्ययोर्वैलक्षण्योपेऽपि कथं प्रत्युक्ताविति पृच्छति कथमिति कथमिति कल्पितसंसारेणाकल्पनाधिष्ठानमदूषयत्तु वस्तुतो न संबध्यमिति परिहरति अविद्येति तद्विषयं कल्पनास्पदमधिष्ठानमिति यावत् कल्पितेनाधिष्ठानस्य वस्तुतोऽसंस्पर्शे दृष्टांतं स्मारयति तथा चेति ईश्वरस्य संसारित्वप्रसंगप्रकटीकृतप्रसंगांतरनिरासमनुस्मारयति संसारिणाइति ॥ ॥

मु२

ममैवाविद्यावत्त्वात्तत्परिहारे मया प्रयतितव्यमिति शंकते नन्विति तर्हि प्रश्नानर्थक्यमिति सिद्धांती स्वाभिसंधिमाह जानासीति आत्मानमविद्यावंतं जानन्नपि न तद्विषयाध्यक्षाभावात्त्यजामीति शंकते जानामीति अविद्यावतो प्रत्यक्षत्ववदतातस्याहमविद्यावानविद्याकार्यवत्त्वाद्व्यतिरेकेणानुक्तात्मवदित्यनुमेयत्वमिष्टमित्युपेत्य दूषयति अनुमानेनेति आत्मनोऽविद्यासंबंधग्रहे कात्तुमेयत्तिरित्याशंक्य ज्ञाते वात्मा स्वस्याविद्यासंबंधं बुध्येतान्यो वा ज्ञातेति विकल्प्याद्यं दूषयति नहीति तत्काले स्वस्यामविद्यां प्रतिज्ञातृत्वावस्थायामि

अथवि॰

२१९

ननु ममैवाविद्या जानासि तर्ह्यविद्यां तद्वंतं चात्मानं जानामि न तु प्रत्यक्षेणानुमानेन चेज्जानासि कथं संबंधग्रहणं न हि तव ज्ञातुर्ज्ञेयभूतयाविद्यया तत्काले संबंधो ग्रहीतुं शक्यते अविद्याया विषयत्वेनैव ज्ञातुरुपयुक्तत्वान्न च ज्ञातुरविद्यायाश्च संबंधस्य यो ग्रहीता ज्ञानं चान्यत्तद्विषयं संभवत्यनवस्थाप्राप्तेर्यदि ज्ञातापि ज्ञेयसंबंधो ज्ञायेतान्यो ज्ञाता कल्प्यः स्यात्तस्याप्यन्यस्तस्याप्यन्य इत्यनवस्थापरिहार्या यदि पुनरविद्या ज्ञेयान्यद्वा ज्ञेयं ज्ञेयमेव तथा ज्ञातापि ज्ञातैव न ज्ञेयं भवति॥

ति यावत् अविद्यां विषयत्वेन गृहीतत्वात्तज्ज्ञातृत्वेनैवोपयुक्तस्यात्मनस्तस्याः स्वात्मनि कुतः संबंधज्ञातृत्वमेकस्य कर्मकर्तृत्वविरोधादित्याह अविद्ययेति द्वितीयं निरस्यति न चेति यो ग्रहीता स न संभवतीति संबंधः तद्विषयमिति ज्ञातुरविद्यायाश्च संबंधस्तच्छब्दार्थः अनवस्थामेव प्रपंचयति यदीति आत्मनः स्वपरज्ञेयत्वायोगात्तस्मिन्नविद्यासंबंधस्याप्रामाणिकत्वान्निमानुभवगम्यत्वे स्थिते फलितमाह यदि पुनरिति॥

मात्रपरस्याप्यावर्त्यमानयुक्त्याख्यमवष्टंभांतरमिति वक्तुं केवलपदं ययाविद्यया विरुद्धमपि निर्वोढुं शक्यते तस्याः स्वातंत्र्याभावाच्चितोन्यस्याविषयकत्वेनातदाश्रयत्वात्तस्याविद्यास्वभाववत्तयातदाश्रयत्वव्याघातात्तदाश्रयजिज्ञासया पृच्छति अत्राहेति आश्रयमात्रं पृच्छते तद्धि द्वेधो वा प्रथमे प्रश्नस्यानवकाशत्वं मत्वाह यस्येति अविद्यादृश्याः दृश्या वा दृश्यत्वे पारतंत्र्यात्किंचिन्निष्ठत्वेनैव तद्दृष्टेर्नाश्रयमात्रं प्रष्टव्यमदृश्यत्वे वाप्रकाशत्वादसिद्धिरेव स्यादित्यर्थः द्वितीयमालंबते कस्येति अविद्याया दृश्यमानत्वादाश्रयविशे

केवलंत्वत्राह साविद्याकस्येति यस्यदृश्यतेतस्यैवकस्यदृश्यतइत्यत्रोच्यते अविद्याकस्यदृश्यतइतिप्रश्नोनिरर्थकः कथंदृश्यतेचेदविद्यातद्वंतमपिपश्यसिनचतद्वत्युपलभ्यमानेसाकस्येतिप्रश्नोयुक्तोनहिगोमत्युपलभ्यमानेगावःकस्येतिप्रश्नोर्थवान्भवेत् ननुविषमोदृष्टांतोगवांतद्वतश्चप्रत्यक्षत्वात्तत्संबंधोपिप्रत्यक्षइतिप्रश्नोनिरर्थकः नतथाविद्यातद्वतोश्चप्रत्यक्षोयतःप्रश्नोनिरर्थकःस्यादप्रत्यक्षेणाविद्यावताविद्यासंबंधेज्ञातेकिंतवस्यादविद्यायाअनर्थहेतुत्वात्परिहर्तव्याममस्याद्यस्याविद्यासतांपरिहरिष्यति॥ ॥

यस्यात्मनोपि स्वानुभवसिद्धत्वात्प्रश्नस्य निरवकाशत्वेनुत्तरमाह अत्रेति प्रश्नानर्थक्यं प्रश्नद्वारा स्फोरयति कथमित्यादिना तथापि कथं प्रश्नासिद्धिस्तत्राह नचेति तदेव दृष्टांतेन स्पष्टयति नहीति दृष्टांतदार्ष्टांतिकयोर्वैषम्यं चोदयति नन्विति अज्ञानाश्रयस्य परोक्षत्वेपि प्रश्नानर्थक्यमित्याह अप्रत्यक्षेणेति अविद्यावतोऽप्रत्यक्षत्वेपि तेनाविद्यासंबंधे सिद्धे प्रष्टुस्तव प्रश्नानर्थक्यं समाधिर्न कश्चिदित्यर्थः अनुद्भूतपराभिसंधिः शंकते अविद्याया इति अविद्यावतस्तत्परिहारान्नान्येन प्रयतितव्यमित्याह यस्येति॥

२

एवंश्लोकद्वयंव्याख्यायश्लोकांतरमवतारयति इदमिति कुत्रसंग्रहोक्तिरुपयुज्यतेतत्राह व्याचिख्यासितस्येति प्रतिपत्तिसौकर्यार्थंसंग्रहोक्तिरर्थवतीत्यर्थः वक्ष्यमाणोर्थःश्रोतुर्मनःसमाधानार्थंसंक्षिप्तेनवाक्यार्थोमायविवरणप्रतिज्ञामभिप्रेत्याह यन्निर्दिष्टमिति इदंशरीरमितियन्निर्दिष्टंतच्छरीरंतच्छब्देनपरामृशति प्रकृतार्थत्वात्तस्येतियोजना क्षेत्रंज्ञातव्यमित्यध्याहारः यच्चेति येनरूपेणाह्लपचरितिनरेवक्षेत्रेविशेष्यते तस्यक्षेत्रस्यस्वकीयाधर्माजन्मादयस्तैर्विशिष्टस्यज्ञेयत्वेहेयत्वंफलति चशब्दःपंचकस्येतरेतरसमुच्चया

इदंशरीरमित्यादिश्लोकोपदिष्टस्यक्षेत्राध्यायार्थस्यसंग्रहश्लोकोयमुपन्यस्यतेतत्क्षेत्रंयच्चेत्यादिव्याचिख्यासितस्यह्यर्थस्यसंग्रहोपन्यासोन्याय्यइति यन्निर्दिष्टमिदंशरीरंइति तत्क्षेत्रमिति तच्छब्देनपरामृशतियच्चेदंनिर्दिष्टंक्षेत्रंतद्यादृक्

तत्क्षेत्रंयच्चयादृक्चयद्विकारियतश्चयत् सचयोयत्प्रभावश्चतत्समासेनमेशृणु ३

यादृक्यादृशंस्वकीयैर्धर्मैश्चशब्दःसमुच्चयार्थोयद्विकारियोविकारोयस्यतद्यद्विकारियतोयस्माच्चयत्कार्यमुत्पद्यतइतिवाक्यशेषःसचयःक्षेत्रज्ञोनिर्दिष्टःसयत्प्रभावःयेप्रभावाउपाधिकृताःशक्तयोयस्यसयत्प्रभावश्चतत्क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं
यथाविशेषितंतत्समासेनसंक्षेपेणमेममवाक्यतःशृणुश्रुत्वावधारयेत्यर्थः ३

र्थत्वमाह चशब्दइति विकारित्वेनापिहेयत्वंसूचयति यद्विकारीति यत्कार्यंतत्सर्वंयस्मादुत्पद्यतेतत्कारणत्वाज्ज्ञातव्यमित्याह यतइति क्षेत्रमिवक्षेत्रज्ञंज्ञातव्यंदर्शयति सचेति ज्ञातव्यमितिसंबंधः चक्षुराद्युपाधि कृतदृष्ट्यादिशक्तिवशात्तस्यज्ञातव्यत्वंसूचयति यत्प्रभावइति तेनोक्तेनप्रभावेनतस्यज्ञातव्यतेतिशेषः कथंयथाविशेषितंक्षेत्रंक्षेत्रज्ञोवाशक्योज्ञातुमित्याशंक्य
भगवद्वाक्यादित्याह तदिति ३

यदा चैवं तद्देन दृश्याहार्यैर्ज्ञातुरात्मनो न किंचिद्दुष्यतीत्येतदसह्यमानाः शंकते नन्विति किं ज्ञातृत्वं ज्ञानक्रियाकर्तृत्वं ज्ञानस्वरूपत्वं वाना द्यस्त्वेनाभ्युपगमात्तत्प्रयुक्तदोषाभावान्न द्वितीये ज्ञातृत्वस्यौपचारिकत्वान्न तत्कृतो दोषोऽस्तीत्याह नेत्यादिना असंगस्यापि क्रियायां क्रियो पचारं दृष्टांतेन स्फुटयति यथेति आत्मनि वस्तुतो हि क्रियाभावे भगवदनुमतिं दर्शयति यथाचेति गीताशास्त्रं समस्यर्थः स्वत एवात्म नि क्रियाद्यात्मत्वाभावो भगवता शास्त्रे यथोक्तस्तथैव व्याख्यातमस्माभिरिति संबंधः कथं तर्हि क्रियादिरात्मनि भातीत्यत्राह अविद्येति यथावस्तुतो नास्त्यात्मनि क्रियादिरूपचारात्तु भाति तन्यातनत्रतज्ञानीनप्रकरणेषु भगवताक्तो मत इत्याह नचेति न केवलमतीतेषु

यदा चैवमविद्यादुःखित्वाद्यैर्न ज्ञातुः क्षेत्रज्ञस्य किंचिन्न दुष्यति नन्वयमेव दोषोपनतदोषबलसेन्न विज्ञातृत्वं न विज्ञानस्वरूप स्यैवाविक्रियस्य विज्ञातृत्वोपचारात् यथोष्णतामात्रेणाग्नेस्तप्तिक्रियोपचारस्तद्वत् यथात्र भगवताक्रियाकारकफलात्मत्वा भाव आत्मनि स्वत एव दर्शितः अविद्याध्यारोपितैरेव क्रियाकारकाद्यात्मन्युपचर्यन्ते तत्र तत्र यएनं वेत्ति हंतारं प्रकृ तेः क्रियमाणानि गुणैः कर्माणि सर्वशः नादत्ते कस्यचित्पापमित्यादिप्रकरणेषु दर्शितस्तथैव च व्याख्यातमस्माभिरुत्त रेषु च प्रकरणेषु दर्शयिष्यामो नन्वेवं सत्यात्मनि निष्क्रियाकारकफलात्मताभावः स्वतोः भावेः विद्याध्यारोपितत्वे कर्मा णामविद्वत्कर्तव्यान्येव न विदुषामिति प्राप्तं सत्यमेवं प्राप्तमेतदेव च न हि देहभृता शक्यमित्यत्र दर्शयिष्यामः सर्वशास्त्रार्थोप संहारप्रकरणे च समासेनैव कौंतेय निष्ठा ज्ञानस्य या परेत्यत्र विशेषतो दर्शयिष्यामः अलमिह बहुप्रपंचेनेत्युपसंह्रियते

वप्रकरणेषु वास्तवक्रियाद्यभावादात्मन्याध्यासिकी नदर्शितता किंतु वक्ष्यमाणप्रकरणेष्वपि तथैव भगवदभिप्रायदर्शनं भविष्यती त्याह उत्तरेषु चेति आत्मनि वास्तवक्रियाद्यभावेऽध्यासाच्च तत्सिद्धौ लोकमेकोऽस्या विद्वदधिकारित्वप्राप्तौ विद्वान्यजेत ज्ञात्वा कर्मार भेतेत्यादिशास्त्रविरोधः स्यादिति शंकते इतेति शास्त्रस्य व्यतिरेकविज्ञानाभिप्रायत्वाद्धानाद्यप्रतीतात्मधीविधुरस्यैव कर्मको ऽधिकारितेत्यंगीकरोति सत्यमिति कथमज्ञस्यैव कर्माधिकारित्वमुपपन्नमित्याशंक्याह एतदेवचेति ज्ञानिनो ज्ञाननिष्ठायामेवा धिकारो निष्ठांतरे त्वज्ञस्यैवेत्युपसं[illegible]त्याह सर्वेति तदेतदज्ञा प्रति समासेनेति जीवब्रह्मत्वगोचरे स्वाभप

गमेन किंचिदवशिमित्युपसंहरति अलमिति १

स्तात्येति

क्षेत्रादियाथात्म्यस्तुत्या प्रलोभिताय किं तदिति जिज्ञासवे यथोद्दिष्टं क्षेत्रं निर्दिशति महत्त्वे हेतुमाह सर्वेति भूतशब्देन स्थूलानामपि विशेषाभावाद्धेत्वहानिरित्याशंक्याह स्थूलानीति अहंकारो हेतुप्रत्ययलक्षणइति संबंधः भूतानां प्राग्नोतिकत्वेनोभिमानमात्रात्मत्वमत्वाहंकारं विशिनष्टि महाभूतेति महतः परमित्यादौ प्रसिद्धं महच्छब्दार्थमहंकारे हेतुमाह अहंकारे

स्तुत्याभिमुखीभूतायार्जुनायाह भगवान् महाभूतानीति महाभूतानि महांति च तानि भूतानि सर्वविकारव्यापकत्वाद्भूतानि च सूक्ष्माणि स्थूलानींद्रियगोचरशब्देनाभिधायिष्यंते ऽहंकारो महाभूतकारणमहंप्रत्ययलक्षणोऽहंकारकारणं बुद्धिरध्यवसायलक्षणा तत्कारणमव्यक्तमेव च न व्यक्तमव्यक्तमव्याकृतमीश्वरशक्तिः म

महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः ५ ॥

ममाया दुरत्ययेत्युक्तं एवशब्दः प्रकृत्यवधारणार्थः एतावत्येवाष्टधाभिन्ना प्रकृतिः चशब्दो भेदसमुच्चयार्थः इंद्रियाणि दश श्रोत्रादीनि पंच बुद्ध्युत्पादकत्वात् बुद्धींद्रियाणि वाक्पाण्यादीनि पंच कर्मनिर्वर्तकत्वात् कर्मेंद्रियाणि तानि दश एकं च किं तत् मन एकादशं संकल्पाद्यात्मकं पंच चेंद्रियगोचराः शब्दादयो विषयास्तान्येतानि सांख्याश्चतुर्विंशतितत्त्वान्याचक्षते ५

ति ईश्वरशक्तिरित्युक्ते चैतन्यमपि शंकते तेन तदर्थमाह ममेति अवधारणारूपमर्थमेव स्फुटयति एतावत्येवेति पंचतन्मात्राण्यहंकारो महदव्याकृतमित्यष्टधाभिन्नत्वं मूलप्रकृत्या महत्तन्मात्रादिभेदानां समुच्चयश्चकारार्थः दशेंद्रियाण्येव विभज्य स्फुटयति श्रोत्रेत्यादिना तदेव प्रपञ्चद्वारा स्फुटयति किं तदिति उक्तेषु तन्मात्रादिषु तंत्रांतरीयसंमतिमाह तानीति ५

शब्दादिविषयशब्देन स्थूलानि गृह्यंते १

श्लोकांतरस्यतात्पर्यमाह तदिना विवक्षितंजिज्ञासितमित्यर्थः स्तुतिफलमाह श्रोत्रिति नकेवलमाप्तोक्तैरेवंक्षेत्रादियाथात्म्यं संभावितंकिंतुवेदवाक्यादपीत्याह छंदोभिश्चेति ऋगादीनांचतुर्णामपिवेदानांनानाप्रकारत्वंशाखाभेदादिहंनकेवलंश्रुतिश्रुतिस्मृतिसिद्धमुक्तंयाथात्म्यंकिंतुयौक्तिकंचेत्याह किंचेति कानितानिसूत्राणीत्याकांक्षाह आत्मेत्येवेति आदिपदेन

तत्क्षेत्रक्षेत्रज्ञयोर्याथात्म्यंविवक्षितंस्तौतिश्रोतृबुद्धिप्ररोचनार्थं ऋषिभिरिति ऋषिभिर्वसिष्ठादिभिर्बहुधा बहुप्रकारंगीतंकथितंछंदोभिःछंदांसिऋगादीनितैश्छंदोभिर्विविधैर्नानाप्रकारैः पृथक्विवेकतोगीतंकिंच ब्रह्मसूत्रपदैश्चएवब्रह्मणःसूचकानिवाक्यानिब्रह्मसूत्राणितैः पद्यतेज्ञायतेब्रह्मेतितानिसूत्रपदान्युच्यंतेतैरे

ऋषिभिर्बहुधागीतंछंदोभिर्विविधैःपृथक् ब्र
ह्मसूत्रपदैश्चैवहेतुमद्भिर्विनिश्चितैः ४ ॥

एवंक्षेत्रक्षेत्रज्ञयोर्याथात्म्यंगीतमितिप्रवर्तते आत्मेत्येवोपासीतेत्यादिभिर्हिब्रह्मसूत्रपदैरात्माज्ञाप्यते हेतुमद्भिर्युक्तियुक्तैर्विनिश्चितैर्निःसंशयरूपैर्निश्चितप्रत्ययोत्पादकैरित्यर्थः ४ ॥ ॥ ॥ ॥

ब्रह्मविदाप्नोतिपरमथयोन्यांदेवतामित्यादीनिविधाविधासूत्राण्युक्तानि आत्मेतिक्षेत्रज्ञोपादानंतद्ब्रह्मसंज्ञोपलक्षणं अथातोब्रह्मजिज्ञासेत्यादीन्यपिसूत्राणिपत्रेगृहीतान्यन्यथाछंदोभिरित्यादिनापौनरुक्त्यादितिमत्वाविशिनष्टि हेतुमद्भिरिति ४ ॥

तप्ते लोहपिंडे वह्नेरभिव्यक्तिवदुक्तसंहतौ बुद्धिवृत्तिरभिव्यज्यते तत्र चाग्निरभिव्यक्तो लोहपिंडमेवाग्निवद्दाह्यदाहयतीति तथात्मचैतन्यं बुद्धिवृत्तावभिव्यक्तं तामेवात्मवत् प्रबोधयत्यतस्तदाभासानुविद्धा सैव चेतनेत्युच्यते सा च मुख्यचेतनं प्रति ज्ञेयत्वादंतदूपत्वात्क्षेत्रमेवेत्यर्थः धृतिस्तुरूपोत्साहः क्षेत्रत्वं तस्याद्दर्शयति धृतिरित्यादिना नन्वन्येपि संकल्पादयो मनोधर्माः संति ते किमित्यत्र क्षेत्रत्वेन नोच्यंते तत्राह संघेति तस्योपलक्षणार्थत्वे हेतुमाह यतइति इच्छादिवदस्मिन्नवसरे संकल्पादीनामपि दर्शितत्वात् सिद्धवत्कृतस्य प्रकरणा

तप्तइव लोहपिंडेग्निरात्मचैतन्याभासरससविद्धा चेतना सा च क्षेत्रं ज्ञेयत्वात् धृतिर्ययावसादप्रानि देहेंद्रियाणि ध्रियंते सा च ज्ञेयत्वात् क्षेत्रं संघातः करणधर्मोपलक्षणार्थमिच्छादिग्रहणं यत उक्तं तदुपसंहरति एतत्क्षेत्रं समासेन सविकारं सह विकारेण महदादिनोदाहृतमुक्तं यस्य क्षेत्रभेदजातस्य संहतिरिदं शरीरं क्षेत्रमित्युक्तं तत् क्षेत्रं व्याख्यातं महाभूतादिभेदभिन्नं धृत्यंतं ६ क्षेत्रज्ञो वक्ष्यमाणविशेषणो यस्य सप्रभावस्य क्षेत्रज्ञस्य परिज्ञानादमृतत्वं भवति तं ज्ञेयं यत्तत्प्रवक्ष्यामीत्यादिना सविशेषं स्वयमेव वक्ष्यति भगवानधुना तु तत्॥ ॥

विभागार्थं यतो भगवानुक्तं क्षेत्रमुपसंहरत्यतोउक्तमिच्छादिग्रहस्य सर्ववृत्तिबुद्धिधर्मोपलक्षणार्थत्वमित्यर्थः विरक्तस्य ज्ञानाधिकारार्थं वैराग्यार्थं क्षेत्रं व्याख्यातमित्यनुवदति यस्येति क्षेत्रभेदजातस्य व्यष्टिदेहविभागस्य सर्वस्येत्यर्थः संहतिः समष्टिशरीरं ६ ननु उक्ते क्षेत्रे क्षेत्रज्ञो वक्तव्यस्तं हित्वा किमित्यन्यदुच्यते तत्राह क्षेत्रज्ञ इति अमानादिमदिसादिनावक्ष्यमाणविशेषणं क्षेत्रज्ञं स्वयमेव भगवान्विवक्षितं विशेषणसहितं ज्ञेयं यत्तदित्यादिनावक्ष्यतीति संबंधः किमिति क्षेत्रज्ञो वक्ष्यते तत्राह यस्येति ज्ञेयं यत्तदित्यतः प्राक्तनग्रंथस्य तात्पर्यमाह अधुनेति॥

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकश्च विकार इति पठंति अव्यक्ताहंकारादीनां त्रैगुण्याभिमानादिधर्मकत्वं प्रसिद्धमिति शब्दादीनामेव ग्रहं लोकमेंद्रियाणां विषयानुक्तेर्वैरूप्यप्रसंगात्तेषां च निरूपणात्स्वस्वप्रकृतत्वात्स्वरूपनिर्देशो नैव कृतस्तेत्रेप यच्चपाद्कृचेति व्याख्यातमिदानीमिच्छादीनामात्मविकारत्वनिवृत्तये क्षेत्रविकारत्वनिरूपणेन तद्विकारीत्येतन्निरूपयन्मतांतरनिवृत्तिपरत्वेन श्लोकमवतारयति अथेति सर्वज्ञोक्तिविरोधादुपेयं वैशेषिकं मतमिति मत्वोक्तं भगवानिति उपलब्धजातीयस्योपलभ्यमानस्यादानेच्छायां हेतुमाह सुखेति इति शब्दो हेत्वर्थः सुखहेतुत्वात्तस्मिन्नेच्छेत्यर्थः इच्छां सुखतद्धेतुविषयत्वेन व्याख्यायात्मध

अथेदानीमात्मगुणा इति यानाँचक्षते वैशेषिकास्तेपि क्षेत्रधर्मा एव न तु क्षेत्रज्ञस्येत्याह भगवान् इच्छाद्वेष इति इच्छा यज्जातीयं सुखहेतुमर्थमुपलब्धवान् एवं पुनस्तज्जातीयमुपलभमानस्तमादातुमिच्छति सुखहेतुरिति सेयमिच्छांतःकरणधर्मो

इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः एतत्क्षेत्रं समासेन सविकारमुदाहृतं ६

ज्ञेयत्वात्क्षेत्रं तथा द्वेषो यज्जातीयमर्थं दुःखहेतुत्वेनानुभूतवांस्पुनस्तज्जातीयमुपलभमानस्तं द्वेष्टि सोयं द्वेषो ज्ञेयत्वात् क्षेत्रमेव तथा सुखमनुकूलं प्रसन्नं सत्वात्मकं ज्ञेयत्वात् क्षेत्रमेव दुःखं प्रतिकूलात्मकं ज्ञेयत्वात्तदपि क्षेत्रं संघातो देहेंद्रिया

र्मत्वं तस्यानुद्रष्यति ज्ञेयमिति तथापि कथं क्षेत्रांतर्भूतत्वं तत्राह ज्ञेयत्वादिति इ ।। णां संहतिस्तस्यामभिव्यक्तांतःकरणवृत्तिः

च्छावद्द्वेषोपि धर्मो बुद्धेरित्याह तथेति कोसौ द्वेषो यस्य बुद्धिधर्मत्वं तत्राह यज्जातीयमिति तस्यापीच्छावत्क्षेत्रांतर्भावमाह सोयमिति इच्छाद्वेषवद्बुद्धिधर्मः सुखमपीत्याह तथेति तस्यापि स्वरूपतो ज्ञाक्षेत्रांतःपातित्वमाह अनुकूलमिति [illegible] दुःखस्यापि स्वरूपतो ज्ञाक्षेत्रमध्यवर्तित्वमाह दुःखमिति देहेंद्रियात्मवादो यः प्रसिद्धस्तं तु क्षेत्रांतर्भूतमेव संघातं विभजते देहेति विज्ञा

नकेवलममानित्वादीन्येवज्ञानस्यांतरंगसाधनानिकिंतुवैराग्यादीन्यपितथाविधानिसंतीत्याह किंचेति दृष्टादृष्टेष्वनेकार्थेषुरागेत स्यतिवधंज्ञानेनोत्पद्यतेतिमत्वाव्याकरोति इंद्रियेति आविर्भूतोगर्वोहंकारस्तदभावोपिज्ञानहेतुरित्याह अनहंकारइति इंद्रियार्थेषुवैराग्यमुक्तमुपपादयति जन्मेति प्रत्येकंदोषानुदर्शनमित्युक्तंतत्रजन्मनिदोषानुदर्शनंविशदयति जन्मनीति यथाजन्मनिदोषानुसंधानंतथामृत्यौदोषस्यसर्वमर्मनिकृंतनादेरालोचनंकार्यमित्याह तथेति जन्मनिमृत्यौचदोषानुसंधाने

किंच इंद्रियेति इंद्रियार्थेषुशब्दादिषुदृष्टादृष्टभोगेषुविरागभावोवैराग्यमनहंकारोऽहंकाराभावएवच जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं जन्मचमृत्युश्चजराचव्याधयश्चदुःखानिचतेषुजन्मादिदुःखांतेषुप्रत्येकंदोषानुदर्शनंजन्मनिगर्भवासयोनिद्वारानिःसरणंदोषस्तस्यानुदर्शनं तथामृत्यौदोषानुदर्शनं तथाजरायांप्रज्ञाशक्तितेजोनिरोधदो

इंद्रियार्थेषुवैराग्यमनहंकारएवच जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं ८

षानुदर्शनंआलोचनंपरिभूतताचेतितथाव्याधिषुशिरोरोगादिषुदोषानुदर्शनंतथादुःखेष्वाध्यात्माधिभूताधिदैवनिमित्तेष्वथवादुःखान्येवदोषोदुःखदोषस्तस्यजन्मादिषुदर्शनंदुःखंजन्मदुःखंजरादुःखंमृत्युर्दुःखंव्याधयोदुःखनिमित्तत्वाज्जन्मादयोदुःखंनपुनःस्वरूपेणैवदुःखमित्येवंजन्मादिषुदुःखदोषानुदर्शनात् देहेंद्रियविषयभोगेषुवैराग्यमुपजायते वज्जरादिष्वपिदोषानुसंधानंकर्तव्यमित्याह तथेति व्याधिषुदोषस्यासत्यतारूप ॥ततःप्रत्यगात्मनिप्रवृत्तिःकरणानामात्मद स्यानुसंधानंदुःखेषुत्रिविधेष्वपिदोषानुसंधानंप्रसिद्धंव्याख्यानांतरमाह अथवेति यथाजन्मादिषुदुःखांतेषुदोषदर्शनमुक्तंतथातेष्वेवदुःखात्म्यदोषस्यदर्शनंस्फुटयति दुःखमित्यादिना कथंजन्मादीनांवास्येंद्रियग्राह्याणांदुःखत्वंतत्राह दुःखेति जन्मादिषुदोषानुदर्शनकृतंफलमाह एवमिति वैराग्येसत्यात्मदृष्ट्यर्थंकरणानांतदाभिमुख्येनप्रवृत्तिरितिवैराग्यफलमाह

अमानित्वादिलक्षणांविदधातीत्युत्तरग्रंथसंबंधः ज्ञानसाधनसमुदायबोधनंकुत्रोपयुज्यतेतत्राह यस्मिन्निति योग्यमधिकृतमेवविवृणोति य त्यरइति एतत्ज्ञानमितिवचनात्कथमिदंज्ञानसाधनमित्याशंक्याह तदिति नहिध्यानस्यवक्तृद्वारादर्थंसूचयति भगवानिति अमानित्वा दिनिष्ठस्यांतर्धियोज्ञानमितिनियमार्थमाह अमानित्वमिति मानस्तिरोहितोविलेपः सचात्मन्युत्कर्षारोपहेतुः सोस्येतिमानी तस्यभावो मानित्वमितिआकरोति अमानित्वमित्यादिना प्रतियोगिमुखेनादंभित्वंविवृणोति अदंभित्वमिति वाङ्मनोदेहैः रपीडनंप्राणिनामहिंस

ज्ञानसाधनगणममानित्वादिलक्षणंयस्मिन्सतितत्त्वविज्ञानयोग्याधिकृतोभवति यतः सन्यासीज्ञाननिष्ठउच्यते अमानित्वा दिगणोज्ञानसाधनत्वात्ज्ञानशब्दवाच्यंविदधातिभगवान् अमानित्वमिति अमानित्वंमानित्वंमात्मनःश्लाघनंतदभावोऽमानित्वम दंभित्वंस्वधर्मप्रकटीकरणंदंभित्वंतदभावोऽदंभित्वम् अहिंसा अहिंसनंप्राणिनामपीडनं क्षांतिः परापराधप्राप्तावविक्रियाऽर्जवमृजुभा

अमानित्वमदंभित्वमहिंसाक्षांतिरार्जवं आचार्योपासनंशौचंस्थैर्यमात्मविनिग्रहः ७ ॥ ॥

वोऽवक्रत्वमाचार्योपासनंमोक्षसाधनोपदेष्टुराचार्यस्यशुश्रूषादिप्रयोगेनसेवनं शौचंकायमलानांमृज्जलाभ्यांप्रक्षालन मेतच्चमनसः प्रतिपक्षभावनयारागादिमलानामपनयनंशौचंस्थैर्यंस्थिरभावोमोक्षमार्गएवकृताध्यवसायित्वमात्मविनि ग्रहआत्मनउपकारस्यात्मशब्दवाच्यस्यकार्यकरणसंघातस्यविनिग्रहः स्वभावेनसर्वतः प्रवृत्तस्यसन्मार्गएवनिरोधआत्मविनिग्रहः ७

कार

नंतद्देवाहिंसेत्याह अहिंसेति परापराधस्यचित्तविकारकस्यप्राप्तावेवाविकृतचित्तत्वेनापकारसहिष्णुत्वंक्षांतिरि त्याह क्षांतिरिति अवक्रत्वमकौटिल्यंयथाहृदयंव्यवहारः सैवऋजुत्वंप्रकृतिनिमित्तत्वंचेत्यर्थः उपनीयतुयंशिष्यमित्यादिनोक्त माचार्यमवच्छिनत्ति मोक्षेति शुश्रूषादिपदंनमस्कारादिविषयंवाह्यमभ्यंतरंचद्विःप्रकारंशौचंक्रमेणाभजते शौचमित्यादिना मन सोरागादिमलानामितिसंबंधः तदपनयोपायमुपदिशति प्रतिपक्षेतिरागादिप्रतिकूलस्यभावनाविषयेषुदोषदृष्ट्यादिनेतियाव त् स्थिरभावमेवविशदयति मोक्षेति मोक्षेति आत्मनोमित्यनेन [illegible] तिशापस्यकुतोविनिग्रहस्तत्राह

भावोमानित

गी·भा·१३ साधनांतरमाह किंचेति अनन्ययोगमेवसंक्षिप्तंव्यनक्ति नेत्यादि उक्तधीद्वाराजातायांभक्तेर्भगवतिस्थैर्यंदर्शयति
१६ नेति तत्रापिज्ञानशब्दस्तद्धेतुत्वादित्याह साचेति देशस्यविविक्तत्वंद्विविधमुदाहरति विविक्तइति तदेवस्पष्टयति

किंच मयिचेति मयिचेश्वरेनन्ययोगेनापृथक्समाधिनानान्योभगवतोवासुदेवात्परोस्त्यतः सएवनोगतिरित्येवं
निश्चिताः अव्यभिचारिणीबुद्धिरनन्ययोगस्तेनभजनंभक्तिर्नव्यभिचरणशीलाअव्यभिचारिणीसाचज्ञानंविविक्त
देशसेवित्वंविविक्तः स्वभावतःसंस्कारेणवाअशुचित्वंविविक्तेषुहिदेशेषुचित्तंप्रसीदतियतस्ततआत्मादिभाव
224 आदिभिः सर्पव्याघ्रादिभिरहितअरण्यनदीपुलिनदेवगृहादिर्विविक्तोदेशस्तंसेवितुंशीलमस्येतिविविक्तदे

मयिचानन्ययोगेनभक्तिरव्यभिचारिणी विविक्तदेशसेवित्वमरतिर्जनसंसदि १०

शसेवी तद्भावोविविक्तदेशसेवित्वंविविक्तेषुहिदेशेषुचित्तंप्रसीदतियतस्ततआत्मादिभावनाविविक्तेउपजा
यतेऽतोविविक्तदेशसेवित्वंज्ञानमुच्यते अरतिररमणंजनसंसदिजनानांप्राकृतानांसंस्कारशून्यानामवि
नीतानांकलहोन्मुखितचित्तानांसंसत्समवायोजनसंसन्नसंस्कारवतांविनीतानांसंसत्तस्याज्ञानोपकारकत्वा संसद
त्अतः प्राकृतजनसंसद्यरतिर्ज्ञानार्थत्वात्ज्ञानं १०

अरण्येति उक्तदेशसेवित्वंकथंज्ञानेहेतुस्तत्राहविविक्तेष्विति आत्मादीत्यादिशब्देनपरमार्थवाक्यार्थश्चोच्यते ननु राम०
रतिविषयत्वेनाविशेषतोजनसंसन्मात्रंकिमितिनगृह्यतेतत्राह तस्याइति संतः संगस्यभेषजमित्युपलंभादित्यर्थः १० १६

जन्मादिदुःखदोषानुदर्शनं ज्ञानहेतुषु किमित्युपसंख्यातमित्याशंक्य वैराग्यद्वारा धीहेतुत्वादित्याह एवमिति ८ ज्ञानस्यांतरंगमेव हेत्वंतरमाह किंचेति नन्वसक्तिरेवाभिष्वंगाभावस्तथा च पुनरुक्तिरित्याशंक्याभिष्वंगोक्तिद्वारा निरस्यति अभिष्वंगो नामेति अन्यस्मिन्नेव पुत्रादावनन्यत्वधिया तद्गते सुखदुःखादावात्मनि तद्भावनाख्यसक्तिविशेषमेवोदाहरति यथेति उक्त

एवं ज्ञानहेतुत्वात् ज्ञानमुच्यते जन्मादिदुःखदोषानुदर्शनं ८ किंच असक्तिरिति असक्तिः सक्तिः संगनिमित्तेषु विषयेषु प्रीतिमात्रं तदभावोऽसक्तिरनभिष्वंगोऽभिष्वंगाभावो अभिष्वंगो नाम सक्तिविशेष एवानन्यात्मभावनालक्षणो यथान्यस्मिन् सुखिनि दुःखिनि वाहमेव सुखी दुःखी च जीवति मृते वाहमेव जीवामि मरिष्यामि चेति

असक्तिरनभिष्वंगः पुत्रदारगृहादिषु नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ९ ॥

क्वेत्याह पुत्रदारगृहादिषु पुत्रेषु दारेषु आदिग्रहणादन्येष्वप्यत्यंतेष्टेषु दासवर्गादिषु तच्चोभयं ज्ञानार्थत्वात् ज्ञानमुच्यते नित्यं च समचित्तत्वं तुल्यचित्तता क्व इष्टानिष्टोपपत्तिषु इष्टानामनिष्टानां चोपपत्तयः संप्राप्तयस्तास्विष्टानिष्टोपपत्तिषु नित्यमेव तुल्यचित्तता इष्टोपपत्तिषु न हृष्यति न कुप्यति चानिष्टोपपत्तिषु तच्चैतन्नित्यं समचित्तत्वं ज्ञानं ९

विशेषणयोराकांक्षाद्वारा विषयमाह क्वेत्यादिना उक्तविशेषणयोर्ज्ञानशब्दस्योपपत्तिमाह तच्चेति सदा हर्षविषाददशून्यमनस्त्वमपि ज्ञानहेतुरित्याह नित्यं चेति तदेव विभजते इष्टेति तस्य ज्ञानहेतुत्वं निगमयति तच्चैतदिति ९

अमानित्वादीनां ज्ञानत्वमुक्त्वा ज्ञातव्यमवतारयति ज्ञेयमिति प्रश्नद्वारा ज्ञेयप्रवचनस्य फलमुक्त्वा प्ररोचनं कृत्वा तेन श्रोतुराभि
मुख्यमापादयितुं प्रवचनफलोक्तिपरमनंतरवाक्यमित्याह किमित्यादिना तदेव विशिनष्टि अनादिमदिति आदिमत्त्वरहित
मआकृतस्यापि नञो विशेषं दर्शयति किं तदिति भोक्तुरपि भोग्यात्परत्वमित्यतो विशिनष्टि ब्रह्मेति अनादीत्येकं पदं मत्पर
मिति चापरमिति पदच्छेदान्न पुनरुक्तिरिति मतांतरमुत्थापयति अत्रेति एकपदत्वसंभवे किमिति पदद्वयमित्याशंक्याह

ज्ञेयमिति ज्ञेयं ज्ञातव्यं यत्तत्प्रवक्ष्यामि प्रकर्षेण यथावद्वक्ष्यामि किं फलं तदिति प्ररोचनेन श्रोतुरभिमुखीकरणायाह
यत् ज्ञेयं ज्ञात्वा अमृतत्वमश्नुते न पुनर्म्रियत इत्यर्थः अनादिमत् आदिरस्यास्तीत्यादिमत् न आदिमत् अनादिमत् किं त
त्परं निरतिशयं ब्रह्म ज्ञेयमिति प्रकृतम् अत्र केचित् अनादिमत्परमिति पदं छिंदंति बहुव्रीहिणोक्तेऽर्थे मतुप आनर्थक्य

ज्ञेयं यत्तत्प्रवक्ष्यामि यत् ज्ञात्वामृतमश्नुते अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ११

मनिष्टं स्यादिति अर्थविशेषं च दर्शयन्तः अहं वासुदेवाख्या परा शक्तिर्यस्य तन्मत्परमिति सत्यमेवमपुनरुक्तं स्यादर्थश्चेत्सं
भवति न त्वर्थः संभवति ब्रह्मणः सर्वविशेषप्रतिषेधेनैव विजिज्ञापयिषितत्वान्न सत्तन्नासदुच्यत इति विशिष्टशक्ति
मत्त्वप्रदर्शनं विशेषप्रतिषेधश्चेति विप्रतिषिद्धं॥

बहुव्रीहिणेति आदिरस्य नास्तीति यो बहुव्रीहिणोक्तोऽर्थस्तस्मिन्नादिम
त्वनिषेधे नास्ति मतुपोऽर्थवत्त्वमिति मतुपानर्थक्यमनिष्टं स्यादिति मत्वा पदं छिंदंतीति पूर्वेणासंबंधः आदिरस्य नास्तीत्य
नादीत्युक्त्वा मत्परमित्युच्यमाने कोऽर्थः स्यादित्याशंक्याह अहमिति उक्तव्याख्यानस्यापुनरुक्तत्वान्नायं पुनरुक्तिसमाधिरित्या
ह सत्यमिति अर्थासंभवं समर्थयते ब्रह्मण इति तथापि विशिष्टशक्तिमत्त्वं किं न स्यादित्याशंक्याह विशिष्टेति॥ ॥

साधनांतरमाह किंचेति आत्मादीत्यादिशब्दः नात्मार्थस्तद्विषयं ज्ञानं विवेकस्तन्नित्यत्वं तन्नैव निष्ठावत्त्वं विवेकनिष्ठो हि वाक्यार्थज्ञाने समर्थो भवति तेषां भावनापरिपाको नाम यत्नेन साधितानां प्रकर्षपर्यंतत्वं तन्निमित्तं तत्वज्ञानमैक्यसाक्षात्कारस्तत्फलालोचनं किमर्थमित्याकांक्षायामाह तत्त्वेति प्रवृत्तिः स्यादित्यतस्तत्वज्ञानार्थदर्शनमर्थवदिति शेषः ज्ञानस्यांतरंगहेतुमुक्तमुपसंहरति एतदिति किमिति तस्य विज्ञेयत्वमित्याशंक्याह परिहरणायेति तत्र हेतुः संसारेति तस्य प्रवृत्तिहेतुत्वात्तत्तद्धेतुत्वान्मानित्वादिसाज्य

किंच अध्यात्मेति अध्यात्मज्ञाननित्यत्वमात्मादिविषयं ज्ञानमध्यात्मज्ञानं तस्मिन्नित्यभावो नित्यत्वममानित्वादीनां ज्ञानसाधनानां भावनापरिपाकनिमित्तं तत्वज्ञानं तस्यार्थो मोक्षः संसारोपरमस्तस्यालोचनं तत्वज्ञानार्थदर्शनं तत्वज्ञानफलालोचने हि तत्साधनानुष्ठाने प्रवृत्तिः स्यादिति एतदमानित्वादि तत्वज्ञानार्थदर्शनांतमुक्तं ज्ञानमिति प्रोक्तं ज्ञानार्थत्वात् अज्ञानं यदतोस्माद्यथोक्तादन्यथा विपर्ययेण मानित्वं दंभित्वं हिंसाऽक्षांतिरनार्जवमित्याद्यज्ञानं विज्ञेयं परिहरणायेति

अध्यात्मज्ञाननित्यत्वं तत्वज्ञानार्थदर्शनं एतत् ज्ञानमिति प्रोक्तमज्ञानं यदतोन्यथा ११

सारप्रवृत्तिकारणत्वादिति ११ यथोक्तेन ज्ञानेन ज्ञातव्यं किमित्याकांक्षायामाह ज्ञेयं यत्तदित्यादि ननु यमानियमा अमानित्वादयो नैते ज्ञेयं ज्ञापयंते न ह्यमानित्वादिकस्य चिद्वस्तुनः परिच्छेदकं दृष्टं सर्वत्रैव यद्विषयं ज्ञानं तदेव तत्स्वरूपस्य परिच्छेदकं दृश्यते न ह्यन्यविषयेण ज्ञानेनान्यदुपलभ्यते यथा घटविषयेण ज्ञानेनाग्निर्नैष दोषः ज्ञानं निमित्तत्वाज्ज्ञाने च स्यादन्यत्वं तेन न तस्य ज्ञेयत्वेत्यर्थः इति शब्दः साधनाधिकारसमाप्त्यर्थः ११ उत्तर ॥ न ज्ञानमुच्यत इत्येवं वाम ज्ञानसहकारित्वं ग्रंथमवतारयति यथोक्तेनेति अमानित्वादीनां ज्ञानत्वमाक्षिपति नन्विति वस्तुपरिच्छेदकत्वात् ज्ञानत्वमाशंक्याह नहीति परिच्छेदकत्वात् ज्ञानत्वं ज्ञानत्वात्परिच्छेदकत्वमित्यन्योन्याश्रयादित्यभिप्रेत्याह सर्वत्रेति स्वार्थस्यैव ज्ञानं परिच्छेदकमित्येतद्व्यतिरेकदृष्टांतं दर्शयति नहीति व्यतिरेकदृष्टांतमाह यथेति अमानित्वादीनां [illegible] नैष दोष इति तत्र हेतुत्वेनोक्तं सारय

[illegible] ज्ञानफले [illegible] ज्ञानेति॥

अस्तिशब्दावाच्यत्वादवस्तुत्वप्रसंगेऽस्य तदप्रयोजकत्वमाह नतावदिति नास्तिवुद्धिविषयत्वमेवावस्तुत्वे निमित्तमतस्तदभावाद्ब्रह्मणो
नावस्तुत्वमित्येतदेवव्यक्तीकर्तुंचोदयति नन्विति सर्वासांधियामस्तिधीत्वेननास्तिधीत्वेनवानुगतत्वेऽन्यतरधीगोचरत्वाभावेब्रह्म
णोनिर्वाच्यंदुर्वारमितिफलितमाह नचेति ब्रह्मणोघटादिवैलक्षण्यादुभयवुद्ध्यविषयत्वेऽपिनानिर्वाच्यतेत्याह नेत्यादिना घ
टादेरिंद्रियग्राह्यस्योभयवुद्धिविषयत्वेऽपिब्रह्मणस्तदग्राह्यस्यनोभयधीविषयत्वंतथापिनानिर्वाच्यत्वंसच्चिदेकतानस्य

नतावन्नास्तिनास्तिवुध्यविषयत्वान्न ननुसर्वावुद्धयोऽस्तिनास्तिवुद्ध्यनुगताएवतत्रैवंसतिज्ञेयमप्यस्तिवुध्यनुग
तप्रत्ययविषयंवास्यान्नास्तिवुध्यनुगतप्रत्ययविषयंवास्यान्नातींद्रियत्वेनोभयवुध्यनुगतप्रत्ययाविषयत्वा
द्यदींद्रियगम्यंवस्तुघटादिकंतदस्तिवुध्यनुगतप्रत्ययविषयंवास्यान्नास्तिवुध्यनुगतप्रत्ययविषयंवाइदंतुज्ञे
यमतींद्रियत्वेनशब्दैकप्रमाणगम्यत्वान्नघटादिवदुभयवुध्यनुगतंचप्रत्ययविषयमित्यतोनसत्तन्नासदित्यु त
च्यतेयत्तूक्तंविरुद्धमुच्यतेज्ञेयंतन्नसत्तन्नासदुच्यतइतिनविरुद्धमन्यदेवतद्विदितादथोअविदितादधी
तिश्रुतेः श्रुतिरपिविरुद्धार्थेतिचेद्यथायज्ञायशालामारभ्यकोहितद्वेदयद्यमुष्मिंल्लोकेऽस्तिवानवेतीत्येव
मितिचेत्॥ ॥

शब्दप्रमाणादविषयत्वेनदृष्टत्वादित्युक्तमेवप्रपंचयति यद्धीति परोक्तंविरोधमनुवदति यत्त्विति श्रुत्य
वष्टंभेननिराचष्टे नविरुद्धमिति साऽपिविरुद्धार्थत्वान्नमानंवोधकत्वस्याविरोधापेक्षत्वादितिशंकते श्रुतिरिति नस्याविरुद्धा
र्थत्वेनाप्रामाण्येदृष्टांतमाह यथेति प्राचीनवंशंकरोतीतिपारलौकिकफलयज्ञानुष्ठानार्थंशालानिर्माणंप्रस्तुत्यकोहितद्वेदे
त्याद्यापरलोकसत्वेसंदिहानायथाविरुद्धार्थाश्रुतिरप्रमाणमेवंविदिताविदितान्यत्वश्रुतिरपीत्यर्थः

तथापि मतुपो बहुव्रीहिणा तुल्यार्थस्य कथं नानर्थक्यं तत्राह तस्मादिति अनादिमत्परं ब्रह्मेत्यत्र पक्षान्तरं प्रतिक्षिप्य स्वपक्षः समर्थितः संप्रति ब्रह्मणो ब्रह्मत्वादेवं कार्यकारणात्मकत्वप्राप्तावुक्तानुवादद्वारा न सदित्याद्यवतारयति अमृतत्वेति सत्कार्यमभिव्यक्तनामरूपत्वादसत्कारणं तद्विपर्ययादिति विभागः ज्ञेयप्रवचनमनिर्वाच्यविषयत्वादुपक्रमप्रतिकूलमित्याक्षिपति नन्विति निर्विशेषस्य वस्तुनो ज्ञेयत्वात्तद्विषयं प्रवचनं प्रक्रमानुकूलमित्युत्तरमाह नेत्यादिना अनिर्वाच्यत्वेन सत्तन्नासदित्युच्यमाने कथमिदमनुरूपमिति

तस्मान्मतुपो बहुव्रीहिणा समानार्थत्वेपि प्रयोगः श्लोकपूरणार्थः अमृतत्वफलं ज्ञेयं मयोच्यत इति प्ररोचनेनाभिमुखीकृत्याह न सत्तत् ज्ञेयमुच्यते विधिमुखेन इति नाप्यसत्तदुच्यते ननु महता परिकरबंधेन कंठरवेणोद्घुष्य ज्ञेयं प्रवक्ष्यामीत्यननुरूपमुक्तं न सत्तन्नासदुच्यते इति न अनुरूपमेवोक्तं कथं सर्वासु ह्युपनिषत्सु ज्ञेयं ब्रह्म नेति नेत्यस्थूलमनणिवत्यादिविशेषप्रतिषेधेनैव निर्दिश्यते नेदं तदिति वाचो गोचरत्वा। प्रति.वि त्ननु तदस्ति यद्वस्त्वस्तिशब्देनोच्यते अथास्तिशब्देन नोच्यते नास्ति तत् ज्ञेयं विरुद्धं च ज्ञेयं तदस्त्यस्तिशब्देन नोच्यत इति च॥

ब्रह्मात्मप्रकाशस्य सिद्धत्वात्तदर्थं विधिमुखेनोपदेशायोगाद्दृश्यत्वात्तद्धर्मनिह्नुतये निषेधद्वारोपदेशस्य वेदान्तेषु प्रसिद्धेरारोपितविशेषनिषेधरूपमिदं प्रवचनमुचितमितिपरिहरति सर्वास्विति ज्ञेयस्य ब्रह्मणो विधिमुखोपदेशायोगे हेतुमाह वाच इति ब्रह्मणोऽस्तिशब्दावाच्यत्वेनरविषाणवन्नास्तित्वमित्यनिष्टमाशंकते नन्विति एवमुत्सर्गेपि ब्रह्मणि किमायातमित्याशंक्याह अथेति ज्ञेयस्यास्तिशब्दावाच्यत्वे व्याघातश्चेत्याह विप्रतिषिद्धं चेति॥ ० ॥ ० ॥

सर्वविशेषरहितस्यात्मनोऽसंगो चास्य स्वरक्षैः दृष्टेश्च विपरीतस्य प्राप्तेर्ब्रह्मणः अन्यत्वे प्रत्यक्षेनेंद्रियप्रवृत्त्यादिहेतुत्वेन कल्पितद्वैत सत्तास्फूर्तिप्रदत्वेन च सत्त्वं दर्शयन्नादौ देहादीनां प्रवृत्तिमत्तां रथादिवच्चेतनानां प्रेक्षापूर्वकप्रवृत्तिमत्त्वाच्चेतनाधिष्ठितत्वमनुमिमान स्तत्प्रसक्तं चेतनं ब्रह्मेत्याह सर्वत इति तदस्तित्वमिति तच्छब्दो ज्ञेयब्रह्मार्थः तदाशंकेति तच्छब्देनासत्त्वमुच्यते ननु सर्वदेहेषु पाणि पादमस्येति कथं पाणीनां च पादानां च देहस्थत्वेनात्मधर्मत्वं तत्राह सर्वेति करणप्रवृत्तिरथादिप्रवृत्तिवत्प्रेक्षापूर्वकत्वाच्चेतना

सच्छब्दप्रत्ययाविषयत्वादसत्त्वाशंकायां ज्ञेयस्य सर्वप्राणिकरणोपाधिकरणोपाधिद्वारेणतदस्तित्वं प्रतिपादयस्तदाशं कानिवृत्त्यर्थमाह सर्वत इति सर्वतः पाणिपादं तत्सर्वत्र पाणयः पादाश्चास्येति सर्वतः पाणिपादं तत् ज्ञेयं सर्वप्राणिक

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखं सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति १३

रणोपाधिभिः क्षेत्रज्ञास्तित्वं विभाव्यते क्षेत्रज्ञश्च क्षेत्रोपाधित उच्यते क्षेत्रं च पाणिपादादिभिरनेकधा भिन्नं क्षेत्रोपाधि भेदकृतं विशेषजातं मिथ्यैव क्षेत्रज्ञस्येति तदपनयनेन ज्ञेयत्वमुक्तं न सत्तन्नासदुच्यते इति उपाधिकृतं मिथ्यारूपम प्यस्तित्वाधिगमाय ज्ञेयधर्मवत्परिकल्प्योच्यते सर्वतः पाणिपादमित्यादि॥

विद्यात्पूर्विकेत्यर्थः उक्तप्रवृत्त्या चेतनास्तित्वसिद्धावपि कथं क्षेत्रज्ञास्तित्वमित्याशंक्य चेतनस्यैव क्षेत्रोपाधिना क्षेत्रज्ञत्वाच्चेतना स्तित्वं तदस्तित्वमेवेत्याह क्षेत्रज्ञश्चेति तस्य क्षेत्रोपाधित्वेपि कथं पाणिपादाक्षिशिरोमुखादिमत्त्वमित्याशंक्याह क्षेत्रं चेति क्ष त्रस्योपाधित्वात्तस्मिन्विशेषोक्तिरिति भावः कथं तर्हि न सत्तन्नासदिति निर्विशेषत्वोक्तिरित्याशंक्याह क्षेत्रेति पाणिपादादि मत्त्वमौपाधिकं मिथ्या चेत् ज्ञेयप्रवचनाधिकारे कथं तदुक्तिरित्याशंक्याह उपाधीति॥

नेयंश्रुतिर्विरुद्धार्थत्वेनाऽमानं तया ह्यात्मा ब्रह्मण्यद्वितीये प्रयुक्तप्रतिपादनेन मानत्वादित्युत्तरमाह नविदितेति यत्तु विरुद्धार्थत्वे
कोहीत्युदाहृतं तत्तदर्थवादस्य विधिशेषस्य स्वार्थे तात्पर्यादित्याह यदीति अत्र जात्यादिमत्त्वे तत्र वाच्यत्वं यथा गवादेर्न ब्रह्म
णो जात्यादिमत्त्वमतस्तस्यावाच्यत्वान्निषेधेनैवबोध्यत्वमित्याह उपपद्यते चेति नोच्यत इति निषेधेनैवतस्योपदेश इति शेषः
जात्यादिमतोऽर्थस्यैव वाच्यत्वेन तत्रैव संगतिग्रहादिति प्रपंचयति सर्वो हीति अश्रुतस्य जात्यादिद्वारेणाज्ञातसंगतेर्वा

नविदिताविदिताभ्यामन्यत्वश्रुतेरवश्यविज्ञेयार्थप्रतिपादनपरत्वाद्यथायमुष्मिन्नित्यादि तु विधिशेषोऽर्थवाद उप
पत्तेश्च सदादिशब्दैर्ब्रह्म नोच्यत इति सर्वो हि शब्दोऽर्थप्रकाशनाय प्रयुक्तः श्रूयमाणश्च श्रोतृभिर्जातिक्रियागु
णसंबंधद्वारेण संकेतग्रहणसव्यपेक्षोऽर्थं प्रत्याययति नान्यथादृष्टत्वात्तद्यथा गौरश्व इति वा जातितः प
चति पठतीति क्रियातः शुक्लः कृष्ण इति वा गुणतो धनी गोमानिति संबंधतो न तु ब्रह्म जातिमदतो न स
दादिशब्दवाच्यं नापि गुणवद्येन गुणशब्देनोच्येत निर्गुणत्वान्नापि क्रियाशब्दवाच्यं निःक्रियत्वान्निःकलं
निःक्रियं शांतमिति श्रुतेः न च संबंध्येकत्वादद्वयत्वादविषयत्वादात्मत्वाच्च न केनचिच्छब्देनोच्यत इति युक्तं य

शब्दस्य न बोधकत्वमर्हतीत्याह नान्यथेति जात्यादेः सच्छब्दविषयत्वमुदाहरति त ॥ तोवाचोनिवर्त्तंत इत्यादिश्रुतिभ्यश्च १२
ऽश्वेत्यादिना ब्रह्मणस्त्वगोत्रत्वमवर्णत्वमित्यादिश्रुतेः जात्यादिमत्त्वाभावान्न शब्दवाच्यतेत्याह नापीति केवलो निर्गुणश्चेति
श्रुतेर्गुणद्वारा ब्रह्मणो न वाच्यतेत्याह नापीति निष्क्रियत्वे मानमाह निःकलमिति ब्रह्मणोऽद्वितीयत्वस्याशेषोपनिषत्सिद्धत्वा
द्विशिष्टस्य संबंधस्य तस्मिन्नसिद्धेर्न तद्द्वारापि तस्य वाच्यतेत्याह नचेति ब्रह्मणोऽभिधावृत्त्या शब्दावाच्यत्वे हेत्वंतराण्याह अद्वय
त्वादिति ब्रह्मणोऽवाच्यत्वे श्रुतिमपि संवादयति यत इति १२

आरोपादृते साक्षादेव ज्ञेयस्य पाण्यादिमत्त्वमाशंक्याह उपाधीति इंद्रियविशेषणीभूतं सर्वशब्दात् ज्ञेयोपाधित्वन्यायाविशेषाच्चात्र बुद्ध्यादेरपि ग्रहणमित्याह अंतःकरणे चेति श्रोत्रादीनां ज्ञेयोपाधित्वस्य मनोबुद्धिद्वारत्वादर्पितयोरिह ग्रहणमित्याह अपि चेति तयोरपीहोपादाने फलितमाह इत्यत इति अक्षरार्थमुक्त्वा वाक्यार्थमाह सर्वेति उपाधिद्वारा कल्पितव्यापारवत्त्वे मानमाह ध्यायतीति कल्पितमेवास्य व्यापारवत्त्वं न वास्तवमित्यत्र भगवतोऽपि संमतिमाकांक्षाद्वारा दर्शयति कस्मादित्यादिना सर्वकरणराहित्ये फल

उपाधिभूतं पाणिपादादींद्रियाध्यारोपणात् ज्ञेयस्य तद्वत्ताशंकामाभूदित्येवमर्थः श्लोकारंभः सर्वेंद्रियेति सर्वेंद्रियगुणाभासं सर्वाणि च तानींद्रियाणि श्रोत्रादीनि बुद्धींद्रियकर्मेंद्रियाख्यान्यंतःकरणे च बुद्धिमनसी ज्ञेयोपाधित्वस्य तुल्यत्वात् सर्वेंद्रियग्रहणेन गृह्येते अपि चांतःकरणोपाधिद्वारेणैव श्रोत्रादीनामपि उपाधित्वमित्यतोऽन्तःकरणबहिःकरणोपाधिभूतैः सर्वेंद्रियगुणैरध्यवसायसंकल्पश्रवणवचनादिभिरवभासत इति सर्वेंद्रियगुणाभासं सर्वेंद्रियव्यापारैर्व्यापृतमिव तत् ज्ञेयमि

सर्वेंद्रियः गुणाभासं सर्वेंद्रियविवर्जितं असक्तं॥ ० ॥ ० ॥

त्यर्थः ध्यायतीव लेलायतीवेति श्रुतेः कस्मात्पुनः करणान्व्यापृतमेवेति गृह्यत इत्यत आह सर्वेंद्रियविवर्जितं सर्वकरणरहितमित्यर्थः अतो न करणव्यापारैर्व्यापृतं तत् ज्ञेयं यत्त्वयं मंत्रोऽपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्ण इत्यादिः सर्वेंद्रियोपाधिगुणानुगुण्यभजनशक्तिमत्तत् ज्ञेयमित्येवं प्रदर्शनार्थः न तु साक्षादेव जवनादिक्रियावत्त्वप्रदर्शनार्थः अंधो मणिमविंददित्यादिमंत्रार्थवत्तस्य मंत्रस्यार्थो यस्मात्सर्वकरणवर्जितं ज्ञेयं तस्मादसक्तं सर्वसंश्लेषवर्जितं॥ ॥

माह अत इति साक्षादेव ज्ञेयस्य वेगवद्ग्रहीत्रादिक्रियावत्तापामात्रविशेषकत्वात्कुतोऽस्य करणैर्व्यापारैर्व्यापृतत्वमित्याशंक्यानुवादरूपत्वं मंत्रस्य प्रकृतानुगुणत्वमाह पश्यतीति करणगुणानुगुण्यभजनमंतरेण साक्षादेव जवनादिक्रियावत्त्वप्रदर्शनपरत्वे मंत्रस्य मुख्यार्थत्वं स्यादित्याशंक्यान्तरसंभवान्नैवमित्याह अंध इति अर्थवादस्य श्रुतेस्तात्पर्याभावान्न प्रतिकूलतेत्यर्थः सर्वकरणराहित्येन व्यापारराहित्यस्योपलक्षणमित्यसंगोक्त्योक्तमेवेह तूक्त्वा वस्तुतः सर्वसंगवर्जितत्वमाह

[illegible]

मिथ्यारूपमपिज्ञेयवस्तुज्ञानोपयोगीत्यत्रवृद्धसंमतिमाह तथाहीति पाणिपादादीनामन्यगतानामात्मधर्मत्वेनारोप्यव्यपदेशे कोहेतुरितिचेत्तत्राह सर्वत्रेति ज्ञेयस्यब्रह्मणःशक्तिसन्निधिमात्रेणप्रवर्त्तनसामर्थ्यंतत्सत्वनिमित्तीकृत्यस्वकार्यवंतोभवंति पाणिपादवदितिकृत्वेतियोजना सर्वतोक्षीत्यादावुक्तमतिदिशति तथेति तत्ज्ञेयंयथासर्वतःपाणिपादमितिव्याख्यातंतथे

तथाहिसंप्रदायविदांवचनमध्यारोपापवादाभ्यांनिःप्रपंचंप्रपंच्यतइति सर्वत्रसर्वदेहावयवत्वेनगम्यमानाः पाणिपादादयोज्ञेयशक्तिसद्भावनिमित्तस्वकार्याइतिज्ञेयसद्भावेलिंगानिज्ञेयस्येत्युपचारतउक्तंतेतथा व्याख्येयमन्यत्सर्वतःपाणिपादंतत्ज्ञेयंसर्वतोक्षिशिरोमुखं सर्वतोक्षीणिशिरांसिमुखानिचयस्यतत् सर्वतोक्षिशिरोमुखं सर्वतश्रुतिमच्छ्रुतिःश्रवणेंद्रियंतद्यस्यतत्श्रुतिमल्लोकेप्राणिनिकाये सर्वमावृत्यसंव्याप्यतिष्ठतिस्थितिंलभते १३

त्युक्तमेवस्फुटयति सर्वतइति सर्वतोक्षीत्यादेरक्षरार्थमाह सर्वतोक्षीति अक्षिश्रवणवत्वमविशिष्टज्ञानेंद्रियवत्वस पाणिपादमुखवत्वंचाविशिष्टकर्मेंद्रियवत्वस्यमनोबुद्ध्यादिमत्वस्यचोपलक्षणं एकस्यसर्वत्रपाणिपादिमत्वंसाधयति सर्वमिति १३

प्राणिभ्यो

इतोपि ज्ञेयं ब्रह्मास्तीत्यास्तीत्याह किंचेति बहिरित्यारभ्येयमादाय व्याचष्टे त्वमिति भूतेभ्यो बहिर्बाह्यं विषयाद्यात्मकमित्यर्थः
कथमनात्मन एवात्मत्वं कल्प्यते येत्याह आत्मत्वेनेति अंतः शब्दार्थमाह तथेति भूतानां चराचराणामंतर्मध्ये प्रत्यग्भूतमि
त्यर्थः द्वितीयं पादमवतार्य व्याचष्टे बहिरित्यादिना यन्मध्ये भूतात्मकं नानाविधदेहात्मनाभासमानं तदपि ज्ञेयांतर्भूतं तेन तत्त्व
सदित्यर्थः कथं चराचरात्मनो भूतजातस्य ज्ञेयत्वं तत्राह यथेति अधिष्ठाने रज्ज्वां कल्पितसर्पादेस्तदंतर्भाववद्देहाभासस्यापि
ज्ञेयांतर्भावान्नासत्वमध्यज्ञेयस्य सिद्धं तद्व्यमित्यर्थः सर्वात्मकं चेत् ज्ञेयं सर्वैरिदमिति किमिति गृह्यते इति शंकते यदीति ३ ना

किंच बहिरंतरिति बहिस्त्वक्पर्यंतं देहमात्मत्वेनाविद्याकल्पितमपेक्ष्य तमेवावधिं कृत्वा बहिरुच्यते तथा प्रत्य
गात्मानमपेक्ष्य देहमेवावधिं कृत्वांतरुच्यते बहिरंतश्चेत्युक्ते मध्ये अभावे प्राप्त इदमुच्यते चरं चरमेव च यच्चराच
रं देहाभासमपि तदेव ज्ञेयं यथा रज्जुसर्पाभासं यदि चरं चरमेव च व्यवहारविषयं सर्वं ज्ञेयं किमर्थमिदमिति सर्वैर्न वि

बहिरंतश्च भूतानामचरं चरमेव च सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत् १५

ज्ञेयमित्युच्यते सत्त्वं सर्वावभासं तत्तथापि व्योमवत्सूक्ष्मम् अतः सूक्ष्मत्वात्स्वेन रूपेण तत् ज्ञेयमप्यविज्ञेयमविदु
षां विदुषां त्वात्मैवेदं सर्वं ब्रह्मैवेदं सर्वमित्यादिप्रमाणतो नित्यं विज्ञातम् अविज्ञाततया दूरस्थं वर्षसहस्रकोप्य ट्या
दमिति ग्राह्यत्वयोग्यत्वाभावान्नेत्याह उच्यत इति सर्वं वस्त्वात्मनाभास ॥ विदुषामप्राप्यत्वादंतिके च तदात्मत्वाद्विदुषां १५
तत्त्वदयोग्यत्वं कथमित्याशंक्याह सत्त्वमिति सूक्ष्मत्वेपि किं स्यादित्याशंक्याह अत इति सूक्ष्मत्वमतींद्रियत्वं तस्यावि
ज्ञेयत्वे कुतस्तज्ज्ञानान्मुक्तिस्तत्राह अविदुषामिति विशेषणफलमाह विदुषां त्विति तेषामात्मत्वेन ज्ञातं चेत्कथं
दूरस्थत्वमित्याशंक्याह अविज्ञाततयेति कथं तर्हि तस्य प्रत्यक्त्वं तत्राह अंतिके चेति विद्वदविद्वद्भेदापेक्षया दूरस्थत्वदू
रे तदिहांतिके चेति श्रुतिः तदर्थोत्र प्रसंगादनूदित इत्यर्थः १५

वस्तुतः सर्वसंगाभावेपि सर्वाधिष्ठानत्वमाह यद्यपीति स्वसत्तामात्रेणाधिष्ठानतया सर्वं पुष्णातीत्येतदुपपादयति सदिति विमतं सति कल्पितं प्रत्येकं सदनुविद्धधीबोध्यत्वात् प्रत्येकं चंद्रानुविद्धधीबोध्यचंद्रभेदवदित्यर्थः सर्वं सदास्पदमित्यप्युक्तं

यद्यप्येवं तथापि सर्वभृच्चैव सदास्पदं हि सर्वं सर्वत्र सदनुबुद्ध्यनुगमान्न हि मृगतृष्णिकादयोपि निरास्पदा भवंत्यतः सर्वभृत् सर्वं बिभर्तीति स्यादिदं चास्मन्मते यस्य सत्त्वाधिगमद्वारं निर्गुणं सत्त्वरजस्तमांसि गुणास्तै

सर्वभृच्चैव निर्गुणं गुणभोक्तृ च १४ ॥

त र्वर्जितं तज्ज्ञेयं तथापि गुणभोक्तृ च गुणानां सत्त्वरजस्तमसां शब्दादिद्वारेण सुखदुःखमोहाकारपरिणतानां भोक्तृ चोपलब्धृ तत् ज्ञेयमित्यर्थः १४

मृगतृष्णिकादीनां तदभावादित्याशंक्याह नहीति तेषामपि कल्पितत्वेन निरधिष्ठानत्वायोगान्निरूप्यमाणेत्तदधिष्ठानं सदेवेति सर्वस्य सति कल्पितत्वमित्यर्थः सर्वाधिष्ठानत्वेन ज्ञेयस्य ब्रह्मणोऽस्तित्वमुक्तमुपसंहरति अतइति इतश्च ज्ञेयं ब्रह्मास्तीत्याह स्यादिदं चेति नहि तस्योपलब्धृत्वमसत्त्वे सिध्यतीत्यर्थः १४

उत्तरार्द्धस्यतात्पर्यमाह ज्ञानादेरिति उक्तं भक्तमुद्दीपनंप्रकटीकरणमितियावत् ज्ञानममानित्वादिकरणाद्युतज्ञेतिशेषः ज्ञानगम्यंज्ञेयमितिपुनरुक्तिंशंकित्वोक्तं ज्ञेयमिति उक्तत्रयस्यबुद्धिस्थतयाप्राकट्यंप्रकटयति तदेतदिति १७ तत्रानुभवमनुकूलयति तत्रैवेति त्वमर्थमुक्तार्थंसविकारंक्षेत्रंपदवाच्यार्थंविवेकसाधनंचामानित्वादितत्पदार्थंचशुद्धंतन्द्रावोक्तमर्थमुक्त्वातेषांफलमुपसं

ज्ञानमिति ज्ञानादेर्दुःसंपादनबुद्ध्याप्राप्तावसादस्योत्तंभनार्थमाह ज्ञानममानित्वादिज्ञेयंयत्तत्प्रवक्ष्यामीत्यादिनोक्तंज्ञानगम्यंज्ञेयमेवसत्ज्ञानफलमितिज्ञानगम्यमुच्यते ज्ञायमानंतुज्ञेयंतदेतत्त्रयमपिहृदिबुद्धौसर्वस्यप्राणिजातस्यधिष्ठितंविशेषेण स्थितं १७ तत्रैवहित्रयंविभाव्यते यथोक्तार्थोपसंहारार्थोयंश्लोकआरभ्यते इतिक्षेत्रमिति इत्येवंक्षेत्रंमहाभूतादिधृत्यंतंतथाज्ञानममानित्वादितत्वज्ञानार्थदर्शनपर्यंतंज्ञेयंचज्ञेयंयत्तदित्यादितमसःपरमुच्यतइत्येवमंतमुक्तंसमा

ज्ञानंज्ञेयंज्ञानगम्यंहृदिसर्वस्यधिष्ठितं १७ इतिक्षेत्रंतथाज्ञानंज्ञेयंचोक्तंसमासतः मद्भक्तएतद्विज्ञायमद्भा

सतःसंक्षेपतएतावान्सर्वोहिवेदार्थोगीतार्थश्चोपसंहृत्योक्तोस्मिन्सम्यक्दर्शनेकोधिक्रियते॥वायोपपद्यते १८

तइत्युच्यते मद्भक्तोमयीश्वरेसर्वज्ञेपरमगुरौवासुदेवेसमर्पितसर्वात्मभावोयत्पश्यतिशृणोतिस्पृशतिवासर्वमेवभगवान्वासुदेवइत्येवंग्रहाविष्टबुद्धिर्मद्भक्तःसएतद्यथोक्तंसम्यक्दर्शनंविज्ञायमद्भावायममभावोमद्भावःपरमात्मभावस्तस्मैपरमात्मभावायोपपद्यते मोक्षंगच्छति १८ तत्रसप्तमेईश्वरस्यद्वेप्रकृतीउपन्यस्तेपरापरेक्षेत्रक्षेत्रज्ञलक्षणे॥

घो

हरति यथोक्तेति पूर्वार्द्धंविभजते इत्येवमिति वक्तव्यांतरेसतिकिमितित्रितयमेवसंहृतंतत्राह एतावानिति उत्तरार्द्धमाकांक्षाद्वाराऽवतारयति अस्मिन्निति ईश्वरेसमर्पितसर्वात्मभावमेवाभिनयति यत्पश्यतीति विज्ञायलब्ध्वेत्यर्थः १८ प्रकृतिमित्यादिवक्ष्यमाणानंतरग्रंथसंबंधीत्याशंक्याव्यवहितेनसंबंधार्थंव्यवहितमनुवदति तत्रेति॥ ऽ ॥ ऽ ॥

ज्ञेयस्यास्तित्वे हेत्वन्तरमाह किंचेति तद्धि प्रतिदेहं नभोवदेकं तद्भेदे मानाभावात् भिन्नत्वे च घटवदनात्मत्वापातादतोऽद्वितीयं सर्वत्र प्रत्यग्भूतं ज्ञेयं नास्तीत्यतिसाहसमित्याह अविभक्तं चेति कथं तर्हि देहादिभेदधीरित्याशङ्क्य कल्पनयेत्याह भूतेष्विति तत्र हेतुः देहेष्विति कार्याणां स्थितिहेतुत्वाच्च ज्ञेयमस्तीत्याह भूतेति निमित्तोपादानतया तेषां प्रलये प्रभवे च कारणत्वाच्च तदस्तीत्याह प्रलयेति तर्हि कार्यकारणत्वस्य वस्तुत्वान्नाद्वैतमित्याशङ्क्याह ग्रसेति १६ इतोपि ज्ञेयस्यास्तित्वमित्याह

किंच अविभक्तमिति अविभक्तं च प्रतिदेहं व्योमवत्तदेकं भूतेषु सर्वप्राणिषु विभक्तमिव च स्थितं देहेष्वेवं विभाव्यमानत्वात् भूतभर्तृ च भूतानि बिभर्तीति तत् ज्ञेयं भूतभर्तृ च स्थितिकाले प्रलयकाले ग्रसिष्णु ग्रसनशीलं उत्पत्तिकाले प्रभविष्णु च प्रभवनशीलं यथा रज्ज्वादिः सर्पादेर्मिथ्याकल्पितस्य १६ किंच सर्वत्र विद्यमानं सन्नोपलभ्यते चेत् तज्ज्ञेयं तम

अविभक्तं च भूतेषु विभक्तमिव च स्थितं भूतभर्तृ च तत् ज्ञेयं ग्रसिष्णु प्र
भविष्णु च १६ ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते॥ ॥

स्तर्हि न किं तर्हि ज्योतिषामपीति ज्योतिषामादित्यादीनामपि तत् ज्ञेयं ज्योतिरात्मचैतन्यं ज्योतिः येन ज्योतिषेद्धानि हि दीप्यन्ते येन सूर्यस्तपति तेजसेद्धः तस्य भासा सर्वमिदं विभातीत्यादिश्रुतिभ्यः स्वतेजःप्रदादिस्वगतं तेजइत्यादि तमसोज्ञानात्परमस्पृष्टमुच्यते॥

किंचेति हेत्वन्तरमेव स्फोरयितुं शङ्कयति सर्वत्रेति ननु तमोमेनतव्यमित्याह नेति तर्हि किं तत्स्वरूपमिति पृच्छति किं तर्हीति तत्रोत्तरं ज्योतिषामिति सूर्यादीनां बुद्धीनां च प्रकाशकत्वादस्ति ज्ञेयं ब्रह्मेत्याह ज्योतिषामिति तदेवोपपादयति तदेवोपपादयति आत्मेति तत्र श्रुतिरूपं प्रमाणयति येनेति उक्तार्थे वाक्यशेषमपि दर्शयति स्वतेजसेति तेषु सातमसोपि तमसास्पृष्टत्वमाहं कोक्तं तमस इति॥

वंध वंधमोक्षाभावः

किंचकार्यत्वेप्रकृत्योस्तदुत्पत्तेःप्राक्संबंधाभावेतद्भिन्नैवात्मनोमोक्षस्याभावात्कदाचिदुभयाभावेपुनस्तदप्रसंगात्प्रकृतिरूपस्यकार्यत्वेना ह बंधेति प्रकृत्योर्मूलकारणत्वेनानुपपत्तिरित्याह नित्यत्वइति स्वपक्षेदोषाभावंप्रश्नपूर्वकंप्रपंचयति कथमित्यादिना संभवः सत्ताप्रापकोहेतुः प्रकृतेरनादित्वेविकाराणांगुणानांचतत्कार्यत्वादात्मनोनिर्विकारत्वंनिर्गुणत्वंचसिध्यतीतिभावः १९ विका

२३१

बंधमोक्षाभावप्रसंगाच्चनित्यत्वेपुनरीश्वरप्रकृत्योःसर्वमेतदुपपन्नंभवेत्कथंविकारांश्चगुणांश्चैववक्ष्यमाणान्बुद्ध्यादिदेहेंद्रियांतान्गुणांश्चसत्त्वदुःखमोहप्रत्ययाकारपरिणतान्विद्धिजानीहिप्रकृतिसंभवान्प्रकृतिरीश्वरस्यविकारकारणशक्तिस्त्रिगुणात्मिकामायासासंभवोयेषांविकाराणांगुणानांचतान्विकारान्गुणांश्चविद्धिजानीहिप्रकृतिसंभवान्प्रकृतिपरिणामान् १९ केपुनस्तेविकारागुणाश्चप्रकृतिसंभवाः कार्येति कार्यकरणकर्तृत्वेकार्यंशरीरंकर

कार्यकरणकर्तृत्वेहेतुःप्रकृतिरुच्यते॥ ॥

णानितत्स्थानित्रयोदशदेहस्यारंभकाणिभूतानिविषयाश्चप्रकृतिसंभवाविकाराःपूर्वोक्ताइहकार्यग्रहणेनगृह्यंतेगुणाश्चप्रकृतिसंभवाःसुखदुःखमोहात्मकाःकरणाश्रयत्वात्करणग्रहणेनगृह्यंतेतेषांकार्यकरणानांकर्तृत्वमुत्पादकत्वंयत्तत्करणकर्तृत्वंतस्मिन्कार्यकरणकर्तृत्वेहेतुःकारणमारंभकत्वेनप्रकृतिरुच्यते॥ ॥

संका
आकाशादीनां

राणांगुणानांप्रकृतेश्चस्वरूपमाकांक्षाद्वारानिर्णेतुमुत्तरश्लोकःसर्वार्धंपातयति केपुनरिति पुरुषस्यानादित्वकृतंबंधहेतुत्वमाह पुरुषइति पूर्वार्धंव्याचष्टे कार्यमित्यादिना ज्ञानेंद्रियपंचकंकर्मेंद्रियपंचकंमनोबुद्धिरश्चेति त्रयोदशकरणानि तथापिभूतानांविषयाणांचाग्रहणात्कथंतेषांप्रकृतिकार्यतेत्याशंक्याह देहेति तथापिगुणानामिहाग्रहणात्प्रकृतिकार्यत्वंतत्राह गुणाश्चेति॥

तयोश्च प्रकृत्योरुक्तं भूतकारणत्वमित्याह एतदिति भूतानामिवं प्रकृत्योरपि प्रकृतत्वं तदपेक्षयानवस्थानान्न भूतयोनित्वेति शंक
ते द्वेचेति तथाकृताभ्यागमादिकारणायेवं बंधस्य निदाने ज्ञानार्थमात्मनो विक्रियादिदोषनिरासार्थं च प्रकृतिपुरुषयोरनादित्वसे
अत्वेनोक्तं प्रकृतिप्रकृतिविकारभावं वर्दर्शयति अपरेयइति स च योपत्व भावश्चेत्युद्दिष्टं व्याचष्टे प्रकृतिमिति ईश्वरस्याः
पराप्रकृतिरत्र प्रकृतिशब्देनोक्ता परा तु प्रकृतिर्जीवाख्या पुरुषशब्देन विवक्षितेति व्याकरोति ईश्वरस्येति तयोरनादित्वमुपपा
दयति नेत्यादिना तत्र युक्तिमाह नित्येश्वरस्येति ईश्वरस्योक्तप्रकृतिद्वयवत्त्वं कथमित्याशंक्याह प्रकृतीति तस्य जगज्जन्मा

संप्रति सात्विकं त्यागं प्रश्नपूर्वकं वर्णयति कःपुनरिति कर्त्तव्यमित्येवकारेण नित्यस्याभ्यांतरं निषिध्यते नित्यानां विध्युद्देशे फलाश्रवणात्तेषां फलं सक्त्वेत्यस युक्तमित्याशंक्याह नित्यानामिति फलं सक्त्वेत्यस्य विधानेरेण तात्पर्यमाह अथवेति नहि विधिनाकृतं कर्मानर्थकं विध्यानर्थक्यात्तेन श्रौतफलाभावेपि नित्यंकर्मविधितोनुतिष्ठतामात्मानमज्ञानेन तु परिहितमस्यात्तस्मिन्कर्मण्यात्मसंस्कारफलकल्पनं तद्वाणीं प्रसवापत्त्यनात्मकारणं कर्त्तृत्वमनस्ति निर्वर्त्तिं करोतीति वा नित्यकर्मण्युक्तां कल्पनां मंगलमित्यादिनं फलकल्पना च फलं सक्त्वेत्यनेन भगवान् निवारयतीत्यर्थः नित्यकर्मसु फलत्यागोक्तेः संभवे फलितमाह अतर

कःपुनः सात्विकस्त्यागः कार्यमिति कार्यं कर्त्तव्यमित्येव यत्कर्म नियतं नित्यं क्रियते निर्वर्त्यते हेऽर्जुन संगं त्यक्त्वा फलं चैव नित्यानां कर्मणां फलवत्त्वे भगवद्वचनं प्रमाणमवोचाम अथवा यद्यपि फलं न श्रूयते नित्यस्य कर्मणस्तथापि नित्यंकर्म कृतमात्मसंस्कारं प्रत्यवायपरिहारं वा फलं करोत्यात्मन इति। कल्पयंत्येवाज्ञास्तत्र तामपि कल्पनां निवारयति फलं त्यक्त्वेत्यनेनातः साधूक्तं संगं त्यक्त्वा फलं चेति स त्यागो नित्यकर्मसु संगफलपरित्यागः सात्विकः

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन संगं त्यक्त्वा फलं चैव स त्यागः सात्विको मतः ९

सत्त्वनिर्वृत्तो मतोऽभिमतः ९ ननु कर्मपरित्यागस्त्रिविधः संन्यास इति च प्रकृतस्तत्र राजसतामसावुक्तौ त्यागौ कथमिह संगफलत्यागस्तृतीयत्वेनोच्यते यथा त्रयो ब्राह्मणा आगतास्तत्र षडंगविदौ द्वौ क्षत्रियस्तृतीय इति तद्वत् नैष दोषः त्यागसामान्येन स्तुत्यर्थत्वादस्ति हि कर्मसंन्यासफलाभिसंधित्यागस्य च त्यागत्वसामान्यं तत्र राजसतामसत्वेन कर्मत्यागनिंदया कर्मफलाभिसंधित्यागः सात्विकत्वेन स्तूयते स त्यागः सात्वि

भाष्य

९ कर्मतत्फलत्यागयोस्त्यागसंज्ञासंपृक्ततया प्रकृतत्यागो हि त्रैविध्यं प्रतिज्ञातं प्रतिज्ञानुरोधेन हि विधेयस्त्यागस्तृतीयो विधातव्यः तद्विरोधेन सुत्पादयतो भगवतोऽकौशलमापतितमिति शंकते नन्विति प्रक्रमप्रतिकूलमुपसंहारवचनमनुचितमित्यत्र दृष्टांतमाह यथेति परोक्तविरोधेन प्राप्तमकौशलं प्रत्याह नैष दोष इति कर्मत्यागफलत्यागयोस्त्यागत्वेन साम्यात्कर्मत्यागनिंदया फलत्यागस्तुत्यर्थमिदं वचनमित्युपगमान्नेन विरोधोऽस्तीत्युक्तमेव व्यक्तीकुर्वन्नाह त्यागसामान्ये विशदयति अस्ति हीति त्यागसामान्ये निर्देशस्य स्तुत्यर्थत्वं समर्थयते तत्रेति ९

मु

निः

गी॰भा॰
६

उक्ताधिकारिणः सर्वकर्मसंन्याससंभवेपि फलाभावे कुतस्तत्सकर्जे अतेतिशंकते किंपुनरिति गौणस्य मुख्यस्य वा संन्यासस्य फले पिपृच्छिषितमिति विकल्प्य उच्यत इति सर्वकर्मत्यागो नाम तदनुष्ठानेपि तत्फलाभिसंत्यागः स चामुख्यसंन्यासस्तस्य फलमाह अनिष्टमिति मुख्येन तु संन्यासेन सर्वकर्मत्यागे सम्यग्धीद्वारा सर्वसंसारोच्छित्तिरेवावधिफलमित्याह न त्विति पादत्रयं व्याकरोति अनिष्टमित्यादिना तिर्यगादीरित्यादिपदं वशिष्टनिरूपणो संग्रहार्थं देवादिपदं विशिष्टोल्लक्षणो नियहणापेत्ति विभागः फलशब्दं व्युत्पादयति बाह्येति कारकं चारकमनेकविधत्वमुक्त्वा मिथ्यात्वमाह अविद्येति तत्कृतत्वेन दृष्टिमात्रे देहलेहृतं तमाह इंद्रेति प्रतीतिनोऽपरणीपत्वे सत्वपति महामोहेति अविद्योस्य सर्वविद्याश्रितत्वादात्माश्रितत्वे वस्तुतो नास्तीत्याह प्रत्यगिति

किंपुनस्तत्प्रयोजनं यत्सर्वकर्मपरित्यागात्स्यादित्युच्यते अनिष्टं नरकतिर्यगादिलक्षणं इष्टं देवादिलक्षणं इष्टानिष्टसंयुक्तं मिश्रं मनुष्य
लक्षणं चैव त्रिविधं त्रिःप्रकारं कर्मणो धर्माधर्मलक्षणस्य फलं बाह्यानेककारकव्यापारनिष्पन्नं सदविद्याकृतमिंद्रजालमायोपमं महामो
हकं प्रत्यगात्मोपसर्पीव फल्गुतया लयमदर्शनं गच्छतीति फलनिर्वचनं तदेवंसणफलं भवत्यत्यागिनामज्ञानां कर्मिणामपरमार्थसंन्या त

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलं भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित १२ कर्मिणां

सिनां प्रेत्य शरीरपातादूर्ध्वं न तु परमार्थसंन्यासिनां परमहंसपरिव्राजकानां केवलज्ञाननिष्ठानां क्वचित न हि केवलसम्यग्दर्शननिष्ठो
ऽविद्यादिसंसारबीजं नोन्मूलयति कदाचिदित्यर्थः १२ श्रीरामचंद्रायनमः ।।

उक्तं फलं कर्मिणां मिथ्येति चेन्मुख्यसंन्यासफलोक्तिपरं पादत्रयं कथमिष्टमित्याशंक्याह अत्यागिनामिति फलाभिसंधिविकलानां कर्मिणां देहयात्राहेतुकर्मानुष्ठायि फलमावश्यकमित्यर्थः कर्मिणामेव सतामफलाभिसंधीनाममुख्यसंन्यासित्वाज्जघन्यामुख्यसंन्यासस्य फलमुक्त्वा चतुर्थपादं व्याचष्टे नत्विति अमुख्यसंन्यासमनेनतरं प्रहृतेव्यवच्छिनत्ति परमार्थेति तेषां प्राधान्येन धर्ममुपदिशति केवलेति [illegible] क्वचिद्देशे काले वा नास्तीति यथोक्तफलमेषामिति संबंधः तर्हि परमार्थसंन्यासोऽफलत्वात्तेनानुष्ठीयेतेत्याशंक्य तस्य मोक्षावसायित्वान्नैवमित्याह नहीति १२

त्या॰
६

२४७

पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यं लोकमित्यस्याः श्रुतेरर्थोऽनेन भगवता कृतः ३
ग

न द्वेष्टीत्यादिना श्लोकेनोक्तमर्थं संक्षिप्यानुवदति योऽधिकृत इति पूर्वोक्तप्रकारेण नित्यकर्माणि तत्फले च संगत्यागेनेत्यर्थः कर्मजन्यो योगस्तदनुष्ठानेन संस्कृतात्मा सन् क्रमेणाश्रवणाद्यनुष्ठानद्वारेणाकर्तृरूपं ब्रह्मप्रत्यक्त्वेन संबुद्ध इति संबंधः परमनिष्क्रियत्वे हेतुमाह जन्मादीति उक्तज्ञानवतः सर्वकर्मत्यागद्वारा मुक्तिभाक्त्वं दर्शयति स एवेति आत्मज्ञानवतः सर्वकर्मत्यागसंभावनामुक्त्वा तद्धीनस्य तदसंभवे हेतुवचनत्वेनानन्तरश्लोकमवतारयति यः पुनरितिनाबाधितमात्मनि कर्तृत्वविज्ञान

योऽधिकृतः पुरुषः पूर्वोक्तेन प्रकारेण कर्मयोगानुष्ठानेन क्रमेण संस्कृतात्मा सन् जन्मादिविक्रियारहितत्वेन निष्क्रियमात्मानमात्मत्वेन संबुद्धः स सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नासीनो नैष्कर्म्यलक्षणां ज्ञाननिष्ठामश्नुत इत्येतत्पूर्वोक्तस्य कर्मयोगस्य प्रयोजनमनेन श्लोकेनोक्तं यः पुनरधिकृतः सन्देहात्माभिमानित्वेन देहभृदज्ञोऽबाधितात्मकर्तृत्वविज्ञानतयाहं कर्तेति निश्चितबुद्धिस्तस्याशेषकर्मपरित्यागस्याशक्यत्वात्कर्मफलत्यागेन चोदितकर्मानुष्ठान एवाधिकारो न तत्त्यागे इत्येतमर्थं दर्शयितुमाह न हीति न हि यस्माद्देहभृता देहं बिभर्तीति दे-

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ११

हभृद्देहात्माभिमानवान्देहभृदुच्यते न हि विवेकी स हि वेदाविनाशिनमित्यादिना कर्तृत्वाधिकारान्निवर्तितोऽतस्तेन देहभृताज्ञेन न शक्यं त्यक्तुं संन्यसितुं कर्माण्यशेषतो निःशेषेण तस्माद्यस्त्वज्ञोऽधिकृतो नित्यानि कर्माणि कुर्वन्कर्मफलत्यागी कर्मफलाभिसंधिमात्रसंन्यासी स त्यागीत्यभिधीयते कर्म्यपि सन्निति स्तुत्यभिप्रायेण तस्मात्परमार्थदर्शिनैवादेहभृता देहात्मभावरहितेनाशेषकर्मसंन्यासः शक्यते कर्तुं ११

अशेषे संन्नत्यागस्याभावलक्षणं नयेतियावत् एतमर्थं पश्यन्नपि तस्य सर्वकर्मसंन्यासासंभवे हेतुमाहेति योजना यस्मादित्यस्य तस्मादित्यनेन संबंधः विवेकिनोऽपि देहधारिणो देहभृत्त्वाविशेषे कर्माधिकारः स्यादिति शंकां वारयति न हीति कर्तृत्वाधिकारस्तत्प्रयुक्तं कर्मानुष्ठानं तस्मादिति यावत् ज्ञानवतो देहधारणेऽपि तदभिमानित्वाभावो नञः शब्दार्थः अज्ञस्य सर्वकर्मत्यागायोगमुक्तं हेतुं दर्शयन्फलितमाह तस्मादिति कर्मानुष्ठायिनस्त्यागित्वोक्तिः किंप्रयुक्तेत्याशंक्याह कर्म्यपीति कर्मिणोऽपि फलत्यागेन त्यागित्ववचनं फलत्यागस्तुत्यर्थमित्यर्थः कस्य तर्हि सर्वकर्मत्यागः संभवतीत्याशंक्य विवेकवैराग्यादिमतो देहाभिमानहीनस्येत्युक्तं निगमयति तस्मादिति ११

गीभा०१८
७

कर्मणोऽधिष्ठानादीनि मानमूलस्यात्तेपानीत्युक्तमिदानीं पूर्वपक्षं विशेषतस्तानि निर्दिशति कानीत्यादिना प्रतीकमादाय व्याकरोति अधिष्ठानमिति उ
पाधिलक्षणो बुद्ध्यादिस्पाधिलत्वेऽसत्यात्मस्वभावो बुद्ध्याद्यनुविधायीति इमौ नात्मनि पस्पन्दुपहितत्वं तत्प्रधानरस्य ये: तत्र कार्यलिंगमनुमानेन सत्त्वप्रतिपत्ते रस्मातीति
ति तानेंद्रियाणि पूर्वं पंच कर्मेंद्रियाणि मनो बुद्धिश्चेति द्वादशसंख्यानि चेष्टापाविविधत्वान्नानाप्रकारेत्युक्तं देवस्य पक्षि तापं वीयार्थं जित्वपत्तमसेकी फलेन
हि प्राणापानादिचेष्टानामिप्यसंकरोऽ:त्रि दैवविशदयति आदित्यादीति १४ पंचानामधिष्ठानादीनामुक्तानां सर्वकर्मसु त्रिष्व पर्यसस्फुटपनि शरीरे

ध्यायतीव लेलायतीवेत्यादि
२

कानि तानीत्युच्यते अधिष्ठानमिति अधिष्ठानमिच्छाद्वेषसुखदुःखज्ञानादीनामभिव्यक्तेराश्रयो अधिष्ठानं शरीरं तथा कर्ता उपाधिलक्षणो
भोक्ता करणं च श्रोत्रादिकं शब्दाद्युपलब्धये पृथग्विधं नानाप्रकारं द्वादशसंख्यं विविधाश्च पृथक्चेष्टा वायवीयाः प्राणापानाद्याः दैवं चैवात्र
मेवात्रैव च तुष्टेषु पंचमं पंचानां पूरणम् आदित्यादि चक्षुराद्यनुग्राहकं १४ शरीरेति शरीरवाङ्मनोभिर्यत्कर्म त्रिविधं तैः प्रारभते निर्वर्तयति नरः न्याय्यं वा
धर्म्यं शास्त्रीयं वा विपरीतं वा अशास्त्रीयं अधर्म्यं चापि निमेषणाचेष्टादि जीवनहेतुतदपि पूर्वकृतधर्माधर्मयोरेव कार्यमिति न्याय्यविपरीतयोरेव

तेषु

अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधम् विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमम् १४ शरीरवाङ्मनोभिर्य
त्कर्म प्रारभते नरः न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः १५

248

ग्रहणेन गृहीतं पंचैते पंचोक्तास्तस्य सर्वस्यैव कर्मणो हेतवः कारणानि ननु अधिष्ठानादीनि सर्वकर्मणां कारणानि कथमुच्यते शरीरवाङ्मनो
भिः प्रारभते इति नैष दोषः विधिप्रतिषेधलक्षणानि सर्वकर्माणि शरीरादित्रयप्रधानानि तदंगतया दर्शनश्रवणादि जीवनलक्षणं त्रिधैव राशीकृतमु
च्यते शरीरादिभिरारभत इति
ति ननु जीवनहेतुर्निमिषोन्मेषादिकः मोक्तरसाधारणमेतत्तत्कर्मणः शिष्टकरणमिति तत्राह पंचेति अधिष्ठानादी
नां कर्ममात्रहेतुत्वं प्रतिज्ञाय शरीरादित्रिविधकर्महेतुत्वोक्तिरयुक्ता इति शंकते ननु इति पूर्वपार्विरोधं परिहरति नैष दोष इति ननु जीवनहेतूनि स्वाभा
विकानि कर्माणि दर्शनादीनि विधिनिषेधवाह्यत्वान्न देहादिनिवर्त्यानीत्याशंक्याह तदंगतयेति तस्य देहादित्रयस्य प्रधानस्यांगत्वसत्त्वादिति निमिषाद्यसे
नं जीवनहेतुं दर्शनादि प्रधानकर्मणः पंचत्वमेतमिति त्रैविध्यमविरुद्धमित्यर्थः ४

१७०

ननुपरमार्थसंन्यासवद्विशेषाद्ज्ञानां परमार्थसंन्यासोपि किं न स्यात्त्यागस्य सुकरत्वादित्यत आह अतःपरमार्थेति तस्य सम्यग्दर्शनादविद्यानिवर्त्तनीयत्वादारो
पितक्रियाकारकादिनिःशेषाऽरितिहेत्वर्थः विद्यावतःसर्वकर्मसंन्यासित्वसंभावनामुक्त्वा एवकारव्यावर्त्यं दर्शयति नत्विति अविदुषोऽशेषकर्मणामत्रेहेतुत्वं नावरो
गादीनांत्यागोपोगेकारकेष्वधिष्ठानादिष्वात्मदर्शिनेहेतुमाह [illegible]तिकर्मप्रधिष्ठानादीनां क्रियाकर्तृत्वं कार्यं तो विदुषस्त्वात्मत्वधीर्व्यासंगानेनारम्भो
रूपचतुष्टयस्य तात्पर्यमाह [illegible]दिनिकर्मोपानामधिष्ठानादीनाय प्रामाणिकत्वाशंकामासाद्युक्तिपंचेति उत्तरश्लोकेनाधिष्ठानादिषु वस्तुमाणेषु त्वपर्व वस्तु
नां तेषामेव वैषम्यं दिदर्शयिषितेन हि चेतःसमाधानार्थं तान्नुएसते सांख्यशब्दस्मुत्पादयति [illegible]ख्याश्रीति आत्मात्वपदार्थोत्तरार्थे ब्रह्मतत्पौरेक्यधीस्त
अतःपरमार्थदर्शिनएवाशेषकर्मसंन्यासित्वसंभवत्यविद्याध्यारोपितत्वादात्मनि क्रियाकारकफलानां [illegible]तस्याधिष्ठानादिनि क्रियाकर्तृणीकारका
एयात्मत्वेनपश्यतोऽशेषकर्मसंन्यासःसंभवतीति तदेतदुत्तरैः श्लोकैर्दर्शयति पंचेति पंचएतानि वक्ष्यमाणानिमहाबाहोकारणानि निर्वर्त्तकानिनिबोधमे
मतत्त्वेन च ज्ञात्वाचेतःसमाधानार्थं वस्तुवैषम्यप्रदर्शनार्थं चैतानिचकारणानि ज्ञातव्यतयास्तौतिसांख्येज्ञातव्याःपदार्थाःसंख्यायंते यस्मिन्शास्त्रे

पंचैतानिमहाबाहोकारणानिनिबोधमे सांख्येकृतांतेप्रोक्तानिसिद्धयेसर्वकर्मणाम् १३

तस्मिन्सांख्येवेदांते कृतं तोंतःकृतांते तस्मिन्वेविशेषणं कृतमिति कर्मोपनेन स्यांतः कृतस्यपरिसमाप्तिर्यत्रसकृतांतःकर्मांतइत्येतत्पर्यायानर्थः यदाने सर्वक
र्माखिलंपार्थज्ञानेपरिसमाप्यत इत्यात्मज्ञानेसजातेसर्वकर्मणांनिवर्त्तितंदर्शयति अतस्तस्मिन्नात्मज्ञानार्थेसांख्येकृतांतेवेदांतेप्रोक्तानिकथि
तानिसिद्धयेनिष्पत्त्यर्थंसर्वकर्मणाम्
उपपोगिनश्रवणमननादयःपरपर्योहेतत्वमापदंते उत्पादयंतेकृतानतरउत्सर्वेवेदांतेविषयत्वेविधानते [illegible]मस्यादिवाक्येदांतस्यतत्त्वधीद्वाराकर्मावसानभूमि
त्वेवाक्योपक्रमानुकूल्यंदर्शयति पापानिति इष्टानिष्टकृपापापानर्थः स्नानादित्ताननर्थःसमुदेसंपद्यते अतोपयाकृपादिकृतेकार्येसर्वेसमुदेनप्रवृत्तिनत
थासर्वेषुवेदेषुकर्मार्थेषुपावसत्त्वेनात्मनःक्षतोब्राह्मणस्यतानेनिवर्त्यवतिज्ञानेपुष्पपूस्थफलेव्याप्तंविशेषादित्यर्थः तत्रैववाक्यांतरमनुजामतिसर्वमिति उ
दाहृतवाक्यपोतात्पर्यमाहअतएवेति आत्मज्ञानेसतिकर्मनिवृत्तावपिकर्थवेदांतस्यकृतांतेशब्दमाह अतएवेतिज्ञानिमहद्वनन्तोनिवोधेतिपूर्वेणसंबंधः

अहंकर्तेत्यात्मदर्शनवतोऽपि नाविद्वत्त्वदर्शनमस्तीत्यत्र दृष्टांतमाह यथेति तिमिरोपहतचक्षुरनेकत्वं चंद्रं पश्यन्नपि तत्त्वतो नैनं पश्यत्येवमविद्वानात्मानं कर्तारं पश्यन्नपि तत्त्वतो नैनं पश्यतीत्यर्थः अधिष्ठानादिष्वविद्यया संबद्धात्मनः स्वात्मनि तत्कृतक्रियारोपे दृष्टांतमाह यथा वेति अन्येषु वाहकेषु परेषु धावत्सु कर्मेषु वाहने स्थितः स्वात्मानं प्रधावनकर्तारमविवेकादभिमन्यते तथाधिष्ठानादिषु क्रियाकर्तृषु तद्गते स्वात्मानं कर्तारं मन्यमानो दुर्मतिरित्यर्थः १६ विपरीतदृष्टेर्दुर्मतित्वे शिष्टं तस्य गृह्णे सुमतित्वप्रश्नपूर्वकमाह कः पुनरित्यादिना अहंकर्तेत्यात्मनि कर्तृत्वप्रत्ययाभावे कुत्र कर्तृत्वधीरित्याशंक्याह एतर्हि कथं नहि अकर्तृत्वधीरात्मनीत्याशंक्याधिष्ठानादीनां तद्व्यापाराणां च साक्षित्वादित्याह अहंतेति आत्मनो न स्वतोऽस्ति क्रियाश्रयत्वमित्य

यथा नैमिरिको नैकं चंद्रं यथा वाभ्रेषु धावत्सु चंद्रे धावनं तथा वाहनस्थः परीक्षोऽन्येषु धावत्स्वात्मनि धावनं १६ कः पुनः सुमतिर्यः सम्यक् पश्यतीत्युच्यते यस्येति यस्य शास्त्राचार्योपदेशन्यायसंस्कृतात्मनो न भवत्यहंकृतोऽहंकर्तेत्येवंलक्षणो भावो भावना प्रत्ययः त एव पंचाधिष्ठानादयोऽविद्ययात्मनि कल्पिताः सर्वकर्मणां कर्तारो नाहं अहं तु तद्व्यापाराणां साक्षिभूतोऽप्राणो ह्यमनाः शुभ्रोऽक्षरात्परतः परः केवलोऽविक्रिय इत्येवं पश्यतीति बुद्धि

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते हत्वापि स इमाँल्लोकान्न हंति न निबध्यते १७

रंतःकारणं यस्मात्स नैवोपाधिभूता न लिप्यते नानुशोचिनी भवति इदमहमकार्षं तेनाहं नरकं गमिष्यामीत्येवं यस्य बुद्धिर्न लिप्यते स सुमतिः स पश्यति हत्वापि स इमाँल्लोकान्सर्वान्प्राणिन इत्यर्थः न हंति न हननक्रियां करोति न निबध्यते नापि तत्कार्येण धर्माधर्मफलेन संबध्यते

त्र प्रमाणमाह अप्राणो हीति नापि तस्य हननोत्पादनशक्तिमत्त्वमित्याह अमना इति उपाधिद्वयात्तत्संबंधेऽशुद्धत्वे फलितमाह शुभ्र इति कारणसंबंधाद्धि माशंक्योक्तं अक्षरादिति कार्यकारणयोरात्मस्थितत्वेन पार्थक्ये सद्वितीयत्वमाशंक्य तयोरविद्यकयोरवस्तुत्वान्नैवमित्याह केवल इति जन्मादिंत्तवेवि क्रियारहितत्वेनैकरूप्यमाह अविक्रिय इति बुद्धिर्यस्येत्यादि व्याचष्टे बुद्धिरिति नानुशोचिनी नानुशयवती न क्लेशशालिनीत्यर्थः द्वितीयपादस्यास एवमुक्त्वा वाक्यार्थमाह इदमिति पापकर्मेदं मया मरणमस्य ते लोकानां प्राणसंबंधाभावे कुतो हिंसेत्याशंक्याह प्राणिन इति ॥

द्या

243

अवक्तः

२५
२

देहाद्याश्रये त्रिविधे कर्मणि सर्वकर्मणां तेषामपि कथं पंचानामेवाधिष्ठानादीनां तत्र हेतुत्वं फलोपभोगकाले कारणांतरापेक्षासंभवादिति शंकां जन्मकालभाविनो
स्था.२ भोगकाले भाविनश्च सर्वस्य कारणानि तेष्वेवांतर्भावान्नैवमित्यभिसारपत्नेति १५ क्रियाकर्तृत्वमधिष्ठानादीनामायाधाः विदुषस्तेष्वात्मत्वदृष्टिमनुवदति तत्रेति तत्र
दंपरामर्शी योग्यष्टः तं संवंकर्मप्रतीकमारापपूर्वेण सह ऽक्षराणं वस्यपति एवमिति अधिष्ठानादीनां मुक्तरीत्या कर्तृत्वे सति सम्यग्ज्ञानं केवलं कर्तृत्वमात्मनोपनोः आरोप्य प
६ श्यन्तो मीनिरित्यात्मनि कर्तृत्वपश्यन्निस्यारतः नैवमिति कर्त्तारमित्यादिमाचष्टे तत्रेत्यादिना तेष्वधिष्ठानादिपुनैरधिष्ठानादिभिराराधितात्मभावैरित्यर्थः

फलकाले पितत्तत्प्रधानैर्भुज्यमेरतिपंचानामेवहेतुत्वेन विरुध्यते १५ तत्रेति तत्रैवमिति प्रकृतेन संबध्यते एवं निरुपितैः पंचभिरेव हेतुभिर्निर्वर्त्यमाने सति
कर्मणि तत्रैवं सतीति दुर्मतिः तिलस्य हेतुत्वेन संबध्यते [illegible] अविद्यानादिभिः पुनरेतेषु आत्मानमनन्यत्वेनाविषयाप
रिकल्प्यते क्रियमाणस्य कर्मणोऽहमेव कर्तेति कर्तारमात्मानं केवलं शुद्धं तु यः पश्यति वेदांताचार्योपदेशन्यायैरकृतबुद्धित्वादसंस्कृतबु

तत्रैवं सति कर्तारमात्मानं केवलं तु यः पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः १६

द्धित्वाद्योपि देहादिव्यतिरिक्तात्मवादी आत्मानमेव केवलं कर्तारं पश्यति सोपि अकृतबुद्धिरेवातो ऽकृतबुद्धित्वान्न स पश्यत्यात्मनस्तत्त्वं कर्म
णो वेत्यर्थः अतो दुर्मतिः कुत्सिता विपरीता दुष्टा मतिरस्य जननमरणप्रतिपत्तिहेतुभूता दुर्मतिः स पश्यन्नपि न पश्यति

अकर्तारमात्मानं कर्तारं पश्यतो [illegible] हेतुमाह [illegible] इति ननु [illegible] तत्त्वबुद्धिरेवाति [illegible] मात्मानुमन्यते असौ निरंपश्यती
त्यत्रयश्चप्रहाराहेतुमाह [illegible]त्यादिति ननु शास्त्रसंस्कृतबुद्धिरेवातिरिक्तात्मवादी कर्तृत्वं तस्यात्मकर्तृत्वमात्मनि पश्यन्नपि भवत्यकृतबुद्धित्वमाह यो येति
नस्यापि शास्त्रपूर्वकमाचार्योपदेशेन तदनुसारिन्यायेनाकृता हेतुबुद्धित्वादकृतबुद्धित्वमिति भावः सर्वः कौटस्थ्यमात्मनस्तत्त्वं पापात्मकर्मणोपि तत्त्व
मविद्याकृताधिष्ठानादिकृतत्वेन आत्मास्पृश्यमानात्मकर्मणो तत्सदृशीनाभावो जः शास्त्रार्थं दुष्टत्वस्यकोकर्तृ दुर्मतिस्तविरुणो तिन भनेनि ०
नुमन्यते नासौ २

गी॰ भा॰ १८

किंचात्मनः स्वनिष्ठाविक्रियोऽधिष्ठानादिनिष्ठत्वानाधःसंभिधविक्रियानुपपत्तेरात्मनो रहितत्वादित्याशयेनाह विक्रियावत्त्वेति सा चाप्युक्ते त्यक्तमिति शेषः द्वितीयं पूर्व-
वपत्तिनेत्यादिना अधिष्ठानादिकृतमपि कर्मत्वयोगादात्मन्यारोपितीत्याशङ्क्य तद्द्वारागमनवात्तत्त्वमाविषयेवेतिविकल्प्याद्यं दूषयति नहीति द्वितीयं निरस्यति पत्ति-
ति आत्मन्यविद्याप्रापितकर्मत्वात्मीयमित्येतद्दृष्टांताभ्यामुपपादयति यथेत्यादिना आत्मनो विक्रियत्वाभावे फलितमाह तस्मादिति नन्वप्रागेवात्म-
नो विक्रियत्वे प्रतिपादिते तत्त्विह कस्मादुच्यते तत्राह नापमिति शास्त्रादौ प्रतिपादितत्वेऽपि हेतुप्रवेकं संक्षिप्यात्मक्षेत्रतत्र प्रसंगेन त्वाप्रसारितोऽकर्माधिकारनिव-
त्तिमित्युपसंहरतीति संबंधः प्रतिपादितस्येहेतुनोपपादितस्यात्र निगमनं किमर्थमित्याशंक्याह शास्त्रार्थेति कर्माधिकारो विदुषो नेति स्थितं तत्स्वरेहाभिमा-

विक्रियावत्त्वाभ्युपगमेऽप्यात्मनः स्वकीयैव विक्रिया स्वस्य भवितुमर्हतीति नाधिष्ठानादीनां कर्मणात्मकर्तृकाणामस्य नोहि परस्य कर्म परेण
कृतमागन्तुमर्हतीति पक्षविषयाणामपि तेन तत्तस्य यथा रजतत्वं न शुक्तिकायाः यथा तलमलत्वं बालैर्गृहीतमपि न आकाशस्य तथा वा
धिष्ठानादिविक्रियापि तेषामेवेति नात्मनः तस्मात्पुरुषे तन्महेत्वन्तत्वबुद्धिलेपाभावाद्विद्वान्न हन्ति न निबध्यत इत्येतत्पूर्वं हन्ति न हन्यत इति प्र-
तिज्ञातं तदुपपन्नतया प्रसारितहेतुवचनेनाविक्रियत्वमात्मनो ज्ञात्वा वेदाविनाशिनमिति विदुषः कर्माधिकारनिवृत्तिः शास्त्रादौ संक्षेपत उक्तात्र
मध्ये प्रसारिता तत्र तत्र प्रसंगकृत्वेहोपसंहरतीति शास्त्रार्थपिण्डीकरणाय विद्वान्न हन्ति न निबध्यत इति एवंवृत्तिदेहप्रत्यभिमानानुपपत्त्याऽ-
विद्याकृतोऽशेषकर्मणि संन्यासोपपत्तेः संन्यासिनामनिष्टादित्रिविधं कर्मणः फलं न भवतीत्युपपन्नं तद्विपर्ययाच्चेतरेषां भवतीत्येतच्चापरिहार्य-
मित्येष गीताशास्त्रस्यार्थ उपसंहृतः स एष सर्ववेदार्थसारो निपुणमतिभिः पण्डितैर्विचार्य प्रतिपत्तव्य इति तत्र तत्र प्रकरणविभागेन दर्शितोऽस्मा-
भिः शास्त्रन्यायानुसारेण ॥ १७ ॥

नाभावे संन्यासिनो ॐ सर्वकर्मत्यागसिद्धेरनिष्टमिष्टं मिश्रं चेति त्रिविधं कर्मफलं संन्यासिनां नेति प्रागुक्तं युक्तमेवेति परमप्रकृतमुपसंहरति एवं चेत्तर्हि पुन-
रविद्यायां सत्यां देहाभिमानिनस्तेषां त्रिविधं कर्मफलं भवत्येवेति हेतुवचनसिद्धमर्थं निगमयति तद्विपर्ययाच्चेति अधिष्ठानादिकृतेन कर्मणात्मकृतत्वमविदुषामेव क-
र्माधिकारो देहाभिमानित्वेन तत्त्यागायोगाद्देहाभिमानाभावात्तु विदुषां कर्माधिकारनिवृत्तिरित्युपसंहृतमर्थं संक्षिप्याह तत्र स एष इति उक्तो गीतार्थो
वेदार्थत्वादुपादेय इत्याह सर्ववेदेति कथमयमर्थो वेदार्थो विप्रतिपत्तेः शक्यत इत्याह निपुणेति भाष्यकृता मानयुक्तिभ्यो विभज्यानुक्तत्वान्नास्यार्थस्य सो-
पाऽयत्वमित्याशंक्याह तत्रेति ॥ १८ ॥

250

२५०

विरहार्थी त्मास्तु निरपि न युक्ते ति शंकते नन्विति विरोधं परिहरति नैष दोष इति लौकिकदृष्टिमवष्टभ्य हत्वापीति निरैरं विराडं मिति देहे इति तात्विकीं दृष्टिमास्थाय प

न हन्तीत्यादि निर्देशमुपपादयति यदेति नाहंकर्त्तो किंतु कर्त्तृत्वं छायापरयोः साक्षी क्रियातान रक्तिमदुपाधिरूपविनिर्मुक्तः स्तोऽहं सन्कार्य्यकारणसं प्रु

वेधौ ढिमीयो विक्रियरैस्वं पारमार्थिकदृष्टेर्पर्यालोचिनत्वदृष्ट्यै हत्वापीमेन तत्त्वं हंमोत्पादिस्तो भयं दृष्टिद्वयाः वहंभादुपपन्नमित्युपसंहरति न हन्तीति केव

लमेवात्मानं कर्त्तारं पश्यन्न दुर्मतिरित्यत्रात्मविशेषणासमर्पकं केवलशब्दसामर्थ्यादात्मनो विशिष्टस्य कर्त्तृत्व मिति शंकते नन्विति आत्मनो वैशिष्ट्ययोगान्न

विशिष्टस्यापि कर्त्तृत्वमित्ति हवषपति नैष दोष इति अविक्रियत्वाभावेऽपि कथमात्मनोऽसंहतत्व मित्याशंक्याह अविक्रियोऽत्रेति अधिष्ठानादिभिरात्मनः संह प्रौढिरिति

ननु हत्वापि न हंतीति विप्रतिषिद्धमुच्यते यद्यपि स्तुतिर्नैष दोषः लौकिकपारमार्थिकं दृष्टिद्वये श्रयात्तदुपपत्तेः देहाद्यात्मबुद्ध्या हंतारमिति लौकिकीं दृष्टिमा

श्रित्य हत्वापीत्याह यथा दर्शितां पारमार्थिकीं दृष्टिमाश्रित्य न हंति न निबध्यते रिति तदुभयमुपपद्यत एव नन्वधिष्ठानादिभिः संभूयकरणमेवात्मा कर्त्ता

रमात्मानं केवलमिति केवलशब्दप्रयोगान्नैष दोषः आत्मनोऽविक्रियत्वस्वभावत्वेऽधिष्ठानादिभिः संहतत्वानुपपत्तेः विक्रियावतो ह्यन्यैः संहन

नेन संभवति संहत्य वा कर्त्तृत्वं स्यान्न त्वविक्रियस्यात्मनः केनचित्संहननमस्तीति न संभूय कर्त्तृत्वमुपपद्यते अतः केवलत्वं आत्मनः स्वाभाविक

मिति केवलशब्दोऽनुवादमात्रं अविक्रियत्वं चात्मनः श्रुतिस्मृतिन्यायप्रसिद्धं अविकार्योऽयमुच्यते गुणैर्यो न विचाल्यते शरीरस्थोऽपि न करोति

रस्थोपीत्युपपादितं गीतास्वेवं तावत्श्रुतिषु ध्यायतीव लेलायतीवेत्येवमाद्यासु न्यायतश्च निरवयवमपरतंत्रमविक्रियमात्मतत्त्वमिति राजमार्गः

नने पिन कर्त्तृत्वमविक्रियस्य पक्षे विक्रियावत्त्वं स्यात् प्रधानादि स्यात् अतस्तेनेति संहतत्वानुपपत्तिं स्वीकरोतीत्यर्थः विनिश्चितं हन्तत्वे फलितमाह इतीने निकं पंतरहितं केवलं

अ त्वमात्मनि केवलशब्दार्थ इत्यर्थः अतः केवलत्वमात्मनो ऽनुपपन्नत्वात् विक्रियत्वमुपेत्याशंक्याह अविक्रियत्वे चेति तत्र श्रुतिवाक्यमुदाहरति अविका

र्योऽयमिति नायं हन्ति न हन्यते इत्यादिवाक्यमादिशब्दार्थः उक्तवाक्यानामात्माविक्रियत्वे तात्पर्यं स्पष्टयति [illegible]

[illegible] इतीति निःकलं निष्क्रियं शांतमित्यादिवाक्यसंग्रहार्थो वा हि शब्दार्थः पानिवाक्यानि नैरात्म्य

नो विक्रियत्वं दर्शितमिति योजना न्यायपक्षं स्पष्टयति निरवयवमिति पूर्वेणासंबंधः न्यायमेव दर्शयति निरवयवत्वेऽपि न सावयवत्वाद्विक्रियत्वे निरवयवपरत्वादाका

शवन्नापि परतो न गरस्याकांक्षसमाधीनत्वायोगादित्यर्थः ॥

सञ्

न्व

गा.षा.१ अनंतरश्लोक[illegible]कतात्पर्यमाह अथेति ज्ञानादिप्रस्तावानंतर्यमथशब्दार्थः इदानीं प्रस्तुतं तत्त्वानामथवान्तरभेदापेक्षायामित्यर्थः तेषां गुणभेदात्त्रैविध्ये हेतुमाह गुणात्म
कत्वादिति वक्ष्यमाणश्लोकेन वक्ष्यते इति शेषः एवंस्थिते प्रथममवान्तरभेदप्रतिज्ञा क्रियते इत्याह ज्ञानमित्यारभ्य तदिति कर्तारीति ज्ञानं तमेकमेवेति पर्यायाभ्यां भाष्यते नेन सि
२०म त्र कर्म शब्दवाच्यमित्याह नेति गुणातिरेकेण विधानं ज्ञानादिषु नेति निर्धारितमवधारणमित्याह गुणेति ज्ञानादीनां प्रत्येकं गुणभेद[illegible] प्रयुक्ते
त्रैविध्ये प्रमाणमाह प्रोच्यत इति ननु कापिलं पातंजलमित्यादिशास्त्रं विरुद्धार्थत्वादप्रमाणं कथमिह प्रमाणी क्रियते तत्राह तदपीति विषयविशेषविरो
धापेदानीं क्रियाकारकफलात्मनां सर्वेषां गुणात्मकत्वात् सत्त्वरजस्तमोगुणभेदेन त्रिविधो वक्तव्य इत्यारभ्यते ज्ञानं कर्म चेति ज्ञानं कर्म च कर्ता च क्रि ज्ञापतेऽनेनेति
ॠषा भैग नेर यौ[illegible]कर्मकारकं पारिभाषिकं कर्मेप्सिततमं कर्म कर्ता निर्वर्तकः क्रियायास्त्रिधैवावधारणं गुणव्यतिरिक्तजात्यन्तराभावप्रदर्शनार्थं गुणभेदतः सत्त्वादि
त्पान तिना भेदेनेत्यर्थः प्रोच्यते कथ्यते गुणसंख्याने कापिले शास्त्रे कापिलमपि गुणसंख्याने शास्त्रं तदपि गुणभोक्तृविषये प्रमाणमेव परमार्थब्रह्मैकत्वविष

२५१

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि १९

येष्वपि विरुध्यते हि कापिलागमो गुणव्यापारनिरूपणे भिनिप्रयुक्त इति तच्छास्त्रमपि वक्ष्यमाणार्थे तु स्वयं तेनोपादीयत इति न विरोधः यथा
स वत् यथाम्नायं यथाशास्त्रं शृणु तान्यपि ज्ञानादीनि तद्भेदजातानि गुणभेदकृतानि शृणु वक्ष्यमाणे ग्रन्थे मनः समाधिं कुर्वित्यर्थः २० स
धेपि प्रहरजेऽर्थे प्रामाण्यमविरुद्धमित्यर्थः यद्यपि कापिलादयो गुणवृत्तिविचारे गुणव्यापारस्य भोगादेर्निरूपणे च निपुणास्तथापि कथं न दोषपरा
त्मत्वप्रमाणीकृतमित्याशंक्याह नेहीति ज्ञानादिषु प्रत्येकमवान्तरे भेदो वक्ष्यमाणोऽपि तत्संतंत्रांतरेऽप्रसिद्धिकथनं तु नित्यादर्थेन कापिलादिमतो
पादानमिहोपयोगीत्यर्थः तत्रोपपादस्याविरुद्धार्थत्वे निगमयति नेति यथावदित्यादिव्याचष्टे यथाम्नायमिति १९ ॥ ॥

ल४°
१०

मीमांसा

शास्त्रार्थोपसंहारानंतरं पूर्वमर्थेनुक्तमिदानीमिति प्रवर्त्तकोपदेशापेक्षावश्योक्ता कर्मणां येषां विदुषां नाधिकारो विदुषां चाधिकारस्तेषां मिथ्यार्थे ज्ञानशब्दस्य करणव्यु- त्पत्त्या ज्ञानमात्रार्थत्वमाह ज्ञानमिति ज्ञेयशब्दस्यापि तद्धेतुत्वात् तन्मात्रार्थत्वमाह ज्ञेयमिति उपाधिलक्षणत्वेन तस्य प्राधान्यत्वमुपहितत्वेन तस्यावस्तुत्वाद्येन विषयाकल्पि- तं विशेषणमेतदेव ज्ञेयं सर्वकर्मप्रवर्त्तकमित्याह ज्ञेयमिति सर्वकर्मणां प्रवर्त्तकमित्यर्थः ज्ञेयं चोदनेति किं पापाः प्रवर्त्तकं वचनमिति भाष्यानुसारेण चोदनाशब्दार्थ- माह प्रवर्त्तिकेति सर्वकर्मणामिति पूर्वेणान्वयः त्रैविध्यं ज्ञानादीनां प्रागुक्तं कर्मणां चोदनेति विग्रहः ज्ञेयानां सर्वकर्मप्रवर्त्तकत्वमनुभवेन साधयति ज्ञानादीनामिति ज्ञानो-

अपेक्षितानां कर्मणां प्रवर्त्तकमुच्यते ज्ञानमिति ज्ञायतेऽनेनेति सर्वविषयमविशेषेणोच्यते ज्ञेयमिति ज्ञेयं ज्ञानविषयं तदपि सामान्येनैव सर्वमुच्यते ज्ञेयं परिज्ञातेति उपा- धिलक्षणो विषयाकल्पितो भोक्ता एतेन त्रयमेषामविशेषेण सर्वकर्मणां प्रवर्त्तिका त्रिविधा कर्मचोदना ज्ञानादीनां हि त्रयाणां संनिपाते हानोपादानादि प्र- योजनः सर्वकर्मारंभः स्यात् ततः पंचभिरधिष्ठानादिभिरारब्धं वाङ्मनःकायाश्रयभेदेन त्रिधा राशीभूतं त्रिषु करणादिषु संगृह्यत इत्येतदुच्यते करणं क्रियते-

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना करणं कर्म कर्त्तेति त्रिविधः कर्मसंग्रहः १८

नेनेति बाह्यं श्रोत्रादि आंतरं बुद्ध्यादि कर्मेप्सिततमं कर्त्तुः क्रियया व्याप्यमानं कर्त्ता करणानां व्यापारयिता उपाधिलक्षण इति त्रिविधस्त्रिप्रकारः कर्मसं दा (हि गृह्यते अस्मिन्निति संग्रहः कर्मणः संग्रहः कर्मसंग्रहः कर्म एषु हि त्रिषु समवैतीति तेनायं त्रिविधः कर्मसंग्रहः १८

पापनादिषु देनोपेक्षा विवक्षिता करणमित्यादेस्तात्पर्यमाह तत्रेति ज्ञानादीनां प्रवर्त्तकत्वादि स्वरूपमुक्ते पूर्वश्लोकभागमवतारयति यत्नेनेति वाक्यमेतत्सं- चेहि विविधं करणं करणमुपलक्षयति करणमिति उक्तलक्षणे कर्मैव स्वरूपमिति कर्त्तुरिति स्वतंत्रो हि कर्त्ता लोके प्रसिद्धः कारकाणां प्रयोजकत्वमिति स्याहकर्त्तेति कथमुक्ते त्रिविधे कर्मसंग्रहे संग्रहोक्तेत्याह यत्रेति कर्मणो हि प्रसिद्धं कारकाश्रयत्वमिति भावः १८

प्रवृत्त्यादि
ग्रहितं देव
बुकरणादि
गृह्यते

कर्म

प्रवर्त्तकमु-
च्यते

त्रिप्रकारा

= कर्तृत्वमि-
ति वैयाकर-
णा भगवान्
पाणिनिना उ-
क्तं

गी॰भा॰१८ सक्तत्वमेव व्यनक्ति एतावानिति एकस्मिन्कार्ये ज्ञानस्य सक्तत्वमेव दृष्टान्तेन साधयति यथेत्यादिना यन्निर्युक्तिकत्वं तदेव ज्ञानस्याभासत्वे कारणमित्याह अ
२२ हैतुकत्वादिति स्वरूपतो विषयतो फलतो वेत्याह अल्पेति तामसं ज्ञानमुक्तमल्पफलमेवानुभवं प्रमाणयति तामसानां हीति २२ त्रिविधं कर्मेव ना

यत्त्विति यत्तु ज्ञानं कृत्स्नवत्समस्तवत्सर्वविषयमिव एकस्मिन्कार्ये देहे बहिर्वा प्रतिमादौ सक्तं एतावानेवात्मा ईश्वरो वा नातः परमस्ती
ति यथा नग्नक्षपणकादीनां शरीरानुवर्ती देहपरिमाणो जीव ईश्वरो वा पाषाणदार्वादिमात्रमित्येवमेकस्मिन्कार्ये सक्तमहैतुकं हेतुव
र्जितं निर्युक्तिकमतत्त्वार्थवत् यथाभूतोऽर्थस्तत्त्वार्थः सोऽस्य ज्ञेयभूतोऽस्तीति तत्त्वार्थवन्न तत्त्वार्थवदतत्त्वार्थवदहैतुकत्वादेवा

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् २२
नियतं सङ्गरहितमरागद्वेषतः कृतम् अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते २३

ल्पं चाल्पविषयत्वादल्पफलत्वाद्वा तत्तामसमुदाहृतं तामसानां हि प्राणिनामविवेकिनामीदृशं दृश्यते २२ अथ कर्मणस्त्रिवि ज्ञान
धत्वमुच्यते नियतमिति नियतं नित्यं संगरहितमासक्तिवर्जितमरागद्वेषतः कृतं रागप्रयुक्तेन द्वेषप्रयुक्तेन च कृतं तद्विपरीतेन कृ
तमरागद्वेषतः कृतं अफलप्रेप्सुना फलं प्रेप्सतीति फलप्रेप्सुः फलतृष्णस्तद्विपरीतेनाफलप्रेप्सुना कर्त्रा कृतं कर्म यत्तत्सात्त्विकमुच्यते

गुणभेदेन श्लोकत्रयमित्याह अथेति तत्र सात्त्विकं कर्म निरूपयति नियतमिति २३

त्व॰
२२

ज्ञानादीनां प्रत्येकं त्रैविध्यं तावत्तत्त्वं प्रतिज्ञाय ज्ञानत्रैविध्यार्थं श्लोकत्रयमवतारयति ज्ञानस्येति तत्र सात्विकं ज्ञानमुपन्यस्यति सर्वेति भूतानि कार्यकारणात्म
कान्युपाधिजातानि अद्वितीयमद्वैतमेकरसं प्रत्यगात्मभूतमबाधितं तत्त्वं ज्ञेयत्वेन विवक्षितमित्याह एकमिति विवक्षितमव्ययत्वं साधयति कूटस्थेति प्रतिदे
हमविभक्तमित्युक्तं व्यनक्ति विभक्तेष्विति तज्ज्ञानमित्यादि व्याकरोति अद्वैतेति ॥ २० ॥ द्वैतदर्शनान्यपि कानिचित् भवंति सत्वनिवेशानि सम्यग्दर्शना

ज्ञानस्य तावत् त्रिविधत्वमुच्यते सर्वेति सर्वभूतेषु अव्यक्तादिस्थावरांतेषु भूतेषु येन ज्ञानेनैकं भावं वस्तु भावशब्दो वस्तुवाची एकमात्मव
स्त्वित्यर्थः अव्ययं न व्येति स्वात्मना धर्मैर्वा कूटस्थं नित्यमित्यर्थः ईक्षते येन ज्ञानेन पश्यति तं च भावम् अविभक्तं प्रतिदेहं विभक्तेषु देहभेदे
षु न विभक्तं तदात्मवस्तु व्योमवत् निरंतरमित्यर्थः अद्वैतात्मदर्शनं सात्विकं सम्यक्दर्शनं विद्धीत्यर्थः ॥ २० ॥ यानि द्वैतदर्शनानि असम्यग्भूता

सर्वभूतेषु येनैकं भावमव्ययमीक्षते अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम् ॥ २० ॥ पृथक्त्वेन तु यज्ज्ञानं नाना
भावान्पृथग्विधान् वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥ २१ ॥

नि राजसानि चेति न साक्षात्संसारोच्छित्तये भवंति पृथक्त्वेनेति पृथक्त्वेन तु यत् ज्ञानं भेदेन प्रतिशरीरमन्यत्वेन यत् ज्ञानं नाना भावान् भिन्नानात्मनः
पृथग्विधान् पृथक्प्रकारान् भिन्नलक्षणानित्यर्थः वेत्ति विजानाति यत् ज्ञानं सर्वभूतेषु ज्ञानस्य कर्तृत्वानुपपत्तेः येन ज्ञानेन वेत्तीत्यर्थः तत्
पु
ज्ञानं विद्धि राजसं तज्ज्ञो निवृत्तम् ॥ २१ ॥

ह यानीति तेषामसम्यक्त्वे हेतुमाह राजसानीति प्रतिदेहमन्यत्वेन भिन्नात्मनो येन ज्ञानेन जानाति तत् ज्ञानं राजसमिति व्याचष्टे भेदेनेति पृथक्त्वेन पृ
थग्विधत्वं च पुनरुक्तमित्याशंक्याह हेतुहेतुमत्त्वेन विभागं विवक्षित्वाह भिन्नेति ज्ञानस्य ज्ञानकर्तृत्वमयुक्तमित्याशंक्याह सर्वेति ॥ २१ ॥

गी॰भा॰ १८
२२

२६ नैवकर्त्तेति ध्यवुवन्नाद्देसात्विकं कर्त्तारं दर्शयति मुक्त इति संगो नाम फलाभिसंधिर्वा कर्त्तृत्वाभिमानो वा नाहं वदनशीलः कर्त्ताहमिति वदनशीलो नअ
वनीस धृतिः धारणं तां धैर्यं क्रियमाणस्य कर्मणो यदि फलानभिसंधिस्तर्हि नानुष्ठानविश्रंभः संभवेदित्याशंक्याह केवलमिति फलरागादिना सादि
शाद्वेन कर्मणो मा स्तित्युक्त इति छेदः २६ राजसं कर्त्तारं कथयति रागीति कर्मविषयो रागः कर्मफलप्रेप्सुरिति फलरागस्य पृथक् कथना

मुक्तेति मुक्तसंगो मुक्तः परित्यक्तः संगो येन स मुक्तसंगः अनहंवादी नाहंवदनशीलो धृत्युत्साहसमन्वितो धृतिर्धारणमुत्साहमुद्यमस्ताभ्यां स
मन्वितः धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्योर्निर्विकारः क्रियमाणस्य कर्मणः फलसिद्धावसिद्धौ च सिद्ध्यसिद्ध्योर्निर्विकारः केवलं शास्त्रप्रमाण
प्रयुक्तो न फलरागादिना युक्तो यः स निर्विकार उच्यते एवंभूतः कर्त्ता यः स सात्विक उच्यते २६ रागीति रागी रागोऽस्यास्तीति रागी कर्मफलप्रेप्सुः कर्म
फलार्थी लुब्धः परद्रव्येषु संजाततृष्णस्तीर्थादौ स्वद्रव्यापरित्यागी हिंसात्मकः परपीडात्मकस्वभावः अशुचिर्बाह्यांतःशौचवर्जितो हर्षशोका

मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्विक उच्यते २६ रागी कर्मफलप्रेप्सुर्लुब्धो हिंसा
त्मकोऽशुचिः हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः २७ अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः विषादी दीर्घ
सूत्री च कर्त्ता तामस उच्यते

न्वितः इष्टप्राप्तौ हर्षोऽनिष्टप्राप्तौ च शोकः २८ कैस्ताभ्यां हर्षशोकाभ्यां समन्वितः संयुक्तः तस्यैव च कर्मणः संपत्तिविप
त्तौ हर्षशोकौ स्यातां ताभ्यां संयुक्तो यः स कर्त्ता राजसः परिकीर्त्तितः २७ अयुक्त इत्ययुक्तोऽसमाहितः प्राकृतोऽत्यंतासंस्कृतबुद्धिर्बालसमः
स्तब्धो दंडवन्न नमति कस्मैचित् शठः शक्तिगूहनकारी मायावी नैष्कृतिकः परवृत्तिच्छेदनपरः अलसोऽप्रवृत्तिशीलः कर्त्तव्येष्वपि विषादी सर्वदाः
वसन्नस्वभावः दीर्घसूत्री च कर्त्तव्यानां दीर्घप्रसारणः सर्वदा मंदस्वभावः यदद्य श्वो वा कर्त्तव्यं तन्मासेनापि करोति यश्चैवंभूतः स कर्त्ता तामस उ
स्वाभिप्रायप्रकटीकरणप्रवंचकः परपीडनेपरं वृत्तिविच्छेदनेन स्वार्थपरः स्तपे २८ दीर्घसूत्रपितृशीलमसेतिष्ठ स्वजितर्हीत्वा विवशितमर्थमाहर्त्ता
ध्यातामि एवं क्रियमाणे स्वस्यानिष्टमिदं केचिद्विदापयेत्तपयाप्नोर्वे वैक्रियते तथापि तं निष्ठमेवं संभावनोपनीतमिति श्चितापरंपरायामेव प्रवृत्तिशीलः सर्पे तदेवम

नम
न
ति
ति
स
मंदप्रवृत्ति

253

पः
२२

राजसं कर्म:

राजसं कर्म निर्दिशति यत्त्विति फलप्रेप्सुना कर्त्रा यत्कर्म क्रियते न तद्राजसमित्युक्तेरेव संबंधः तत्त्वज्ञानवता निरहंकारेण साहंकारेणेत्युक्तिः न क्रियते कर्मेति वि
वक्षाभावात् इति साहंकारेणेति न तत्त्वज्ञानवता निरहंकारेण तु तेनैवापेक्ष्य साहंकारेणाहा न तु तेन राजसत्कर्मेति न विवक्ष्यते चेत्तर्हि किमर्थं विवक्षितमिति च
छात्रिकितंडीति यो हि श्रोत्रियो लोकाद्वेदपरतन्त्रः सपरहंकाराद्युजितं कर्मनरपेक्ष्य सपरं साहंकारेणाहतं तेनैवस्तुतः मिसाद्रः मे

स्मृ यत्त्विति यत्तु कामेप्सुना कर्म फलप्रेप्सुना तेन यत्कर्म साहंकारेण वा साहंकारेणेति न तत्त्वज्ञानापेक्षया किंतर्हि लौकिकश्रोत्रियापेक्षया निरहंकारापेक्षया
यदि हि परमार्थनिरहंकारश्चात्मविन्नेतस्य कामेप्सुत्वबहुलायासकर्तृत्वप्राप्तिर्हि तल्लौकिकस्यापि कर्मणो नात्मवित्त्वाहंकारः कर्माधिकृतत्व
जसंतानमसपोऽलौकिकेनात्मवित्त्वश्रोत्रियोऽनिरहंकार उच्यते निरहंकारो वेदान्त्यागरतितस्मात्तदपेक्षया एव साहंकारेणेत्युक्तं पुनःशब्दः पा

यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः। क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥२४॥
अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषम्। मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥२५॥

दपूरणार्थः क्रियते बहुलायासं कर्त्रा महता आयासेन निर्वर्त्यते तत्कर्म राजसमुदाहृतम् ॥२४॥ अनुबंधमिति [illegible] अनुबंधं पश्चाद्भावि
य ह्यत्सोऽनुबंध उच्यते तं चानुबंधं क्षयं कर्मणि क्रियमाणे शक्तिक्षयं वा धनक्षयं हिंसां प्राणिपीडां अनपेक्ष्य च पौरुषं पुरुषकारं पदद्वयोः
अनुबंधादिन्य सपत शक्तोऽमीदं कर्म समापयितुमिति स्वसामर्थ्यमनपेक्ष्य पौरुषं ताभिमोहादविवेकत आरभ्यते कर्म यत्तत्तामसं तमोनिर्वृत्तमुच्यते ॥२५॥
लौकिकेति ननु तत्त्वज्ञानवतो निरहंकारस्य कर्मकर्तृत्वमपेक्ष्य साहंकारेणेत्याहि किं न व्युत्पत्त्यारम्भो लौकिकेति विशेषणं तत्त्वस्य रागद्वेषात्मस्य विरोधं निवारित
त्वान्नतदपेक्षया सिद्धे विशेषणाभिप्रायः साहंकारस्यैव राजसकर्मणि कर्तृत्वमित्यत्र लौकिकस्याप्यपेक्षया साहंकारस्यैव तेनात्मविदो मनसः निर
अपेक्षया हंकारत्वापेक्षया लक्षणं तदपेक्षया साहंकारेणेत्युक्तं न चाहं लौकिक इति ॥२४॥ सेयमिति तामसं कर्मोदाहरति अनुबंधमित्यादिना ॥२५॥

गी.भा.१८ विशेषशब्देन ज्ञानात्मा वृत्तिरिष्टा कार्याकार्ये ये धर्माधर्माभ्यां पौनरुक्त्यं परिहरति प्रवृत्तिं चेति पूर्वश्लोके कार्याकार्यशब्दाभ्यां दृष्टादृष्टायोनोः कर्मणोः करणा ऽ
१३ करणे निर्दिष्टे नयोरेवात्र विग्रहातने धर्माधर्माभ्यामपवेपर्याया भागतापैनेत्यर्थः प्राबुद्धिपेपाबुभावो हानिर्णयेनेन जानातीत्यर्थः ३१ धर्मशब्दो नपुंसकलिंगो
पीत्यभिप्रेत्य धर्ममित्युक्तं तमसावृता। विवेकेन वेष्टिता इत्यर्थः कार्याकार्यादीन् ज्ञानानुक्ता अत्र संगृहीतान् सर्वार्थानित्युक्तं न मायाचेष्टः सर्वानेवेति ३२ विपरीतांश्चेति चका
३ [illegible] रेवं धारणोपहीत्वा विपरे
यथेति यया धर्मं शास्त्रचोदितं अधर्मं च प्रतिषिद्धं कार्यं वाकार्यं वाकार्यमेव चपूर्वोक्ते रावु कार्याकार्ये अयथावत्तनयथावत्तत्त्वतो निर्णयेन न प्रजाना
ति बुद्धिः सा पार्थ राजसी ३१ अधर्ममिति अधर्मं प्रतिषिद्धं धर्मं विहितमिति या मन्यते जानाति तमसावृता तमोग्रस्ता सर्वार्थान् सर्वानेव ज्ञेयपदार्थान्वि
परीतांश्च विपरीतानेव विजानाति बुद्धिः सा पार्थ तामसी ३२ धृत्येति धृत्या यया। अव्यभिचारिण्येति अव्यवहितेन संबंधः धारयते किं मनःप्राणेन्द्रि

यया धर्ममधर्मं च कार्यं चाकार्यमेव च अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ३१ अधर्मं धर्ममिति या मन्यते तमसावृता
२५४ सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ३२ धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः योगेनाव्यभिचारिण्या धृतिः
सा पार्थ सात्त्विकी ३३

यक्रियाः मनश्च प्राणाश्चेन्द्रियाणि च मनःप्राणेन्द्रियाणि तेषां क्रियाश्चेष्टास्ता उन्मार्गप्रवृत्तं धारयति धृत्या हि धार्यमाणा उच्छास्त्रविषया
न भवंतीति योगेनेति योगेन समाधाने नाव्यभिचारिण्या नित्यसमाध्यनुगतयेत्यर्थः एतदुक्तं भवति अव्यभिचारिण्या धृत्या मनःप्राणेन्द्रियक्रिया धार्यमा
णा योगेन धारयतीति या एवंलक्षणा धृतिः सा पार्थ सात्त्विकी ३३

मानेवमुक्तं रत्नानीत्रैविध्यमुत्साहपत्नर्मेटो सात्त्विकी धृतिरुत्साहं प्रति धृत्येति निर्दिष्टानां चेष्टानां कर्तव्यधृत्या धारणं तत्र धारयतीति तदेवानुभवेन साधयति न
१ त्याहेति प्रियत्वेनयेति धृतिर्यल विशेषः तया धृत्या धार्यमाणा यथोपदिष्टाश्चेष्टा शास्त्रमनतिक्रममाणा स्वार्थान्नयात्र हिन्नो भवंतीत्यर्थः धृतिमेव समाध ना
विनाभूतत्वेन विशिनष्टि योगेनेति नित्यं धृतेर्नियमेन सामाध्यनुगतत्वकथमुक्तं क्रियाधारणे यथोगत्सारंभाह एतदिति उक्तक्रियाधार्यमाणेन योगेन
व्यक्तिणि समाधाने नैकाग्र्येणाव्यभिचारिण्या विनाभूतया धृत्या धारयत्यन्यथा नटविनाभावाभावे नियमे नकहारणाति देरित्यर्थः ३३

एका०
१३

ज्ञानादीनां प्रत्येकं त्रैविध्यमुक्त्वा वृत्तिमतां बुद्धेस्तज्जे धृत्या व्याप्तास्त्रैविध्यं सत्त्वपृति बुद्धेर्धृतेश्च विवरणं प्रतिजानीते प्रोच्यमानमिति अर्जुनस्यैजपत्वं बुमारूय धनं
ति दिगिति २९ तत्रादौ सात्त्विकीं बुद्धिं निर्दिशति वेति प्रवृत्तिं च रणमात्रमर्जुनाचरणमात्रं चेनिवृत्तिरिति किं नेष्यते तत्राह बन्धेति पत्मिन्त्वाके बन्धमोक्षाव
चेमनेनसिन्नेव प्रवृत्तिनिवृत्त्योः रक्तत्वालकर्ममार्गस्य बन्धहेतुत्वान्मोक्षहेतुत्वाच्च संन्यासमार्गस्य तावेवात्र यथाविसर्पः करणाकरणयो निर्विशे

बुद्धेर्भेदमिति बुद्धेर्भेदं धृतेश्चैव भेदं गुणतः सात्त्विकादिगुणतः त्रिविधं मयाविवक्षितमू ओपन्यासः प्रोच्यमानं कथ्यमानमशेषेण निरवशेषतो
पृथक्त्वेन पृथक्कृत्वे न विवेकतो धनंजय दिग्विजये मानुषं दैवं च प्रभूतं धनमाजह्रे तेनासौ धनंजयोऽर्जुनः २९ प्रवृत्तिं चेति प्रवृत्तिं च प्र
वृत्तिः प्रवर्तनं बन्धहेतुः कर्ममार्गः निवृत्तिं च निवृत्तिं मोक्षहेतुः संन्यासमार्गः बन्धमोक्षसमानं नेवाकात्वात प्रवृत्तिनिवृत्ती कर्मसंन्यासमार्गौ
विसर्गगम्येनेकार्याकार्ये विहितप्रतिषिद्धे लौकिके वा वैदिके वाकर्तव्याकर्तव्ये करणाकरणे संसारतन्त्र अदृष्टकालापः भयाभये दृष्टा

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय २९ प्रवृत्तिं च निवृत्तिं च कार्या
र्याकार्ये भयाभये बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ३०

कार्याकार्ययोः कर्मणोः भयाभये बिभेति अस्मादिति भयं तन्न भयं अभयं भयं चाभयं च भयाभये दृष्टादृष्टविषयो भयाभययोः कारणे सं
सर्पः बन्धं सहेतुकं मोक्षं च सहेतुकं या वेत्ति सा पार्थ सात्त्विकी तत्र ज्ञानं बुद्धेर्वृत्तिर्बुद्धिस्तु वृत्तिमती धृतिरपि वृत्तिविशेष एव बुद्धेः

ननु सात्त्विकी योगाद्विषयापेक्षा सर्वज्ञानार्थे योग्य विषयं निर्दिशति किं सम्यक् निश्चयनिष्ठसाधनेऽपि विहसाधनमर्भय मिति विभजते भयेति वं धादिज्ञानमात्र
स्य बुद्धेरनेऽपि विशेषवाद्विशेषणं न तु बुद्धिर्वृद्धितस्य ज्ञानस्य प्रागेव त्रैविध्यप्रतिपादनात् किमिति बुद्धेरिदानीं त्रैविध्यं प्रतिज्ञापरत्वं तत्राह ज्ञान नि
ति नहि ज्ञानेन गतत्वात् पुनः धृतिबुद्ध्योः साध्योपेक्षाणं क्वाप्यतिद्विप्रतिपत्ति ३०

दुःखात्मकत्वे दृष्टान्तमाह १

गी॰भा॰ तत्रैतत्सात्त्विकं सुखमादेयत्वेन दर्शयति यत्तदिति प्रथमसन्निपाते विभजते ज्ञानेति कुतस्तस्य दुःखात्मकत्वं तत्राह अत्यंतेति विषमिवेति ज्ञानादिपरिपाकावस्थापरि

२४ णामेत्तस्मिन्नमृतमिति ततो जातमित्यभिप्रेत्य नाम्ना तत्रैव हेतुमाह आत्मनु रति आत्मबुद्धिरात्मबुद्धिर्वा योगात्माह आत्मविषयेति अंतःकरणे नैर्मल्याद्यासम्पन्नात्मक

र्वा हत्यस्मादिति तत्त्वद्रष्टारः ३७ एवं सत्त्वसुखे हेयत्वाय कथयति विषयेति बलसंघातस्यामंदवीर्यपराक्रममहत्त्वं तत्प्रयोजनं शरीरसौंदर्यप्रज्ञास्मृत्यादि

यत्तदिति यत्तत्सुखमग्रे पूर्वं प्रथमसन्निपाते ज्ञानवैराग्यध्यानसमाध्यारंभे अत्यंतायासपूर्वकत्वाद्विषमिव दुःखात्मकं भवति परिणामे ज्ञान
वैराग्यादिपरिपाकजं सत्सुखममृतोपमं तत्सुखं सात्त्विकं प्रोक्तं विद्वद्भिः आत्मनो बुद्धिरात्मबुद्धिरात्मबुद्धेः प्रसादो नैर्मल्यं सलिलवत्स्वच्छता ततो जात
मात्मबुद्धिप्रसादजं अथवात्मविषया वात्मालंबना बुद्धिस्तत्प्रसादप्रकर्षाद्वा जातमित्यतोऽस्मात्सात्त्विकं मतं ३७ विषयेति विषयेंद्रियसंयोगा

255

यत्तदग्रे विषमिव परिणामेऽमृतोपमम् तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ३७ विषयेंद्रियसंयोगाद्यत्तदग्रे
मृतोपमम् परिणामे विषमिव तत्सुखं राजसं स्मृतम् ३८ यदग्रे चानुबंधे च सुखं मोहनमात्मनः निद्रालस्यप्रमादो
त्थं तत्तामसमुदाहृतम् ३९

यत्सुखं जायते अग्रे प्रथमं क्षणे अमृतोपमं तस्य परिणामे विषमिव बलवीर्यरूपप्रज्ञामेधाधनोत्साहहानिहेतुत्वादधर्मतज्जनितनरका
दिहेतुत्वाच्च परिणामे तदुपभोगस्य परिणते विषमिव तत्सुखं राजसं स्मृतम् ३८ यदग्रे चेति यदग्रे चानुबंधे चावसानोत्तरकाले सुखं मोह
करमात्मनो निद्रालस्यप्रमादोत्थं निद्रा चालस्यं च प्रमादश्च तेभ्यः समुत्तिष्ठतीति निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ३९

ग्रहणसामर्थ्ये धारणशक्तौ जायमानविस्मरणेन धारणशक्तिः धनं गोहिरण्यादि उत्साहः कार्ये प्रत्युपक्रमादिः एतेषां नाशकत्वाद्वैषयिकं सुखं विष
समित्यर्थः तत्रैव हेतुत्वं तं माह अधर्मेति ३८ तामसं सुखं सोपाधिकमेवोदाहरति यदग्रे चेति अनुबंधशब्दार्थमाह अवसानेति मोहनं मोहकरं तदुत्प
त्तिहेतुमाह निद्रेति ३९ राम॰
२४

राजसींधृतिंदर्शयति ययात्विति तेषांधारणप्रकारमभिनयति मनसीतिफलाकांक्षीतिकसविशेषणंतत्राह प्रसंगेनेति ३४ तामसींधृतिमाचष्टे ययेति शोकं
प्रियवियोगनिमित्तंसंतापंविषादं बहलानामिंद्रियाणांग्लानिंविषयसेवाकुमार्गप्रवृत्तेरुपलक्षणमुक्तंस्वप्नादिमर्यादितंसर्वमेवकर्तव्यतयामन्यमानोमन
सिनित्यमेवकुर्वन्दुर्मेधानमुंचति किंतुधारयत्येवेतियोजना ३५ एवंमनउपाधानंतरश्लोकत्रयमाह गुणोत्पादितानांक्रियाकारकाणांगुणात्रैविध्योक्त्वा

ययेति यया तु धर्मकामार्थान्धर्मश्चकामश्चार्थश्चतान्धर्मकामार्थान्धृत्यायया धारयते मनसि निश्चयंकर्तव्यतया नवधारयतेऽर्जुन प्रसंगेनयस्य
यस्यधर्मादेर्धारणप्रसंगस्तेनतेनप्रसंगेनफलाकांक्षीचभवतिपुरुषस्तस्यधृतिर्यासापार्थराजसी ३४ ययेति यया स्वप्नं निद्रां भयं त्रासं शोकं स
स्म तापंविषादंमदमेवसादंविषयसेवामदं विषयसेवाम [illegible] मनोवृत्तमन्यमानोममदंवमदमेवचमनसिनित्यमेवचकर्तव्य न

ययातुधर्मकामार्थान्धृत्याधारयतेऽर्जुनप्रसंगेनफलाकांक्षीधृतिःसापार्थराजसी ३४ ययास्वप्नंभयंशोकंविषादं
मदमेवचनविमुंचतिदुर्मेधाधृतिःसापार्थतामसी ३५ सुखंत्विदानींत्रिविधंशृणुमेभरतर्षभ अभ्यासाद्रमतेयत्र
दुःखांतंचनिगच्छति ३६

रूपतयाकुर्वन्नविमुंचतिधारयतिएवंदुर्मेधाःकुत्सितमेधाःकुपुरुषोयस्तस्यधृतिर्यासातामसीमता ३५ गुणभेदेनक्रियाणांकारकाणांच र्थं
त्रिधाभेदमुक्त्वेदानींफलस्यसुखस्यत्रिधाभेदमुच्यते सुखमिति सुखंतुइदानींत्रिविधंशृणुसमाधानंकुर्वित्यनेनममभरतर्षभ अभ्यासात्
रिचयाद्बलेःरमतेरतिंप्रतिपद्यतेयत्रयस्मिन्सुखेनानुभवेदुःखांतंचदुःखावसानंदुःखोपरमंचनिगच्छतिनिःशेषेणप्राप्नोति ३६

अनेनफलस्यसुखस्यत्रैविध्योक्तावतरणीमाह सुखमितिद्वितीयपादेयथेरतंचैतत्त्रैविध्यंसमाधानमैकाग्र्यमवधानादितिशेषः यत्रेमभ्यासेवधानेज
त्रिविधंसुखमितिपूर्वेणसंबंधः ३६ श्रीरामचंद्रायनमः ७ ॥

गी॰भा॰ १८
२५

संप्रति वर्णचतुष्टयस्यानुष्ठेयं धर्मं ज्ञानमसंकीर्णमिति निःश्रेयसमुपन्यस्यति ब्राह्मणेति। उपनयनसंस्कारवत्त्वे सति वेदाधिकारित्वं समानमिति त्रयाणां समासकरणम्। इतरेषामसमासे हेतुमाह शूद्राणामिति। एकजातित्वमुपनयनवर्जितत्वं कर्मणामसंकीर्णत्वेन अवस्थापकं प्रश्नपूर्वकं प्रकटयति केनेत्यादिना स्वभावप्रभवैर्गुणैरित्यस्यार्थान्तरमाह अथवेति। उक्तव्यवस्थायां कार्यदर्शनं प्रमाणयति पूर्वेणीति स्वभावशब्दस्यार्थान्तरमाह अथवेति किमिति गुण ८

उरुषार्थमिच्छद्भिरनुष्ठेय इत्येवमर्थं च ब्राह्मणक्षत्रियविशामित्यादिरारभ्यते ब्राह्मणेति ब्राह्मणाश्च क्षत्रियाश्च विशश्च ब्राह्मणक्षत्रियविशस्तेषां ब्राह्मणक्षत्रियविशां शूद्राणां च शूद्राणामसमासकरणमेकजातित्वे सति वेदानधिकारात् हे परंतप कर्माणि प्रविभक्तानीतरेतरविभागेन व्यवस्थापितानि केन स्वभावप्रभवैर्गुणैः स्वभाव ईश्वरस्य प्रकृतिस्त्रिगुणात्मिका माया सा प्रभवो येषां गुणानां ते स्वभावप्रभवास्तैः शमादीनि कर्माणि प्रविभक्तानि ब्राह्मणादीनाम् अथवा ब्राह्मणस्वभावस्य सत्त्वगुणः प्रभवः कारणं तथा क्षत्रियस्वभावस्य सत्त्वोपसर्जनं रजः प्रभवः वैश्यस्वभावस्य तमउपसर्जनं रजः प्रभवः शूद्रस्वभावस्य रजउपसर्जनं तमः प्रभवः प्रशान्त्यैश्वर्येहामूढतास्वभावदर्शनाच्चतुर्णाम् अथवा जन्मान्तरकृतसं- पं ५

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप। कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ४१

स्कारः प्राणिनां वर्तमानजन्मनि स्वकार्याभिमुखत्वेनाभिव्यक्तः स्वभावः स प्रभवो येषां गुणानां ते स्वभावप्रभवा गुणाः गुणप्रादुर्भावस्य निःकारणत्वानुपपत्तेः स्वभावः कारणमिति कारणविशेषोपादानं स्वभावप्रभवैः प्रकृतिप्रभवैः सत्त्वरजस्तमोभिर्गुणैः स्वकार्यानुरूपेण शमादीनि कर्माणि प्रविभक्तानि ननु शास्त्रप्रविभक्तानि शास्त्रेण विहितानि ब्राह्मणादीनां शमादीनि कर्माणि कथमुच्यते सत्त्वादिगुणप्रविभक्तानीति नैष दोषः शास्त्रेणापि ब्राह्मणादीनां सत्त्वादिगुणविशेषापेक्षयैव शमादीनि कर्माणि प्रविभक्तानि न गुणानपेक्ष्य

स्य

भिव्यक्तेरुक्तं वासनाधीनत्वं तत्राह गुणेति ननु नास्ति गुणप्रादुर्भावस्य निष्कारणत्वं प्रकृतिजैर्गुणैरिति शास्त्रप्रविभक्तान्यपि कर्माणि गुणप्रभवा रिति प्रकृतेर्गुणकारणत्वाभिधानादत आह स्वभाव इति वासनाकारणमिति गुणाभिव्यक्तेर्निमित्तकारणत्वं विवक्षितं प्रकृतिस्तूपादानमिति भावः उक्तमुपसंहरति एवमिति स्वभावप्रभवैः सत्त्वादिगुणैर्ब्राह्मणादीनां कर्माणि प्रविभक्तानीत्युक्तमाक्षिपति नन्विति शास्त्रस्य धर्मविभागहेतोः सत्त्वादिगुणविशेषापेक्षयैव विभागज्ञापकत्वादुभयपक्षविभागहेतुत्वोक्तिरविरुद्धेति परिहरति नैष दोष इति ४१ ॥ ७

नहीतितैगुणो

२१

क्रियाकारकफलात्मनः संसारस्य प्रत्येकं सात्त्विकादिभेदेन त्रैविध्यमुक्त्वा संसारान्तर्भूतमेव किंचिद्गुणत्रयास्पृष्टमपि ह्यविद्वद्विषयतोऽसारांशमाह अथेति संसा
रस्य सर्वस्यैव गुणत्रयस्पृष्टत्वे प्रकरणं अन्यद्वा प्राणीत्यत्र प्राणिशब्देन प्रसिद्धास्थावरादिग्रहणं ते प्रकरणोपसंहृतमनुवदति सर्वेति तस्यानेकात्मक
त्वेन हेयत्वं सूचयति क्रियेति निर्गुणादात्मनो वैलक्षण्यापादनस्य हेतुमाह सत्त्वेति अनर्थत्वात्तस्य त्याज्यत्वमनर्थत्वं चाविद्याकल्पितत्वेनावस्तुनो व
स्तुवद्भानादित्याह अविद्येति न केवलमष्टादशे संसारो दर्शितः किंतु पञ्चदशेऽपीत्याह वृक्षेति चकारादुक्तः संसारस्य वृक्षरूपत्वे संसारच्छित्तिसाधनं सम्यग्ज्ञानं
च तत्रैवोक्तमित्याह असंगेति उक्तमनूद्यानन्तरसंदर्भतात्पर्यमाह तत्रेति उक्तो विनिवर्तयिषितः संसारः तन्निमित्तप्रश्नमापादयन्नस्यते सर्वो हि संसारो गुणत्र

अथेदानीं प्रकरणोपसंहारार्थः श्लोक आरभ्यते नेति न तदस्ति तन्नास्ति पृथिव्यां वा मनुष्यादिषु सत्त्वं प्राणिजातमन्यद्वा अप्राणिजातं दिवि देवेषु वा
पुनः सत्त्वं प्रकृतिजैः प्रकृतितो जातैरेभिस्त्रिभिर्गुणैः सत्त्वादिभिर्मुक्तं परित्यक्तं यत्स्याद्भवेन्न तदस्तीति पूर्वेण संबन्धः सर्वः संसारः क्रियाकारकफल
लक्षणः सत्त्वरजस्तमोगुणात्मकोऽविद्यापरिकल्पितः समूलोऽनर्थ उक्तः वृक्षरूपकल्पनया चोर्ध्वमूलमित्यादिना तं चासंगशस्त्रेण दृढेन छित्त्वा ततः

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ४०

पदं तत्परिमार्गितव्यमिति चोक्तं तत्र चोक्तः सर्वस्य संसारस्य त्रिगुणात्मकत्वात्संसारकारणनिवृत्त्यनुपपत्तौ प्राप्तायां यथा तन्निवृत्तिः स्यात्त
था वक्तव्यं सर्वश्च गीताशास्त्रार्थ उपसंहर्तव्य एतावानेव सर्वो वेदस्मृत्यर्थः ४०

यात्मको न च गुणेभ्योऽन्यः प्रकृत्यात्मकानां संसारकारणीभूतानां निवृत्तिर्युक्ता प्रकृतेर्नित्यत्वादित्याशंक्यापोह्य स्वधर्मानुष्ठानात्तत्त्वज्ञानोत्पत्त्या संगु
णानामस्तानात्मकानां निवृत्तिर्यथा भवति तथा स्वधर्मज्ञानेन कर्तव्यमिति उक्तार्थं प्रवृत्तिरित्यर्थः ब्राह्मणादिप्रयुक्तधर्मज्ञानानुपदेशे चोपसंहारप्रकरण
प्रकोपः स्यात्तदाह सर्वश्चेति उपसंहृते गीताशास्त्रार्थे पर्यवसितो वेदार्थः स्मृत्यर्थः सर्वोऽप्युपसंहृतस्तत्रापि प्रश्न इत्यपि वक्तव्यमवशिष्ट
मित्याशंक्याह एतावानिति अनुष्ठेयपरिमाणनिर्देशात्पुरुषाकांक्षानिवर्तनेन शास्त्रार्थोपसंहारश्लोकानां भपेचकारणं ४०

257

स्वभावेन तु प्रवृत्तस्य शमादिपरिचर्यान्तकर्मणां विभज्योक्तानां मनुष्यस्य फलमाह उपन्यस्यति एतेषामिति स्वभावाहितेति तत्तादेवमोक्षापेक्षामन्तरेणानुष्ठानादि स्वर्गः तत्र प्रमाणमाह वर्णाश्रमा इति शेषशब्देन भुक्तकर्मणः इति तं कर्मणा शेषशब्दितमुच्यते प्रत्येकं देशादिभिर्विशिष्टशब्दः तं वर्णं स्वादिरूपदेन तद्यथाम्रे फलार्थे निमित्ते छायागन्ध इत्यनूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते नु धर्महानिर्भवतीति स्मृतिः एतेरतः सर्वज्ञानां कर्मणां स्वर्गफलत्वमुक्तमित्याह पुराणे चेति उक्तं हि यत्तु सम्यक् करोत्येतत्तद्गृहस्थः परमां विधिं तद्वर्णविधमुक्तो। सोऽलोकानाप्नोत्यनुत्तमानिति प

कृषीति कृषिगोरक्ष्यवाणिज्यं कृषिश्च गोरक्ष्यं च वाणिज्यं च कृषिगोरक्ष्यवाणिज्यं कृषिर्भूमेर्विलेखनं गोरक्ष्यतीति गोरक्षस्तत्तद्भावो गोरक्ष्यं पशुपाल्यं वाणिज्यं वणिक्कर्म क्रयविक्रयादिलक्षणं वैश्यकर्म वैश्यजातेः कर्म वैश्यकर्म स्वभावजं परिचर्यात्मकं शुश्रूषा स्वभावं कर्म शूद्रस्यापि स्वभावजं ४४ एतेषां जातिविहितानां कर्मणां सम्यगनुष्ठितानां स्वर्गप्राप्तिः फलं स्वभाव

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ४४

तः वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलधर्मायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते इत्यादिस्मृतिभ्यः पुराणेषु च वर्णिनामाश्रमिणां च लोकफलभेदविशेषस्मरणात् स्मरणान्तरात् दृष्टी देवज्यमाणं फलं न तत्र इष्यते

स्वर्गाणि पतत्स्वर्गीयानप्रस्य स्वस्वरेनुमुनिः सदैह सम्भव दोषान् नप्रपेल्लोकाश्च शाश्वतानि निमेषाश्रमं प्राप्ते पद्योक्तं स्मृतिः तत्तं कलिनवृद्धिप्रकृतं अग्निं धनं ज्योतिरिव प्रशान्तं सर्वं लोकं प्रपन्ने द्विजातिरिति च सर्वेणैव पुण्यलोका भवन्तीति श्रुतिश्च काण्वः पदिप्रवृत्तो मोक्षापेक्षयोक्तानि कर्माण्यनुष्ठीयमानानि हमेश फलत्वेनैवोपासेत्यनीत्याह कारणान्तरादिति ॥ ॥

ल
३६

प्रविभक्तानि कर्माण्येवं प्रश्नद्वारा विविच्य दर्शयति शमो दमस्त्यादिना अन्तःकरणोपरमः शमो दमो बाह्यकरणोपरतिः संतोषतां त्यजति तपइति त्रिविधं तपः मे
पूर्वोक्तं दर्शितमित्याह तपइति शौचमपि बाह्याभ्यन्तरभेदेन प्रागेवोक्तमित्याह शौचमिति क्षमा नाम [illegible] हृष्टस्य ताडितस्य वा मनसि विकाराराहित्यं
ज्ञानं शास्त्रोत्थं पदार्थज्ञानं विज्ञानं शास्त्रार्थस्य स्वानुभवापत्तिः आपादानं त्रिधा व्याख्यातं स्वभावशब्दार्थमुपेत्याह ब्रह्मकर्मेति ४२ स्वभावो

ब्राह्मणत्वेन लोके कर्माणीत्युच्यते शमइति शमो दमश्च यथाव्याख्यातार्थौ तपो यथोक्तं शारीरादि शौचं व्याख्यातं क्षान्तिः क्षमा आर्जवमृ-
जुता एव च ज्ञानं विज्ञानं आस्तिक्यं आस्तिकभावः श्रद्दधानता आगमार्थेषु ब्रह्मकर्म ब्राह्मणजातेः कर्म स्वभावजं यदुक्तं स्वभाव-
प्रभवैर्गुणैः प्रविभक्तानीति तदेवोक्तं स्वभावजमिति ४२ शौर्यमिति शौर्यं शूरस्य भावस्तेजः प्रागल्भ्यं धृतिर्धारणं सर्वावस्थास्वनवसादो

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ४२
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ४३

त भवति यया धृत्योत्तम्भितस्य दाक्ष्यं दक्षस्य भावः सहसा प्रवृत्तेषु कार्येष्वव्यामोहेन प्रवृत्तिर्युद्धे चाप्यपलायनमपराङ्मुखीभावः शत्रुभ्यः [illegible]
दानं देयेषु मुक्तहस्तता ईश्वरभावश्च ईश्वरस्य भावः प्रभुशक्तिप्रकटीकरणमीशितव्यान्प्रति क्षात्रं कर्म क्षत्रियजातेर्विहितं क्षात्रं कर्म स्वभा-

तु हारश्चतुर्ला षी

विक्रमो बलवत्तरानपि प्रहर्तुं प्रवृत्तिः प्रागल्भ्यं परैरधर्षणीयत्वं महत्स्वपि विपत्सु देहेन्द्रियोत्तम्भनी चित्तवृत्तिर्धृतिरिति व्याचष्टे सर्वाव-
स्थास्विति दक्षस्य भावमेव विभजते सहसेति ४३ ॥ ॥ ॥ ७

गी॰भा॰१८
१०

नहि ब्राह्मणादीनां यथोक्तधर्मनिष्ठया सा आत्मोपलम्भस्तेन स्वस्तानैकलभ्यो [illegible] त्वालिंगं तु तन्निष्ठानां मु६ ऋद्धीनां कर्मसु फलमप्यस्तामी
स्व(प्र)सादाससादितविवेकवैराग्यवतां सन्न्यासिनां ज्ञाननिष्ठायोग्यतासाधनं ज्ञानप्राप्तामुक्तिरीत्यभिप्रायात्केवलमिति ४६ स्वधर्मानुष्ठानस्य बुद्धिशुद्धिद्वारे
मोक्षावसायित्वात्तदनुष्ठानमावश्यकमित्याह यतएति न्यूनाङ्गोऽपि स्वधर्मं कुर्वन्नपि हिंसादीनेन पापं प्राप्नोतीति तत्कार्यस्वधर्मः श्रेयानिति तत्रा
स्वभावेति स्वकीयवर्णाश्रमनिमित्तोक्तं स्वविहितं स्वभावजमित्यर्थः तावदुक्तमित्याह यदुक्तमिति नियतात्मकमपि विहितं कर्म कुर्वन् पापं नाप्नोतीत्य
ग्रहणं तमाह यथेति रक्तस्य विहितं कर्म दोषवदपि कर्तव्यं प्रकारान्तरेण नेत्यवस्थादिग्रहणा तुर्वादप्यवेकल्पप्रतिस्वभावे सादिना नहि हिंसाविविज्ञो विष

स्व
स्वकर्मणा पूर्वोक्तेन प्रतिवर्णं तमीश्वरमभ्यर्च्य तपित्वाराध्य केवलं ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं विन्दति मानवः ४६ यतएवम
तः श्रेयानिति श्रेयान्प्रशस्यतरः स्वधर्मः स्वो धर्मः विगुणोऽपि अन्यपि शब्दो रक्षः परधर्मात्स्वनुष्ठितात् स्वभावनियतं स्वभावेन नि
यतं यदुक्तं स्वभावजमिति तेन देवोक्तं स्वभावनियतमिति यथा विषजातस्येव कृमेः विषं न दोषकरं तथा स्वभावनियतं कर्म

258

स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ४६ श्रेयान्स्वधर्मो विगुणः
परधर्मात्स्वनुष्ठितात् स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ४७

कुर्वन्नाप्नोति किल्बिषं पापं स्वभावनियतं कर्म कुर्वाणो विषजात इव कृमिः किल्बिषं नाप्नोतीत्युक्तं ४७ परधर्मस्य भया
वहत्वेनात्मनः स्वेन हि कश्चित्क्षणमप्यकर्मकृत्तिष्ठतीत्यतः श्रीएवद्वापनमः
नियमितं मरणं प्रतिपद्येत पापमपि [illegible] ननु पुरुषो दोषवदपि विहितं कर्म कुर्वन् पापं नाप्नोतीत्युक्तमित्यर्थः ४८ तर्हि दोषरहितमेव विभाव्य ना
दि सर्वे रनुष्ठीयतां न पापप्राप्तिशङ्केत्याशंक्याह सहजमिति उक्तमित्यनुवर्तते न तु हि पापप्राप्तिशङ्कापरिहृता मे कर्मणि सहस्र मेव सर्वेषां सादिकं
कालानां भावान्येवमित्याह श्रेनात्मन इति एकैव इत्यापि सर्वेषः प्रकारान्तरं तं सम्यक् इत्यर्थ तथाह अतरति ॥ ॥

यतां२

१८०
१

तदेवं कारणानां तत्पमोक्षौपैत्यपानेषामनुष्ठाने मोक्षोपायेषु शमादिषु सात्विकेषु ब्राह्मणधर्मेषु क्षत्रियादीनामनधिकाराद् ब्राह्मणानामेव मोक्षो
न क्षत्रियादीनामित्याशंक्याह स्वे स्वे इति पद्या स्वे कर्मणि अभि तत्स्वबुद्धिशुद्धिद्वारा ज्ञाननिष्ठायोग्यतातः प्राप्ताप्राप्नुतान सम्मोक्षोपपन्ने
ब्राह्मणातिरिक्तस्यापि ज्ञानवतो मुक्तिरिति मत्वा पूर्वार्द्धं आचष्टे स्वे स्वे इत्यादिना संसिद्धिं राज्य स्वभावोत्थार्थं लगहीत्वा स्वधर्मनिरतत्वमात्रेण न
ह्याभेतारप्पैन संन्यासादिविधानानर्थक्यमिति मन्वानः शंकते किमिति न तावन्मात्रेण ज्ञानाभ्यासतो ज्ञाननिष्ठायोग्यता चेति परिहरति

स्वे स्वे इति स्वे स्वे यथोक्तं लक्षणभेदे कर्मण्यभिरतः तत्परः संसिद्धिं स्वकर्मानुष्ठानात् शुद्धिरूपसात्विकां पैंद्रियाणां ज्ञानाधिष्ठा
वं नयोग्यतालक्षणां लभते प्राप्नोति नरः । क्षिह्नतः पुरुषः किं स्वकर्मानुष्ठानतएव साक्षात्संसिद्धिं न तु पर्यंतर्हि स्वकर्मनिरतः सि

नरः स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते स्वकर्मनिरतः सिद्धिं यथा
विंदति तच्छृणु ४५ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्

द्धिं यथा येन प्रकारेण विंदति तच्छृणु ॥४५॥ यत इति यतो परमेश्वरात् भूतानां प्रवृत्तिश्चेष्टा यस्मादंतर्यामिणः ईश्वरात् भूतानां प्राणिनां स्वा
नुरूपेण व्योम्ना सर्वमिदं ततं जगत् व्याप्तं ॥ ॥ ८

नेति नहि केवलं स्वधर्मनिरतस्य संसिद्धिरिति यच्छति तथेनरीति उत्तरार्द्धेनोक्तं प्रमाह स्वकर्मनिरतस्य तं प्रकारमेकाग्रचेतो भूत्वा शृणु त्वाधारवरस्वे
४५ तमेव प्रकारमाह यत इति यतः शब्दार्थे यस्मादित्युक्तं व्यमीकरोति यस्मादिति प्राणिनां प्रवृत्तिर्यस्मादीश्वरात् अंतर्यामिणो यस्मादंतर्या न्य
मिणो येन च सर्वं व्याप्तं तदेव परमेश्वरं कार्यं स्वकारणं निरिक्षोव तद्भावात् स्वकर्मणा । अर्चयमानवः संसिद्धिं विंदतीति संबंधः ८ न्य

गी॰भा॰ १२

१२

चोद्यमेव विवृण्वन्नाथ विभजते किमिति स्वाभाविगुणवदात्मनो नित्यप्रचलितत्वेनाशेषतत्त्वेन नैष्कर्म्यस्य शंकनापि स्वरूपविज्ञानेवेदनार्थसंस्कारसंज्ञानोऽस्त रा ध्वनितात्मकैर्धानाभिव क्रियाकारकाभेदाभावात्कारकस्यैवात्मनः क्रियात्वमित्युक्ते कर्माशेषतत्त्वस्य कुं शक्यमुभयत्रापि स्वभावभंगादित्याह उभयथेति प भ्रद्रपानुरोधेनाशेषकर्मत्यागायोग्यत्वे शेषे किञ्चोदयति अथेति कदाचिदात्मा सक्रियो निःक्रियश्च कदाचिदिति स्थितेऽफलितमाह तत्रेति उक्तमेव प्रपंचयति पक्षद्वयाद्धि शेषदर्शनेन विचारयति अथापीति आगमापायित्वे क्रियाणां तद्वतो द्रव्यस्य कथं स्थायित्वे साशंक्याह गुणमिति क्रिया शून्यकाले क्रियावत्त्वाभावेऽपि कथं कारकत्वं क्रियां कुर्वन्कारणकारकमित्युपगमादित्याशंक्याह तदेवेति क्रियाशक्तिमदेवकारकं केन क्रि

रोपपत्तिस्तु हि ब पंचाधित्वं तस्मात्कर्मणो ज्ञानिनः श्रेयसः साधनत्वं न च ज्ञानकर्मणोः समुच्चयो ०

तथा च सिद्धफलज्ञाननिष्ठालाभे स्वर्गादिनेर्द्देतोः कर्मणाप्यर्थित्वं तेन ज्ञाननिष्ठाकर्मणोर्नेसाहित्यमितिपरिहरति नेत्यादिना श्रेयस्त्वाकांक्षिवरणोन्मैवतेति तो
ज्ञाने फलत्वमित्यर्थः फलेनानेमेदैनौ च नार्थिनेत्यत्र हेतुमाह सर्वत इति सर्वतः प्लुतोऽमूदुदक इति तत्तु हृतोऽक्तिस्त फले ज्ञानादि न तस्मिन्प्राप्ते न तडागादि
विमोगाक्रियायो तदधीनेवेल्पानादीकं विरर्थित्वं तत्पणहतेऽपीत्यर्थः निरतिशयफले ज्ञाने लब्धे सातिशयपु फले कर्मणि नार्थित्वमिसेत तद्धातेनेत्फुर
वति इतीति कर्मणः साविशयफलत्वमुक्तमुपजीव्य फलितमाह तस्मादिति ज्ञानकर्मणोः साहित्यासंभवमपि पर्यवोक्तं निगमयति नचेति नहि प्रकाशतमसोरि
वविरोधाविरुद्धयोस्तयोः साहित्यमित्यर्थः ०

गी॰भा॰१८
३१

272

कर्मणा पितृलोक इति श्रुतेर्मिश्रं नित्यकर्मस्वपेहेत्वं नञ्ज्ञाह नित्यानामिति स्वस्य विपर्ययोक्तमर्थं समर्थयते यस्मादिति प्रेत्य कर्मफलमनुभूयते नः दोषेण विरि
ष्टजात्यादिभाजो जन्म पुण्यं तरस्येतदादिपदार्थः पञ्चमित्यानुष्ठानाऽपासदुःखभोगस्य तत्फलभोगत्वमिति तदिदानीमनुवदति येतीति नित्यस्य
नुष्ठेयमानान्यपास्यपर्यन्तानीति शेषः त्रयाणामपि नित्यानां काम्यानामिव हृष्टानि इति कपलमाशंक्य विशुद्धे शेतदत्र कामनैव नित्यमाह नवेति विशुद्धि
शफला श्रुतेस्तत्कामनायानिमित्तस्याभावान्न नित्यानि विधीयेरन् नित्यानि शंकाह जीवेति न नित्यानां विध्यसिद्धिरिति शेषः अनुभावितं हृय प
तिनेस्यादिना तदैव विवरणावनं निषेधमननघनजमर्थमाह यज्ज्ञामिति पूर्वजन्मनामिस्यादिहेतुं प्रपंचयति न होति कर्मान्तराप्रध्येपि देहे दुरितफलमि

नित्यानां च कर्मणां पुण्यलोकफलश्रुतेर्वर्णाश्रमाश्च स्वकर्मनिष्ठा इत्यादिस्मृतेश्च कर्मणां पाऽनुपपत्तिर्न तावदनित्यानि कर्माणि दुः पे
खरूपत्वात्पर्वे ह्यनुष्ठीतकर्मणां फलमेव न तु तेषां स्वरूपव्यतिरेकेणान्यस्य फलम तत्प्रसुतत्वाज्जीवनादिनिमित्ते च विधानादिति प्र ना२
वृत्तानां कर्मणां पुण्यदानायासभवात् दुःखफलविशेषानुपपत्तिः स्यात् पूर्वोक्तं पूर्वजन्मकृतदुरितानां फलं नित्यकर्मानुष्ठानापा
सदुःखं भुज्यत इति न दुःसं न हि मरणकाले फलदानायांकुरीभूतस्य कर्मणः फलमन्यकर्मारब्धे जन्मन्युपभुज्यत इत्युपपत्तिः
अन्यथा स्वर्गफलोपभोगायाग्निहोत्रादिकर्मारब्धे जन्मनि नरककर्मफलोपभोगानुपपत्तिर्न स्यात् तस्माद्दुरितदुःखविशेषफ
लत्वानुपपत्तेश्चानेकेषु हि दुरितेषु सम्भवत्सु भिन्नदुःखसाधनफलेषु नित्यकर्मानुष्ठानायासदुःखमात्रफलेषु कल्प्यमानेषु द्व
न्द्वरोगादिबाधानिमित्तदुःखस्यान्यत्तु न हि शक्यते कल्पयितुं ॥ ॥ ॥ ॥

नित्यानुष्ठानायासदुःखं भुज्यतां कामनुपपत्तिरित्याशंक्याह अन्यथेतिपदुक्तं दुःखफलविशेषानुपपत्तिश्चेत्यादि तत्तदुपपादयति तस्येति सम्भा
वितान्यनेकानि दुरितानि तानि च दुःखफलानि यदि तानि नित्यानुष्ठानायासरूपं दुःखं तन्मात्रफलानि कल्प्येरन् तदा तेष्वेवं कल्प्यमानेषु सत्सु नित्य
स्यानुष्ठेयत्वं स्यात् पापस्य मासोपवासादिरूपेण दुरितकृतो दुःखविशेषो न तत्फलं दुरितफलानां दुःखानां बहुलत्वात्तेन नित्यकर्मप्रयासविशेषेणैव तत्र तत्र दुःखवि
शेषफलकमित्युक्तमित्यर्थः किंच नित्यानुष्ठानायासदुःखमात्रफलानि चेत् दुरितानि तेन दुरितानि कल्प्येत तदा हन्त द्वन्द्वाद्वितरोगादिबाधस्यो
गादिबाधापादुःस्वदुरितनिमित्तत्वानुपपत्तेः स्वकृतस्वकृतत्वस्य वासम्भवात् अनुपपत्तिरेवोहिरिति वा यापाः स्यादिति स्यादहो देति ॥

तावदनंताति
योः२

दुरितानि

गी॰
३१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

णगादीनां कर्मान्तरं ततो देहान्तरं च भविष्यतीत्याशंक्याह स्वाभ्यादीनामिति आत्मनः स्वरूपावस्थानमिति संबंधः अतीतानंतजन्मभेदेष्वर्जितस्य कर्मणो नाभा-
फलस्यानारब्धस्य भोगेनानाशे पात्ततो देहान्तरं आदेकमविकल्पसाधारणिकत्वान्मुक्तेरफलसिद्धत्वेत्तिचोदयति ज्ञातिकेनेति नोक्तकर्मनिमित्तं देहान्तरं शंकि-
तव्यमित्याह ज्ञानेति नित्यनैमित्तिककर्माणि श्रौतान्यवश्यानुष्ठेयानि तदनुष्ठाने च महानायासस्ततो दुःखोपभोगस्तस्योक्तानारब्धकर्मफलभोगत्वोप-
गमान्न ततो देहान्तरमित्याह नित्येति नित्यादिनो दुरितनिवृत्त्या वघ्नविरोधान्नस्तु तु न निवर्तितत्तनो देहान्तरमित्याशंक्य तु तस्य नित्यादेरस्य त्वेनार-
ब्धेष्वनापविहत्वस्यासत्वानिष्ठत्वात्ततो देहान्तरापोगादित्याहेत्यलेन तत्र समफलान्तराभिति मत्वा प्रायश्चित्तमुपात्तदुरितनिवर्हणार्थं न फलान्तरा-
पेक्षं तथेष्टसर्वेमपि नित्यादिकमोपात्तपापनिराकरणार्थं ज्ञानिकिन्नपर्यवस्य यदेहान्तरारंभकमिति पराहाह प्रायश्चित्तवदिति तथापि प्रारब्धवशादे-
ताण्डीनां चाकरणस्य रूपावस्थानमेव कैवल्यमित्यफलसिद्धेकैवल्यमिति ज्ञातिकान्तानेकजन्मान्तरकृतस्य स्वर्गनरकादिप्राप्तिफलस्याना-
रब्धकार्यस्योपभोगादनुपपत्तेः स्वपाभावात्तिविहितस्य कर्मानुष्ठानायासदुःखोपभोगस्य तत्फलोपभोगत्वोपपत्तेः प्रायश्चित्तवत्पूर्वोपात्तदुरि-
तक्षयार्थानां नित्यकर्मणां आरब्धानां चोपभोगेनैव कर्मणां क्षीणत्वात् अन्येषां च कर्मणामनारंभे फलसिद्धेः कैवल्यमिति अत एव विदि-
त्वा निमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुतेः पापा स्वः पंथा मोक्षाय पञ्चानिपतेः इतिश्रुतेश्च नैवदाकारणेष्वनाते भवबद्ध विदुषो मोक्षो हि
भव श्रुतेश्चास्मा अलोकत्वमाप्नोतीति च पुराणस्मृते आरब्धफलानां पुण्यानां अपानुपपत्तेः पूर्वोपात्तानां दुरितानामनारब्धफलानां संभव
स्त पापपुण्यानामप्यनारब्ध फलानां स्यासंभवत्वात् च देहान्तरमहत्त्वात्स्वपानुपपत्तेर्मोक्षानुपपत्तिः धर्माधर्मैस्तेन नीचाख्ये च मोक्षाना
वदेहान्तरं शंकते नानाजन्मारंभकाणामपि यावदधिकारमवस्थानसंभवादित्याह अर्थ्यमाख्यातानां देहान्तरानुपपत्तेर्धर्मादेरानुपपत्तिः
स्मात् अनारब्धेनापि पूर्वार्जितकर्मणामेवं क्षीणत्वेपि कालान्तरे स्वकर्मोत्पत्तिर्देहान्तरारंभः शुद्धयाशंक्याह अनन्तानेकेति नानानेककर्मणो मुक्तिः
तिप्रसंगस्तस्य हेय न ज्ञानं विद्यतेऽयनायेति श्रुतेरिति संबंधः एवकारणे विवरणे स्यादित्याशंक्याह कर्मति परा चर्यं वाक्यार्थे
पिष्यति मानवानामहरेषामविकारं पशुत्वस्योत्तोधपेम्यतो निःश्रुतिमर्यादानुवदति ज्ञानादेवेति श्रौता येषां इति संवादयति तानादिति किंचन तीपत्ना व सानुभ्या
गुमानतीतं नेतनाभासे रपा पुण्यकर्मणामनारब्धफलानां नाशाभावे देहान्तरं प्रवाहानां विना मुक्तिरित्याह अनारब्धेति तथा विधानां कर्मणोना-
क्तिसंभावितेत्याह उपोति अनारब्धफलपुण्यकर्मभावे पिकर्म मोक्षानुपपत्तिरितिनाह तेषामेति एवं स्वकर्म स्वधानुपपत्तेः मोक्षानुपपत्ति

इष्टं तत्प्रपंचयति यस्मिन्निति तथा जीवनादिनिमित्ते विहितानां नित्यानां दुरितफलत्वासिद्धिरिति शेषः ननु प्रायश्चित्तेन निमित्तस्य पापस्य फलं किं न्नु तदनुष्ठानाभावाद्दुःखं तस्य पापस्य फलमिति शंकते अथेति प्रायश्चित्तानुष्ठानाभावाद्दुःखस्य निमित्तभूतपापफलत्वे जीवनादिनिमित्तनित्याद्यनुष्ठानाभावाद्दुःखमपि जीवनादेव फलं स्यान्नाभावाद्दुरितस्येति परिहरति जीवनादीति प्रायश्चित्तदुःखसत्त्वे निमित्तपापफलत्ववज्जीवनादिनिमित्तकर्मेष्वपि तदभावदुःखं जीवनादिफलमित्यत्र हेतुमाह नित्येति २ तत्र अनित्यानुष्ठानाभावाद्दुःखमेवोपात्तदुरितफलमित्याशंक्य उक्तमित्याह विधीति काम्यानुष्ठानाभावाद्दुःखमपि दुरितफलमित्युपगमात् प्रसंगस्येष्टत्वमाशंक्याह तथा चेति विहितानि तावन्नित्यानि न च तेषु फलं श्रुतं तेन च विना फलं विधि

यस्मिन्न पापकर्मनिमित्ते पठिते प्रायश्चित्ते न तु तस्य पापस्य फलमपेतस्यैव पापस्य निमित्तस्य प्रायश्चित्तदुःखं फलं जीवनादिनिमित्तमपि नित्यकर्माननुष्ठानाभावाद्दुःखं जीवनादिनिमित्तस्यैव तत्फलं प्रसज्येत निमित्तप्रायश्चित्तयोर्नैमित्तिकत्वाविशेषात् किं चान्यन्नित्यस्य काम्यस्य वाग्निहोत्रादेरनुष्ठानाभावाद्दुःखस्य तुल्यत्वान्नित्यानुष्ठानाभावाद्दुःखमेवुपपद्येत तद्दुरितस्य फलं न तु काम्यानुष्ठानाभावाद्दुःखमिति विशेषो नास्तीति तदपि फलं स्यात् तद्दुरितफलं प्रसज्येत तथा च सति नित्यानां फलाश्रवणात् विधानामर्थानुपपत्ते अनित्यानुष्ठानाभावाद्दुःखं प्रवेहत्तदुरितफलमित्यर्थापत्तिकल्पनानुपपत्तेरेवं विधानानर्थक्यानुपपत्तेरनुष्ठानाभावाद्दुःखव्यतिरिक्तफलत्वानुमानाच्च नित्यानां विधिबलाच्च विनिर्दिष्टं चेदमुच्यते नित्यकर्मण्यननुष्ठीयमानेऽन्यस्य कर्मणः फलं भुज्यत इत्यनभ्युपगममाने ७ ॥ ७

ष्टेन दुरितं निर्वर्हणाय यो नित्यानीत्यस्योपपत्त्यन्वत्वे न च तत्प्रयुक्ता काम्यानुष्ठानादपि दुरितनिवृत्तिः संभवादित्यर्थः किं च नित्याननुष्ठानाभावाद्दुःखातिरिक्तफलानि विहितत्वात् काम्यवदित्यनुमानान्नैतेषां दुरितनिवृत्त्यर्थत्वमित्याह एवमिति काम्यादिकर्मदृष्टान्तेनापि तदेव नित्यत्वोक्तिव्याघाताच्च नित्यानुष्ठानाद्दुरितफलभोगोक्तिरयुक्तेत्याह विरोधाच्चेति तदेव प्रपंचयति विनष्टं चेति इदं शास्त्रार्थमेव विशदयति नित्येति ८ ॥ ॥

इतश्चानित्यानुष्ठानोपात्तदुःखमेवदुरितफलमित्ययुक्तमित्याह निषेधेति दुःखमितिनशक्यतेकल्पयितुमितिपर्यवसानंवेधःपदितित्तदेवतस्यत्वंनतहिंसायाःपाषाणाव
हननादिदुःखंदुरितफलंनैवतत्कारणशुल्कंतंदुःखस्यानलकापत्ताटतस्तदाकस्मि कस्मादित्यर्थः नित्यानुष्ठानोपात्तदुःखमुपात्तदुरितफलमित्येतद्ग्रहणत
त्वाच्चाप्युक्तंवक्तुमित्याह अग्रहणंचेति तदेवप्रपंचयितुंपृच्छति कथमिति तत्रोदोग्रहणमाह अग्रहणेतितत्पापिकथमस्माकंग्रहणजवादित्वंतत्राह नै अ॰
ति पुरुषनफलत्वमपुरुषन्तफलत्वमितिप्राचीनदुरितविशेषानुगमादविशेषेणसर्वेषांचतस्यपुरुषत्वान्नित्यानुष्ठानोपात्तदुःखफलत्वसंभवान्नाग्रहणं
११७४. वादितेतिशंकते अथेति पूर्वोपात्तदुरितस्याविशेषेणारब्धफलत्वेविशेषणानर्थक्यमितिपरिहरति तत्तदुरितमात्रस्यारब्धफलत्वेनानारब्धफलस्य न५

नित्यकर्मानुष्ठानोपात्तदुःखमेवपूर्वकृतदुरितफलंनशिरसःपाषाणावहननादिदुःखमितिग्रहणंनैवेतदुच्यतेनित्यकर्मानुष्ठानोपात्तदुःखपू
र्वकृतदुरितकर्मफलमिति कथमप्रसक्तफलस्यहिपूर्वकृतदुरितस्यप्रयोजनोपपद्यतइतिग्रहणंतत्राप्रसक्तफलस्यकर्मणःफलंनित्यानुष्ठाना
यासदुःखमाहभवान्प्रसक्तफलस्येति अथसर्वमेवपूर्वकृतदुरितंतत्नप्रसक्तफलमेवेतिमन्यतेभवांस्तेनोनित्यकर्मानुष्ठानायासदुःखमे
वफलमितिविशेषणं मयुक्तं नित्य कर्मविधानर्थक्यप्रसंगस्योपपयोगेनप्रसक्तफलस्यदुरितकर्मणःत्पोपपत्तेः किंचश्रुतस्यनित्यदुःखं
चेत्फलंनित्यकर्मानुष्ठानायासादेवतन्नदृश्यतेव्यापांसादिजन्यदुःखस्येतिकल्पनानुपपत्तेः जीवनादिनिमित्तचविधानाग्निहोत्रनांकर्मे
णांप्रायश्चित्तवत्पूर्वकृतदुरितफलत्वानुपपत्तिः ११ तत्स्योक्तफलविशेषणस्यानुपपत्तेरिमर्थःपूर्वोपात्तदुरितमारब्धफलंचेष्टेनैवतं
तत्पद्यंभवान्नित्यत्वस्यार्थेकर्मनविधानत्वमितिनिषेधातआह निषेधेति इतश्चानित्यानुष्ठानोपात्तदुःखंनोपात्तदुरितफलमित्याह विधेयेति तदेवस्फोरयति
श्रुतस्येतिपथ्याआपापस्नगमनादिकृतेदुःखेनान्यस्यदुरितस्येव्यनेनस्फलत्वसंभवात्तथात्मिरस्यश्रुतस्यक्तस्यानुहितस्यापायासापातपपेतस्यफलत्वानुप
गमात्तदनुष्ठानायासदुःखमेवचेत्फलंतर्हितत्स्यादेवनदृश्येनान्यस्यदुरितफलत्वंकल्प्यनित्यफलत्वसंभवादित्यर्थः दुःखफलत्वेनित्यानामननुष्ठाने
मेवक्षेपःस्यादित्याशंक्याह जीवनेति नित्यानांदुरितफलत्वानुपपत्तौहेत्वंतरमाह प्रायश्चित्तवदिति ८ ॥

गी भा१८
३३

274

किंच नित्यानामग्निहोत्रादीनां नादृष्टफलं तेषामेव काम्यानां तादृक्फलं न च हेतुं विनापि विभागो भागी स्यात् अग्निहोत्रादीनामितिफलकामित्वमात्रेणेति
न स्यादिति पूर्वेणासंबंधः यानि नित्यान्यग्निहोत्रादीनि यानि च काम्यानि तेषामुभयेषामेव कर्मत्वस्य विशेषाभावेपि नित्यानां तेषामनुष्ठानायासदुःखमात्रे
णाभ्युपेतफलत्वं रमस्ति तेषामेव काम्यानामंगाधिक्याभावेपि फलकामित्वमकारणं तेनाबुभ्याचरेण स्वर्गादिमहाफलत्वमित्ययं विभागो न प्रमाण
वानिति सर्वैः ३ उक्तविभागापोगे फलितमाह तस्माद्वेतिकाम्यवन्नित्यानामपि पितृलोक योगाद्येष्टफलवत्त्वेऽपि निवृत्तस्य पैतृत्वापोगात् आदृष्टेनात्नवि
शेषाभ्युपगंतव्यमित्याह अन्यत्रेति शुभाशुभात्मकेकर्मसर्वस्मिन्नविद्यापूर्वके चेरशेषतेनहि तस्मच्छपकारेण विद्येत्युपपद्यते ननु सर्वकर्माविद्यापूर्वकमिति तत्र

अग्निहोत्रादीनामेवकर्मत्वरूपाविशेषे अनुष्ठानायासदुःखमात्रेण पश्चपः काम्यानां च स्वर्गादिमहाफलमंगेतिकर्तव्यतायाधिक्येनत्वं न तिफ
लकामित्वमात्रेणेति न शक्यं कल्पयितुं तस्मान्नित्यानां कर्मणामदृष्टफलाभावः कदाचिदप्युपपद्यते अतश्चाविद्यापूर्वकस्य कर्मणो विधे
र्वशुभाशुभस्वरूपकारणमशेषतो निवृत्तिकर्मोत्थानं यथावत् तदनुष्ठानमविद्याकामवीजं हि सर्वमेव कर्म तथा चोपपादितं अविद्वद्विषयं कर्म
विद्वद्विषया च सर्वकर्मसंन्यासपूर्विका ज्ञाननिष्ठा ३ उभौ तौ न विजानीतो वेदाविनाशिनं नित्यं ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां
ज्ञानेकर्मसंगीनां तत्त्ववित्तु महाबाहो गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते १

दभिप्रायं शंकमाह अविद्येति तत्र हि शब्दयोतितं पुष्कलं दर्शयति न प्रेति रतस्माविद्वद्विषयं कर्मेत्यादेरविदुष इति अधिकारभेदेन निष्ठाद्वयमित्युत्तरत्वात्सोपक
मममनुकूलयन्नात्मनि कर्तृत्वे कर्मलेपाभावोपपन्नतां नामान्यान्न भितिवदन्ना कर्मणां न मुक्तमिति दर्शितमित्याह ३ भवति श्वात्मानं पायात अज्ञानं नक
र्तृत्वादिरहितो भवतीति युक्ता कर्मसंन्यासे ज्ञानवतोऽधिकारित्वं सूचितमित्याह वेदेति निष्ठाद्वयमधिकारिभेदेन वोद्धुम्य पितिवासंतरमाह ज्ञानेति नेदु
हि भेदं जन्येदित्यत्र चाविद्यामूलत्वं कर्मणः सूचयता कर्मनिष्ठाविद्वद्विषया न मो दितेत्याह तत्त्वनामिति पदुक्तं विद्वद्विषयासंन्यास पूर्विका ज्ञान
निष्ठेति तत्र तत्त्ववित्तु महावाहो गुणकर्मविभागयोरित्यादिवाक्यमुदाहरति तत्त्वविदिति

पृ।२

त्र०
३३

अभ्यस्तकर्मणो दुरितक्षयेतिपाकनन्तरादेति पदं नन्तरं पूर्ववदितितन्नस्यकार्यमिति निषमादित्यर्थः एतन्न नित्यानुष्ठाने दुरितफलभोगो न तिष्ठतीत्याशं-
क्याह किंवेति काम्यानुष्ठानस्य नित्यानुष्ठानस्य च यौगपद्यान्नित्यानुष्ठानोपात्तदुःखेन दुरितफलभोगवत्काम्यफलसाधकर्मकृत्वं भवादिति
नुमाह नन्वित्यादिना नित्यकाम्यानुष्ठानयोर्यौगपद्येपि नित्यानुष्ठानोपात्तदुःखात्स्वदत्तकाम्यानुष्ठानफलं भुक्तत्वादिति एकं तत्र येति का-
म्यानुष्ठानफले नित्यानुष्ठानोपात्तदुःखाभिन्नं चेन्नहि काम्यानुष्ठानोपात्तदुःखं नित्यानुष्ठानोपात्तदुःखं च भिन्नं भिन्नं स्यादित्याह तदनुष्ठानेति
प्रत्ययस्येष्टफलसाधनत्वाच्चेत्यर्थः नचेति दृष्टविरोधमेवस्पष्टयति नहीति आत्मज्ञानवदग्निहोत्रादीनामोभे स्तात्सादन्वयेन सत्वान्यदुर्विकारए

सत्त्वोपभोगो नित्यस्य कर्मणः फलमिति नित्यस्य कर्मणः फलाभाव इति विरुध्यते किंच काम्याग्निहोत्रादावनुष्ठीयमाने नित्यम
पि अग्निहोत्रादि तेनैव अनुष्ठितं भवतीति तदुपात्तदुःखेनैव काम्याग्निहोत्रादिफलमुपक्षीणं स्यात् तत्तन्त्रत्वात् यत्काम्याग्निहो
त्रादिफलमन्यदेव स्वर्गादि तदनुष्ठानोपात्तदुःखमपि भिन्नं प्रसज्येत नचैतदस्ति दृष्टविरोधात् नहि काम्यानुष्ठानोपात्त
दुःखात्केवलनित्यानुष्ठानोपात्तदुःखं भिद्यते किंचान्यदविहितं अप्रतिषिद्धं च कर्म तत्कालफलं न शास्त्रचोदितं प्रतिषिद्धं
वा न तत्कालफलं भवेत् न परिदृश्यते स्वर्गादिष्वप्यदृष्टफलत्वे ज्योतिष्टोमेन स्यात् अन्यकर्मणामदृष्टे स्यात् १

मतो स्यात् किंचान्यदिति न देवकारणं विरुद्धमिति अविहितमिति पादसंमर्दनभोजनादि तत्कालं शास्त्रेण विहितं निषिद्धं वा तदनन्तरं फलं न यावदनुभवादित्यर्थः
शास्त्रीयं कर्म तु नानन्तरफलमनन्तरं स्याच्चोदितत्वाद् ज्ञाने दृष्टफले काहृष्टफले कर्मसहकारी भवति नापि तत्पर्यवसानमेव दृष्टफले भोजनकर्मैव वृत्तिस्समभिमिति वे
वसित्याह नत्विति शास्त्रीयमग्निहोत्रादेरपि फलानन्तर्ये स्वर्गादीनामनन्तरमनुपलब्धिविरोधेन तत्तत्स्वर्गादेरदृष्टेष्वपि तथाविधफलोपभयाद्युक्तमिर
ग्निहोत्रादिषु न स्यादित्याह नचेति॥ १

गी०भा०१८

२५

किंचत्रयोदशेयान्यमानित्वादीनिचतुर्दशेचप्रकाशंचप्रवृत्तिंचेत्यादीनियानिपंचदशेचयान्यमानमोहत्वादीनिउक्तानितैःसर्वैःसाधनैःसहितांध्रुवंसंन्यासिनस्तस्यैपास्त्व
स्तत्वेनापितेत्यानानिष्ठायामेवाधिक्रियेरन्नित्याहयैस्तैर्निष्ठाद्वयमधिकारिभेदेनप्रतिष्ठाप्यज्ञाननिष्ठानामनिष्टमिष्टंमिश्रंचत्रिविधंकर्मणःफलंभवति
किंतुमुक्तिमेवकर्मनिष्ठानांतुत्रिविधंकर्मणःफलंनमुक्तिरितिपाद्व्याथ्यविभागमभिप्रेतमुपसंहरति अनिष्टानादीति यदुक्तमविद्याकामबीजंसर्वंकर्मेति
तन्नशास्त्रावगतसकर्मणोऽविद्यापूर्वकत्वानुपपत्तिरित्याक्षिपति अविद्येति ज्ञानेनसमाधत्ते नेति तत्राभिमतांप्रतिज्ञांविभजते पंचेति तउक्तरहानेत्वा. हे च

घ्र१ हेत्वाध्यायाध्यायपंचयोक्तत्वानुसाधनात्वाधिष्ठानादिपंचहेतुकंसर्वंकर्मसंन्यासिनामात्मैकत्वात्किंत्वज्ञानवतांपरस्वोज्ञाननिष्ठापांवृत्तेमानात्मभगवत
तत्वविद्यमनिष्टादिकर्मफलत्रयंपरमहंसपरिव्राजकानामेवलब्धभगवत्स्वरूपात्मैकत्वशरणानांनभवतिभवत्येवमन्येषामज्ञानांकर्मिणामंत्या
सिनामित्येषगीतानामाणांलोकस्यकर्तव्याकर्तव्यार्थेस्वविभागोऽविद्यापूर्वकत्वंसर्वस्यकर्मणोऽस्तिइतितिचेन्नब्रह्महत्यादिवद्यपिशास्त्रांका
तंनिसंकर्मतथापिअविद्यावतएवभवतियथाप्रतिषेधशास्त्रावगतमपिब्रह्महत्यादिलक्षणंकर्मानर्थकारणमविद्याकामादिदोषवतोभवति
अनापाप्रवृत्त्यनुपपत्तेस्तथाभिसंनैमित्तिककाम्यादयपीतियज्ञातिरिक्तात्मनाज्ञानप्रवृत्तिनिसर्गादिकर्मत्वंतुपपन्नमितिचेन्नचलनात्मकसकर्म
तेर्शनात्मकर्तैकस्याहंकरोमीतिप्रवृत्तिदर्शनात् ॥ ७ श्रीएमवद्रुपनन·

275

यथेतिअविद्यादिमतोब्रह्महत्यादिकर्मसत्रहेतुमाह अन्येति दाष्टान्तिकंगृह्णातिनपीतिनामपूर्वविद्यादिमतोभवतीत्यविद्यापूर्वकत्वंतेषामेषितव्यमितिरर्थःपा
रलौकिककर्मसुदेहाद्यतिरिक्तात्मज्ञानेविनाप्रवृत्त्यपेगान्तेषामविद्यापूर्वकत्वेनिशंकतेयातिरिक्तइतितत्सपिर्व्यतिरिक्तात्मज्ञानेपारमार्थिकात्मज्ञानाभावात
मिथ्याज्ञानादेवेतिसात्त्विककर्मसुप्रवृत्तेरविद्यापूर्वकत्वंतेषामप्रतिहतमितिपरिहरतिनेत्यादिनाकर्मणश्चलनात्मकत्वान्नात्मकर्तृकर्मेप्युक्तंतथापिदेहाद्यात्मे
हंममाभिमानद्वाराहंकरोमीत्यात्मनोमिथ्याधीपूर्विकाकर्मणिप्रवृत्तिर्दृष्टेतेनाविद्यापूर्वकत्वंतस्योक्तमितिसर्थः॥ ४

देहात्म
त्वे

त्वंतस्मात्ःक्रियत्वाद्देहादिसंघातस्यतुसक्रियत्वात्तत्काः. हैकं२

त्व०
२५

नत्वेववाक्यांतरंपठति सर्वेति विदुषो ज्ञाननिष्ठस्यैवपांचमिकंवाक्यांतरमाह नैवेति नैवायंस्मिन्स्मर्येकपमति अनादीति मन्यतरजितंबंधः अतस्यचित्तमुखंयेकर्म न
मुद्धचित्तस्यकर्मसंन्यासो ज्ञानप्राप्तेहेतुरित्यत्र वाक्यांतरमाह आरुरुक्षोरिति पर्योक्ते द्विभागे सा पूर्विकंवाक्यमठच्छ्रणा मिसाह योगारूढ इति एवंत्रैपीक्षपैमिसादिनौवमि
कंवाक्यमविद्वद्विषयंकर्मैसंत्र प्रमाणयति अत्रैरति विदुषः संन्यासपरविका ज्ञाननिष्ठे सर्वेवन वमिकंवाक्यांतरमाह अनन्यादिति मामित्येनसाक्षाद्वष्टे पर्यो
क्तमिति तेषांसततयुक्तानामित्याद्विदृशमिकंवाक्यं तत्रैव प्रमाणयति ददामीति विद्यावतामेव भगवत्प्राप्तिर्निर्देशादेतेरषांतदंप्राप्तिःसूचितेत्यर्थःइति

सर्वकर्माणि मनसा संन्यस्यास्ते नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् द्वयोर्दृतः कारणमारुरुक्षोः कर्मकारणमारूढस्य योगस्य स शमएवंका
रणमुक्तं पंचयोऽप्यनंतज्ञानी त्वामेव मेमनप्रणाः कर्मिणोज्ञानिभक्तकामकामालभंते अनन्याश्चिंतयंतो मां नित्ययुक्ता ये योक्तास्मान
माकाशकल्पमकल्मषमुपासते ... बुद्धियोगं तं येन मामुपयांति ते अपीन्नुकर्मिणोऽनुपयांति भगवत्कर्मकर्मिणो ये प्रोक्तन
मां अपिकर्मिणोज्ञानी ... नरहीनेफलत्यागीवसान्नसाधना अनिर्दिष्टा सर्वभेपासकानां द्वेष्टा सर्वभूतानामित्यध्यायप
रिसमाप्युक्तसाधना ६

इममर्थमाह अद्वेष्टेति ननु भगवत्कर्मकारिणोऽयुक्तमनसात्कर्मिणो विभुगुणंतं योनीत्याशंक्याह भगवदिति येन त्वं मे हृदिस्था येन भगवत्कर्मकारिण ति
स्तेयधयियुक्तनमात्तयाःपिकर्मिणोज्ञाःकौन्तेयभगवंतनसहस्रांगंनुग्रहं सर्वेः तेषामहं त्वेगमकं हरीयंतिं उमानेरीति चित्तसमाधानमात्मफ
लत्यागपर्यंतं यानुक्रमेणोक्तोपरोहीन साधनोपादानाद्योगासमर्थस्य भगवत्कर्मकारित्वाभिधानाद्भगवत्कर्मकारिणामतत्त्वविज्ञानमित्यर्थः
येत्वशक्तस्तन्निर्देश्यमित्यादिवाक्यावशेषेनविद्वद्विषयत्वं तत्संन्यासपूर्वकज्ञाननिष्ठायानिर्धारयति अमानित्वेति उक्तसाधनानांतत्संन्यासपूर्वकज्ञाननिष्ठाप
मधिकृत्यप्रवृत्तिरिति शेषः ॥ श्रीरामचंद्रायनमः ॥ ॰ती ॰

रामः

इतोपि देहादौ नाहंधीर्गौणी स्यात् गौणोत्तिपो देवदत्तो माणवको वा गौ धिपो विषयत्वं परो नैष सिंहो नायमग्निरिति जानाति नैवमविद्वानात्मनः संघातस्य च
ससर्पिभेदं संघातस्यानात्मत्वप्रसंख्यातो न संघाते हंशब्दप्रत्ययौ गौणावितथ्यैः संघाते तयोर्गौणत्वे दोषांतरं समुच्चिनोति तथेति तथा सत्यात्मनि कर्तृत्वादि
प्रतिभासोसिद्धिरिति शेषः गौणेन कृतं न मुख्येन कृतं भवत्युदाहरणेन स्पष्टयति न हीति यथापि देवदत्तमाणवकाभ्यां कृतं कार्यं मुख्याभ्यां सिंहाग्निभ्यां न
क्रियते तथापि देवदत्तगतक्रौर्येणामुख्यसिंहस्य माणवकनिष्ठपैंगल्येन मुख्याग्नेरिव च संघातगतेनापि जरत्वेनात्मनो मुख्यस्य किंचित्कार्यं कृतं भविष्यतीत्या
शंक्याह नेतीति देहादावहंधियो गौणत्वायोगे हेत्वंतरमाह स्तूयमानाविति देवदत्तमाणवकयोः सिंहाग्निभ्यां भेदधीप्रत्येके तत्र पाश्वस्याभावधीवदात्मनोपि मुख्य

गौणशब्दप्रत्ययनिमित्तं किंचित्साध्यते मिथ्याप्रत्ययकार्यत्वं नर्थमत्र भवति विषयं च जानाति नैष सिंहो देवदत्तः स्यान्नायमग्निरिति तथा गौणे
न देहादिसंघातेनात्मना कृतं कर्म न मुख्येनाहंप्रत्ययविषयेणात्मना कृतं स्यात् न हि गौणसिंहाग्निभ्यां कृतं कर्म मुख्याभ्यां सिंहाग्निभ्यां कृतं
स्यात् न च क्रौर्येण पैंगल्येन वा मुख्यसिंहाग्न्योः कार्यं किंचित् क्रियते स्तुत्यर्थेनोपक्षीणत्वात् तत्स्तूयमानौ च जानीतो नाहं सिंहो नाहं
जं मग्निरिति न सिंहस्य कर्म ममाग्नेश्चेति तथा न संघातस्य कर्म मम मुख्यस्यात्मन इति प्रत्ययो युक्ततरः स्यात् नाहं पुनरहं कर्त्ता मम कर्मेति ये त्वाहुरात्मी
यैः स्मृतीच्छाप्रयत्नैः कर्महेतुभिरात्मा करोतीति तन्न तेषां मिथ्याप्रत्ययपूर्वकत्वात् मिथ्याप्रत्ययनिमित्तेष्टानिष्टानुभूतक्रियाफलजनितसंस्कारपूर्वका निष्ठा १
हि स्मृतीच्छाप्रयत्नादयः

स्मसंघातात्मदृशो ह्यतीते हि पुण्यापापयोर्हि समानात्मनिष्टं स्मारिस यःआत्मसो दृश्यपतिन्युनरिति संघाते हंधियो मिथ्याधीत्वेऽपि न तत्कृतमात्मनि कृतं त्वं किं
त्वात्मीयैः स्मृतीच्छाप्रयत्नैरस्य कर्तृत्वं वास्तवमित्यन्मतमनुवदति येत्विति तानादिकमपि कर्तृत्वं मिथ्याधीकृतमेव तानादीनां मिथ्याधीकार्यत्वादिति दूष
यति न तेषामिति न देहप्रपंचयेति मिथ्येति मिथ्याज्ञाननिमित्तकृते लौकिकविधिहं किंचिद्दिष्टमित्याएयनह्यागठभूतेन लिंगेन्द्रियाजिहाभ्यां क्रियमनिर्वर्त्यैत
येष्टमनिष्टं च फलेऽभुक्तोऽनेन संस्कारैरागद्वेषादिकाश्च तायः स्यात्मनि क्रियाकेर्वतीति उक्तं कर्तृत्वस्य च मिथ्यात्वमित्यर्थः

277

ॐ

आत्मनि:

सिद्धांतिदृष्टेः

यदुक्तं देहादिसंघाते ऽहमभिमानस्य मिथ्यात्वान्न तदास्तिपतिदेहादीति अहंधियो गौणत्वेन सर्वकं कर्म स्वपि गौणत्वापत्तेर्मनोनयो भावाज्जन्त्रिवत्संये
देहत्वेन्वेषणं न स्यादिति हूषपति नेति एतदेव प्रपंचयन्नादौ चोद्यं प्रपंचयति आमीयेति तत्र श्रुत्यवष्टंभेन दृष्टांतमाह यथेति दर्शितश्रुतेरात्मीये पुत्रे ऽहंप्रत्ययो
गौणो यथा संघाते ऽप्यात्मीये ऽहंप्रत्ययस्तथा पुत्र इत्यर्थः भेदधीपूर्वकं गौणधियो लोके प्रसिद्धमित्याह लोकेति लोकेऽवदानुरोधेनात्मीये संघाते ऽहंधीर
पीति गौणी स्यादित्यर्थः तिकमाह नहीति मिथ्याधियोपि भेदधीपूर्वकत्वं तमवादात्मीयसंघाते ऽहंधियो मिथ्यात्वमेव किं न स्यादित्याशंक्याह नैवमिति

दृष्टां त्वेऽ२

कर्मसु

पुत्रादिशरीरे

देहादिसंघाते ऽहंप्रत्ययो गौणो न मिथ्या रतिचेतन्नत्वात्कार्येष्वपि गौणत्वोपपत्तेरात्मीये देहादिसंघाते ऽहंप्रत्ययो गौणो यथात्मीये पुत्रे आ
त्मा वै पुत्रनामासीति लोके च मम प्राण एवायं गौरिति तद्वदेवायं मिथ्याप्रत्ययः विपरीतप्रत्ययः मिथ्याप्रत्ययस्त्वाणुपुरुषयोरगृह्यमाणविशेषयोर्
गौणप्रत्ययस्य मुख्यकार्याधिकारत्वं अधिकरणत्वस्य हेत्वान्न लुप्तोपमाशब्देन यथा सिंहो देवदत्तः अग्निर्माणवक इति सिंहवत्
ग्निरिवेत्यर्थे पैंगल्यादिसामान्यशब्दत्वात् देवदत्तमाणवकाधिकरणत्वस्यैवमनु सिंहकार्यमग्निकार्यं वा १

आत्मा

कर्मसु

देहपुत्रादे:

रधीपूर्वकत्वाभावे कथं मिथ्याधीरदृष्टेति सा शंकाह मिथ्येति अधिष्ठानारोप्ययोर्विवेकाग्रहाज्जनुत्पत्तिरित्यर्थः देहादौ वहंधियो गौणत्वे ते जितोच्ये
विवने तत्कार्ये ष्वपी स्यादिपारिहारं विवृणोति नेत्यादिना देहभागं विभजते यथेति सिंहो देवदत्त इति वा अग्निर्देवदत्तः सिंहरिवे उपमपादेव तत्को
र्यायधिकरणत्तोनुप्रवृत्ते अग्निर्माणवकः स्वपि वा अग्निर्माणवको ऽग्निरिवेत्युपमया माणवकस्य पैंगल्याधिकरणस्यत्तु त्वयमेव न तत्पामनुष्यो हमि
ति वाक्यस्याधिकरणात्तस्य येनाभातीत्यर्थः देवदत्तमाणवकयोरधिकरणत्वकथमित्याशंक्याह कोयेति किंच गौणत्वं तत्सूत्वपंच निमित्तं कृत्वाति
हकार्ये न [illegible] किं सिंहदेवदत्ते साध्यते नापि माणवके किंचिदग्निकार्यं मिथ्याधीकार्यत्वेन यमात्मानुभवत्यतो नदेहादावहंधीर्गौणी स्यादतनेतिति २

गी॰अ॰१८
१६

स्वर्गकामादिवाक्यप्रामाण्यादात्मनो देहाद्यतिरेकज्ञानात्तस्य च केवलस्य कर्तृत्वं तज्जन्यं कर्मगौणैरेव देहाद्यात्मभिः कृतं प्राप्यते नहि तस्मेव योनातिरेकज्ञाने देहात्मत्वमात्मनो मुख्यं युक्तमिति चोदयति तत्रेति न देहादीनामात्मत्वं गौणं तदीयानात्मत्वस्याविद्यत्वेन मिथ्यात्वादेतेन गौणात्मभिरात्मकर्तृत्वमक्षिप्यते किंतु मिथ्यात्मभिरिति परिहरति नाविद्येति तदेवं विवृत्वेन नेजघंसमुद्दयति न गौणा इति कथं तर्हि देहादिविषयात्मत्वप्रत्ययस्याशंकाविद्याकृतेनेत्यादिहेतुं विभजते कर्त्तारमिति देहादीनामनात्मनामेव सतामात्मत्वं मिथ्याप्रत्ययपरिकल्पितमित्यत्र अन्वयव्यतिरेकावुदाहरति तमाचरति उक्तेन्वये शास्त्रीयतत्त्वाकारस्यान्यानामननुभवं प्रमाणयति अविवेकिनामिति व्यतिरेके विरहितशास्त्रधिताभामननुभवमुक्तकल्प

टी॰ अत्र शुद्धविषयत्वेऽनाप्रामाण्यमात्मकर्तृत्वं गौणं देहेन्द्रियात्मभिः क्रियत इति चेन्नाविद्याकृतानात्मकत्वात्तेषां न गौणात्मानो देहेन्द्रियाद्यः कथं तर्हि मिथ्याप्रत्ययेनैवासंगस्यात्मनः संग तदात्मत्वमापाद्यते अनादिरविवेकभावान्न तदभावेऽत्राभावादविवेकिनोऽध्यस्तान कालेवालानां दृश्यते लौकिकी अहं गौरोऽहमिति देहादिसंघाते अहंप्रत्ययो भवति नतु विवेकिनाम् मोहे देहादिसंघातादिभिन्नात्मवतां तत्काले देहादिसंघातेऽहंप्रत्ययो भवति तस्मात् मिथ्याप्रत्यय एवाभावान्न कृत्स्नतेषु गौणत्वं प्रसिद्धवस्तुभेदस्य विशेषसामान्ययोर्हि सिंहदेवदत्तयोरग्निमाणवकयोर्वा गौणप्रत्ययः शब्दप्रयोगो वा स्यान्नागृह्यमाणसामान्यविशेषयोः

यत्तूक्तं श्रुतिप्रामाण्यादिति तत्प्रामाण्यस्यादृष्टविषयत्वात् ॥ राम

देहे

ति पश्यतीति स्वान्वयव्यतिरेकाभ्यामनुभवानुसारेण सिद्धमर्थमुपसंहरति तस्मादिति तत्त्वतस्त्वात्र देहादावहंप्रत्ययस्य प्रतिरोधः किंच व्यवहारभूमौ अहंप्रत्ययस्य गौणत्वमापादकाभावान्न प्रकल्पते अभावान्न देहादावहं शब्दप्रत्ययो गौणो विस्पष्ट इत्याह पश्यतीति अदृष्टविषयत्वेन प्रामाण्यात्सत्यं गौरात्मनो देहादिव्यतिरेकावधारणात्तस्य देहादावहंममाभिमानस्य गौणत्वेन स्मृतमनुवदति पश्यतीति श्रुतिप्रामाण्यस्यादृष्टार्थविषयत्वान्मानान्तरसिद्धव्यतिरिक्तात्मनि वेदनाप्रामाण्याभावान्न तदवष्टम्भेन देहादावात्माभिमानस्य गौणताहेत्वन्तरमाह यस्येति ॥

श्लो॰
१७

278

क्षेत
व

ऽनीतानां नित्यानां जन्मनोर्विवर्तमानेपि जन्मनि कर्तृत्वादि संसारस्य वस्तुत्वमाशंक्याह यथेति विमतौ कालावविद्याकृतसंसारवंतौ कालत्वाद्वर्तमानकाल
वदित्यर्थः संसारस्याविद्याकृतत्वे फलितमाह ततश्चेति तस्याविद्यकत्वे विद्यापोह्यत्वे हेत्वंतरमाह अविद्येति कुतोस्याविद्याकृतत्वं धर्माधर्मकृतत्वसंभवा
दित्याशंक्याह देहादीति आत्मनो धर्मादिकृतत्वस्याविद्यात्मनो विद्याविनाकर्मिणा देहाद्यभिमानः संभवस्तत्र आत्मनः संघातेऽहमभिमानस्याविद्या विषयाऽ
विद्यमानत्वेत्यर्थः आत्मनो देहाद्यभिमानस्याविद्यत्वमन्वयव्यतिरेकाभ्यां साधयन्नतिरेकं दर्शयति नहीति अन्वयं दर्शयन्नतिरेकमनुवदति य

यथास्मिन्जन्मनि देहादिसंघाताभिमानरागद्वेषादिकृतौ धर्माधर्मौ तत्फलानुभवश्च तथातीतेतरेपि जन्मनीत्यनादिरविद्याकृतः त८
संसारोऽतीतोऽनागतश्चानुमेयः ततश्च सर्वकर्मसंन्यासात् ज्ञाननिष्ठाया मोक्षांतिकः संसारोपरम इति सिद्धम् अविद्यात्मकत्वाच्च देहाभि
मानस्य तन्निवृत्तौ देहाद्यनुपपत्तेः संसारानुपपत्तिः देहादिसंघाते आत्माभिमानोऽविद्यात्मको नहि लोके गवादिभ्योऽन्योऽहमत आत्मे
गवादेः परस्येति ज्ञानं नतेष्वहमिति प्रत्ययमन्यते कश्चिद्देहे ज्ञानं न तु स्थाणौ पुरुषबुद्धिवज्ज्ञानवद्विवेकजो देहादिसंघाते कुर्वेहमिति प्रत्ययेन
विवेकतो न ज्ञानं न यथात्मा वै पुत्रनामासीति पुत्रे देहप्रत्ययः तत्तु जनकत्वं धर्मो गौणो गौणोन चात्मनात्मनोऽन्याविस्मरणापेक्षा येन शव अन्यर
तेकार्ये गौणोऽसि हाग्निर्ध्वंमुख्योसि देहाग्निकार्ये वत ॥ ॥ श्रीरामचंद्राय नमः

निमित्तोऽ
ज्ञानमित्युक्ते पितुरहंधीर्वेदपुत्रेपि देहाद्यहंधीर्गौणी इत्युक्तमनुवदति यथेति तत्र दृष्टांतं स्फुटयति गौणात्मविषयत्वं संगिरोतीति यथेति हि देहादावपि त
न पैवास्वकीयेस्मादहंधीर्गौणीत्याशंक्याह गौणेनेति नहि स्वकीये न पुत्रादिना गौणात्मना पितुर्भोजनादिकार्यं क्रियते न यादेहादेर्गौणात्मत्वेन
तेन कर्तृत्वादिकार्यमात्मनो मुख्यात्मनो न वास्तवं सिध्यतीत्यर्थः गौणात्मनो नास्ति वास्तवं कार्यमित्यत्र दृष्टांतमाह गौणो हीति नहि गौणोऽग्निरिति देन
देवदत्तेन मुख्याग्निरिति हकावेरि पतेनापि गौणात्मनो मातापितृके न मुख्याग्निकार्यं देहाद्यपाकादि तथा देहादिनाऽभोक्तात्मना मुख्यात्मनो न वास्तवं कार्यं कर्तृ
त्वादिकं नैशाक्षमित्यर्थः ८

ब्रह्मविद्यायां बाधकानुपपत्तिं दृष्टान्तेन साधयति यथेति देहादिसंघातवद्देहस्येत्यर्थः लौकिकात्मावगतेरित्यात्मावगतेर्विधिव्यतिरेकमुदाहरणेन स्फोरयति यथेति फल
मज्ञाननिवृत्तिः कर्मविधिश्रुतिवदिष्टफलं दृष्टान्ते विघटयति नचेति श्रवणादिकालपूर्वकं स्वाभाविकप्रवृत्तिव्यक्तौनां प्रतिषेधेन यागादौ लौकिकप्रवृत्तिव्यक्तौ जनय
ति कर्मकाण्डश्रुतिस्तद्वन्नेच विनापि कृद्धारां प्रत्यगात्माभिमुख्यप्रवृत्तिमुत्पादयति न बाधकमेति विधिश्रुतीनां पारंपर्येण प्रत्यगात्मताना चेत्तास्तात्त्विकप्रामाण्य
सिद्धिरित्यर्थः नन्वेवमपि श्रुतेर्मिथ्यात्वाद्भ्रमाभासवदप्रामाण्यमिति चेन्नेत्याह मिथ्यात्वेपीति स्वरूपेणासत्यत्वेपि सत्योपेयद्वारा प्रामाण्यमित्यत्र दृष्टान्तमाह
हृ

यथा ब्रह्मविद्यायां विधिशून्यत्वात्मन्यवगते देहादिसंघाते ऽहंप्रत्ययो बाध्यते ऽत्यात्मन्येवात्मावगतिर्न कदाचित्केनचित्क्वचिदपि बाधितुं शक्या
फलाव्यतिरेकादवगतेः यथाग्निरुष्णः प्रकाशश्चेति न च कर्मविधिश्रुतेरप्रामाण्यं पूर्वपूर्वप्रवृत्तिनिरोधेनोत्तरोत्तरप्रवृत्तिजननेन प्रत्यगा
त्माभिमुख्यप्रवृत्त्युत्पादनार्थत्वात् मिथ्यात्वेप्युपायस्योपेयसत्यतया सत्यमेव स्यात् यथार्थवादानां विधिशेषाणां लोकेपि
बालोन्मत्तादीनां पयआदौ पाययितव्ये चूडावर्धनादिवचनं प्रकारान्तरस्यानौत्साद्देव प्रामाण्यमिति दिक् प्रागात्मज्ञातादेहाभिमान
प
निमित्तप्रत्यक्षादिप्रामाण्यवत्॥

धेनोत्तरो

279

यथेति मन्त्रार्थवादेतिहासपुराणानां श्रुतेरर्थे प्रामाण्यं भावेपि शेषविध्यनुरोधेन प्रामाण्यवत्प्रकृतेपि श्रुतेः स्वरूपेणासत्यायाः विषयसत्यत्वद्वारा सत्यत्वे
प्रामाण्यमविरुद्धमित्यर्थः वाक्यस्य शेषविध्यनुरोधेन प्रामाण्यनालौकिकमित्याह लोकेपीति कर्मकाण्डश्रुतीनामुक्तरीत्या पारंपर्येण प्रामाण्येपि तासा
त्र मप्रामाण्यमुपेक्षितमित्याशंक्याह प्रकारान्तरेति आत्मतत्त्वानवगमावस्थां प्रकारान्तरं तत्र स्थितानां कर्मश्रुतीनां स्वतात्पर्ये बाधकत्वेन तास्त्वादे
वप्रामाण्यमिष्टमित्यर्थः ज्ञानात्पूर्वं कर्मश्रुतीनां व्यावहारिकप्रामाण्ये दृष्टान्तमाह प्रागिति प्रमीतिकर्तृत्वस्याविद्यात्वेपि श्रुतिप्रामाण्यमप्रत्यक्षमि
व
त्युक्तं॥

[illegible]मिथ्यात्मनो =
अज्ञाततविषयता
२४
रायश्[illegible]

श्रुतिप्रामाण्यस्यैरं द्विविषयत्वं स्यघपति[illegible]स्थादीति अज्ञातार्थज्ञापकं प्रमाणमिति स्थिते न ज्ञाते पि श्रुतिप्रामाण्यमित्याह [illegible]ति अज्ञातत्वसाध्य साधनसंबंधबोधिनः शास्त्रस्यानतिरिक्तार्थत्वं दीपस्यैफलितमाह [illegible]दिति अन्वयव्यतिरेकाभ्यां हि भिन्नज्ञाननिश्चितो देहादिसंघाते हं प्रत्ययस्य तिपावत अनन्यविषयत्ता चोदनाया नातिरिक्तान्यविषयत्वेनयुक्तं शरीरी तद्विषयत्वं गौ कारे विनत ब्रूते श्रवणमप्रभविष्यतीत्याह [illegible]तीति अपौरुषेयायाः श्रुतेरस्मा वितरोषणाः मानान्तरविरोधे पि प्रामाण्यमप्रत्याख्येयमित्यभिप्रेत्याह [illegible]तीति स्वार्थबोधपरायाः श्रुते विरोधात्मत्वादि न स्वार्थवादित्वेन तस्याः विवक्षितमर्थान्तरमविरुद्धं तत्स्यात् स्वीकार्यं अविरोधेन तत्र प्रामाण्योपपत्तेरित्याह [illegible]र्थादीति अविरोधमवधार्य श्रुत्यर्थकल्पनान्यु

प्रत्यक्षादिप्रमाणोपलब्धे हि विषये मिलेत्रादिसाध्यसाधनसंबंधे श्रुतेः प्रामाण्यं न प्रत्यक्षादिविषये [illegible]दृष्टदर्शनार्थत्वात्प्रामाण्यस्य तत्सान्ये द्रष्टृ भिन्नज्ञाननिश्चितस्याहंप्रत्ययस्या [illegible] देहादिसंघाते गौणत्वं कल्पयितुं शक्यं [illegible] हि श्रुतिशतमपि शीतो ग्निरप्रकाशो वेति ब्रुवत् प्रामाण्यमुपैतीति [illegible]दि ब्रूयात् शीतो ग्निरप्रकाशो वेति तथाप्यर्थान्तरं श्रुतेर्विवक्षितं कल्प्यं प्रामाण्यान्यथानुपपत्तेः [illegible]प्रमाणान्तरं विरुद्धं स्ववचनविरुद्धं वा [illegible] मेतो भिन्ना प्रत्ययगोचरस्यात्मनो [illegible]भावे श्रुतेरप्रामाण्यमिति चेत् न [illegible]ब्रह्मविद्याया अपवर्गोपपत्तेः [illegible] मेवबाधि श्रुतिवत् ब्रह्मविद्याया श्रुतेरप्रामाण्यप्रसंगस्ति बाधकप्रत्ययानुपपत्तेः १ ०

कैतिव्याह [illegible] सैमाह [illegible]ति अविद्यावत् [illegible]यीति स्वर्गकामे कर्मेति त्वपो वगमात् तत्त्वज्ञानापादितविद्याया अविद्याभावे तत्स्वीकर्तुरभावात् तर्हि तत्त्वज्ञानादविद्यानिवृत्तौ कर्मकाण्डप्रामाण्यमित्यवगम्यविधिविरोधः स्यादिति शंकते [illegible]दिति कर्मकाण्डश्रुतेर्विद्यार्थत्वेनाव्यवहारिकप्रामाण्यस्वलाभाविकप्रामाण्यभावेपि न श्रुत्यसैकोश्रुते व्यावहारिकप्रामाण्यस्य ब्रह्मविद्याजनकत्वेनोपपन्नत्वान्नाप्रपयत्नविरोधः शास्त्रमीहरतिन श्रुतेस्तिकमेकांश श्रुतेस्तात्विकप्रामाण्यभावेष्वैकोश्रुतेरविनष्टसिद्धिर्विशेषादिति शंकते [illegible]दिति उत्पन्नायां ब्रह्मविद्यायां बाधकाभावेन प्रामाण्यस्वा नेऽहं न श्रुते स्वालिकं प्रामाण्यमिति हृदयविज्ञानन् [illegible]केति १

ॐ

दः १

यदुक्तमस्ति कुक्कर्मेयजमानस्येति तत्राह यजमानस्यापीति स्वव्यापारादेवमुख्यं कर्तृत्वमिति स्थिते फलितमाह तस्मादिति तदेव प्रपंचयति यदीति तर्हि सन्निधाना
देवमुख्यं कर्तृत्वं राजादीनामुपगतमिति नेत्याह नतथेति राजादीनां स्वव्यापारवत्त्वे पूर्वोक्तं सिद्धमित्याह तस्मादिति राजप्रभृतीनां सन्निधेरेव कर्तृत्वस्य गौणत्वे
जयादिफलवत्त्वस्यापि सिद्धं गौणत्वमित्याह तथाचेति तत्र पूर्वोक्तहेतुत्वेन समारोपयति नेति अन्यव्यापारेणान्यस्य मुख्यकर्तृत्वाभावे फलितमुपसंहरति तस्मा

यजमानस्यापि प्रधानस्य योगेन दक्षिणादानेन च मुख्यमेव कर्तृत्वं तस्मादध्यापकस्य कर्तृत्वोपचारः यः स गौण इत्युपक्रम्यते यदि स्वव्य
मेव तु कर्तृत्वं स्वव्यापारलक्षणेनोपलभ्यते राजयजमानप्रभृतीनां तदा सन्निधिमात्रेणापि कर्तृत्वे मुख्यं परिकल्प्येत यथा भ्रामकस्य लो
ह भ्रामकत्वं तथा राजयजमानादीनां स्वव्यापारेणोपलभ्यते तस्मात्सन्निधिमात्रेणापि कर्तृत्वं गौणमेव तथा च सति तत्फलसंबंधोऽपि गौ
ण एव स्यात् न गौणेन मुख्यं कार्यं निर्वर्त्यते तस्मात्तदेवं तत्र सति देहादीनां व्यापारेणाव्याप्रत आत्मा कर्ता भोक्ता च स्यादिति भ्रांति वि
भिन्नं च सर्वं नोपपद्यते यथा स्वप्नमायावैभवं च देहाद्यात्मप्रत्ययभ्रांतिसंतानविच्छेदेषु सुषुप्तसमाध्यादिषु कर्तृत्वभोक्तृत्वाद्यनु
पलभ्यते तस्मात् भ्रांतिप्रत्ययनिमित्त एवायं संसारभ्रमः न तु परमार्थ इति सम्यग्दर्शनादत्यंतमेवोपरम इति सिद्धम् ६

दिति कथं तर्हि त्वयात्मनि कर्तृत्वादि स्वीकृतं न हि बुद्ध्यादिहेतुकर्तृशास्त्रार्थवत्त्वादि निष्पादनञ्चात आह भ्रांतीति कर्तृत्वाद्यात्मनि भ्रांतमित्येतदुदाहरणे
न स्फोरयति यथेति मिथ्याज्ञानकृतमात्मनि कर्तृत्वादेस्तत्र व्यतिरेकं दर्शयति न चेति उक्तव्यतिरेकफलं कथयति तस्मादिति संसारभ्रमस्याविद्या
कृतत्वे सिद्धे परमप्रकृतमुपसंहरति इति सम्यगिति ॥६

यत्न

280

संप्रतिकर्तृत्वस्य प्रकारान्तरेण पारमार्थिकत्वमुपपादयति यदीति स्वव्यापाराभावेऽपि सन्निधिमात्रेण कुतो मुख्यं कर्तृत्वमित्याशंक्य दृष्टान्तमाह यथेति स्वयमयुध्यमानत्वे कथं तत्फलवत्त्वमित्याशंक्य प्रसिद्धिवशादित्याह जितेति कायिकव्यापाराभावेऽपि कर्तृत्वस्य मुख्यकर्तृत्ववद् दृष्टान्तमाह सेनापतिरिति तस्यापि फलवत्त्वं एव तद्विशिष्टमित्याह क्रियेति अन्यकर्मणा अन्यस्य सन्निहितस्य मुख्यकर्तृत्वे वैदिकमुदाहरणमाह यथा चेति कथं ऋत्विक्कर्म यजमानस्येत्याशंक्याह तस्येति स्व

कृतमनुसेत् स्वयमव्यापृियमाणोऽप्यात्मा सन्निधिमात्रेण करोतीति तदेव च मुख्यं कर्तृत्वमात्मनो यथा राजा युध्यमानेषु योधेषु युध्यत इति प्रसिद्धं स्वयमयुध्यमानोऽपि संनिधानादेव जितः पराजित इति च तथा सेनापतिर्वाचैव करोति क्रियाफलसंबंधश्चैतस्य सेनापतेश्च दृष्टः यथा च ऋत्विक्कर्म यजमानस्य तथा देहादीनां कर्मात्मकृतं तस्यात्मनः फलस्यात्मगामित्वात् यथा च भ्रामकस्य लोहभ्रामयितृत्वात् व्यापृतस्यैव मुख्यमेव कर्तृत्वं तथा चात्मन इति नटस्त दकुर्वतः काकलप्रसंगात् तारकमनेकप्रकारमिति चेत् न प्रभृतीनां मुख्यस्यापि कर्तृत्वस्य दर्शनात् राजा तावत् स्वव्यापारेणापि युध्यते योधानां योधयितृत्वेन धनदानेन च मुख्यमेव कर्तृत्वं तथा जयपराजयफलोपभोगेनेति तथा

व्यापाराद् ते सन्निधेर्वा स्वव्यापाराद्धेतोर्मुख्यकर्तृत्वे दृष्टान्तमाह यथा चेति क्रियां कुर्वन् कारणेऽकर्मकमित्यंगीकारविरोधश्चैतदिति दूषयति नटस्तदिति कारकविशेषविषयत्वेनाङ्गीकारोपपत्तिरिति शंकते कारकमिति स्वव्यापारमन्तरेण न किंचिदपि कारकमिति परिहरति नरोनेति दर्शनमेव विवरयति राजेति यथा राज्ञो युद्धे योधयितृत्वेन धनदानेन च मुख्यत्वं तत्फलभोगोऽपि मुख्यमेव तस्य कर्तृत्वमित्याह तथेति ७

२८

शास्त्रसंप्रदायप्रवृत्तस्य धर्ममुत्तरश्लोकद्वयेन दर्शयति संप्रदायेति परस्याध्यापको निर्दिश्यते परमत्वं चास्य निरतिशयपुरुषार्थसाधनत्वमित्याह परममिति गोप्य
त्वमस्य रहस्यार्थविषयत्वात्तदुपयोक्तसंवादरूपग्रन्थस्यैतादृशस्य भक्तेषु स्थापनेच्छां तमाह यथेति मयि वासुदेवे भगवति अनन्यभक्तेष्वपि प्रयासमवाप्य यो ग्र
तः स्थापितं तन्मद्भक्तेष्वनन्येष्वपि योग्येषु यद्यभिमे स्थापयिष्यति तस्येदं फलमित्युत्तरं च संबंधः नाभक्तायेति भक्तिरधिकारिविशेषणत्वोक्तेर्मद्भक्तेष्विति पु
नर्भक्तिग्रहणमनर्थकमिति साशंक आह भक्तेरिति मुमुक्षुत्वादिसहकारिरहितस्य केवलसद्व्यर्थोपयोगमात्रशब्देन सूचितमेतन्न यापीतरेण स्फुटीकृत
संप्रदायस्य कर्तुः फलमिदानीमाह परमेयपयोक्ते परमे निःश्रेयसार्थे केशवार्जुनयोः संवादरूपं ग्रन्थं गुह्यं गोप्यतमं मद्भक्तेषु मयि भक्तिम
त्स्वभिधास्यति वक्ष्यति ग्रन्थतो ऽर्थतश्च स्थापयिष्यतीत्यर्थः यथा त्वयि मया भक्तेः पुनर्ग्रहणात्तद्भक्तिमात्रेण केवलेन शास्त्रसंप्रदाने पात्रं
भवतीति गम्यते कथमभिधास्यतीत्युच्यते भक्तिं मयि परां कृत्वा भगवतः परमगुरोः अच्युतस्य शुश्रूषा मया क्रियत इत्येवं कृत्वेत्यर्थः तस्येदं फ

य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ६८ न च तस्मान्मनुष्येषु क
श्चिन्मे प्रियकृत्तमः भविता न च मे तस्मादन्यः प्रियतरो भुवि ६९

लं मामेवैष्यति मुच्यत एवात्र संशयो न कर्तव्यः ६८ किं च न च तस्मादिति शास्त्रसंप्रदायकृतो मनुष्येषु मनुष्याणां मध्ये कश्चिन्मे मम प्रियकृत्तमो ऽति
शयेन प्रियकृत्तमो ऽन्यः प्रियकृत्तमो नास्त्येव सर्वेषु वर्तमानेषु न च भविता भविष्यत्यपि काले तस्माद्द्वितीयो ऽन्यः प्रियतरो भुवि लोके ऽस्मिन्प्र
मितस्य विरोधः श्रवणपूर्वकमभिधानप्रकारमभिनयति कथमित्यादिना भगवति भक्तिकरणं प्रकटयति भगवतश्चेति पद्यत्वापेक्षितं पूरयति तस्येति मामेवै
ष्यत्यस्यान्वयं प्रगृहीत्वा व्याचष्टे मुच्यत एवेति ६९ ननु सर्वेषां मुक्तिसाधनानां ध्यानस्य श्रेष्ठत्वात्तन्निष्ठस्य सद्गुरोर्नोक्ति विद्यासंप्रदाने प्रवृत्तिरिति तं
त्राह किं चेति इतरस्य विद्यासंप्रदाने मुमुक्षुणां पयोक्तविशेषणवतो कर्तव्यमित्यर्थः वर्तमानेषु मध्ये तनोऽन्यो नास्त्येव प्रियकृत्तमो नाप्यतीतेषु नाहं क
श्चिदासीदिति शेषः तस्माद्विद्यासंप्रदायकर्तुः सकाशात् ध्याननिष्ठस्य श्रेष्ठत्वेऽपि तत्संप्रदायप्रवर्तकस्य श्रेष्ठतमत्वादुचिता विद्यासंप्रदाने प्रवृत्तिरि
ति भावः ६९

281

शास्त्रं तात्पर्यार्थे विचारस्थाने निर्धार्यानंतरं श्लोकमवतारयति सर्वधर्मानिति प्रकृते खल्वष्टादशाध्याय्या गीताशास्त्रार्थं तत्र प्रतिपत्तिसौकर्यार्थमुपसंहृत्यानेन चतुर्व
धर्मान्परित्यज्येत्यस्मिन्सारे विशे षगतत्त्वस्य संक्षेपेणोपसंहारं कृत्वा संप्रदायविधिवचनस्यावसरे सतीदानीमिति पातनिका क्रियत इति विस्तरेणोपसंहृतः शास्त्रार्थः सं
क्षिप्योपसंह्रियते नन्वाह शास्त्रार्थेति संक्षेपविस्तराभ्यामुक्तो यः सर्वेषां हितपारुषिमार्घरोहितीत्यर्थः हितायेत्यत्र देवव्याख्या चेष्ट संसारेति कदाचनेति तद्वेः संव ६
ध्यते प्रतिषेधसामर्थ्यसिद्धमर्थं कथयति भगवतीति अर्थसिद्धेऽर्थे स्वरसेनाऽऽमनुस्वरस्य मेधावि [illegible]

सर्वं गीताशास्त्रार्थमुपसंहृत्यास्मिन्नध्याये विशेषतश्चांते इह शास्त्रार्थदार्ढ्याय संक्षेपतश्चोपसंहारं कृत्वा। अथेदानीं शास्त्रसंप्रदायविधिमाह इदं शास्त्रं ते
तव हिताय मयोक्तं संसारविच्छित्तये नातपस्काय तपोरहिताय न वाच्यमिति व्यवहितेन संबध्य[illegible]तेनाभक्ताय गुरौ देवे च भक्तिरहिताय क
दाचन कस्यांचिदप्यवस्थायां न वाच्यं भक्तस्तपस्व्यपि सन्नशुश्रूषुर्यो भवति तस्मा अपि न वाच्यं न च यो मां वासुदेवं प्राकृतं मनुष्यं मत्वाऽभ्यसूयति

इदं ते नातपस्काय नाभक्ताय कदाचन न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ६७

आत्मप्रशंसादिदोषाध्यारोपणेन ममेश्वरत्वमजानन्न सहते तावप्ययोग्यस्तस्मा अपि न वाच्यं भगवत्यनसूयायुक्ताय तपस्विने भक्ताय शु
श्रूषवे अनसूयवे वाच्यं शास्त्रमिति सामर्थ्याद्गम्यते तथा मेधाविने तपस्विने वेत्यनयोर्विकल्पदर्शनात् शुश्रूषाभक्तियुक्ताय तपस्विने तद्युक्ताय मे
धाविने वा वाच्यं शुश्रूषाभक्तिवियुक्ताय न तपस्विने नापि मेधाविने वाच्यं भगवत्यसूयायुक्ताय समस्तगुणवतेऽपि न वाच्यं गुरुशुश्रूषाभक्तिमते च वा
त्वमेतन्मीवपत्ति मेधावीति विकल्पदर्शनादित्युक्तेषु विशेषणेषु मेधावित्वमपि प्रविशतीत्यर्थः विकल्पे पुनरेक ॥च्यमित्येष शास्त्रसंप्रदायविधिः ६७
यमधिकारी प्रतिपत्तिरिति तत्राह शुश्रूषेति नात्मा उक्ताय भगवत्यसूयारहिताय तपस्विने वाच्यमिति संबंधः तद्युक्ताय शुश्रूषाभक्तिः अनसूयाहितायेत्यर्थः
तपस्वित्वं मेधावित्वं वा निरपेक्षमधिकारिविशेषणमिति शंकां वारयति शुश्रूषेति भगवति दूषणारोपस्य नाम्नोऽसूयपति भगवतीति किं तर्हि वाच्यं तत्र रु
हि स्मारयन्नपि वीतं सर्वगुणसंपन्नायेत्याह गुरुशुश्रूषेति अनुक्तेनारविशेषणेऽपि लक्षणाय तु भयग्रहणे मेधाविनस्तपस्विनश्च नातीवापेक्षितेत्येवमन्यतद्
धिकाभावादित्ययुक्तिनमेवेति भावः ६७

गी॰भा॰१८
४०

282

आचार्येण शिष्याय पुनरावृत्तानां संशयविपर्यासानां तावदनेकधा परेच्छमिति दर्शयितुं भगवानर्जुनं पृष्टवानित्याह शिष्यस्येति प्रष्टुरभिप्रायं प्रकटयति स्वहृदगतमिति शि
ष्यश्चेदुक्तमगृहीतं तु नेहेत हितं प्रसौ हासीन्यमाचार्यस्योचितं तत्समग्रदृष्टुमित्यादिना शंक्याह पलान्तरमिति कच्चिदिति कोमलप्रश्नमेतमेव व्याचष्टे किमेतदि
ति द्वितीयं किंपरं एवं सम्याख्यानं तपा संबध्यते कच्चिदिति द्वितीयं प्रश्नं विभजते किंप्रणष्ट इति मोहप्रणाशप्रश्नं तं गदर्शयति पदपदेरति ७२ ह्येमो

शिष्यस्य शास्त्रार्थग्रहणाग्रहणाविवेकबुभुत्सया पृच्छति नस्यग्रहणे तातेपुनर्ग्राह यिष्यामि उपायान्तरेणापि इति प्रष्टुरभिप्रायेण एतत्
नरमास्याय शिष्यः कृतार्थः कर्तव्य इत्याचार्यधर्मः प्रदर्शितो भवति कच्चित् किमेतत् मयोक्तं श्रुतं श्रवणेनावधारितं त्वया पार्थ किं त्वया एका
ग्रेणैव तता चित्तेन किं वा प्रमादेन कच्चिदज्ञानसंमोहो ज्ञाननिमित्तः संमोहो विचित्तभावो अविवेकता स्वाभाविकः किं प्रणष्टो यद

कच्चिदेतत्श्रुतं पार्थ त्वयैकाग्रेण चेतसा कच्चिदज्ञानसंमोहः प्रणष्टस्ते धनंजय ७२ अर्जुन उवाच
व नष्टो मोहः स्मृतिर्लब्धा ०

योयं गीताशास्त्रश्रवणात्प्राक्तव मयैवोपदेष्टव्यात् पूर्वं त्वत्तो नृ अं धनंजय ७२ अर्जुन उ० नष्टो मोहो ज्ञानाज्ञः समस्तः सं
सारानर्थहेतुः सागर इव दुरुत्तारः स्मृतिश्चात्मतत्त्वविषया लब्धा यस्याला भात्सर्वग्रंथीनां प्रविमोक्षः ०

परिहृतात्मतानस्यात्तानसंदेहविपर्यासरहितस्य पृच्छस्य भगवदनुग्रहप्राप्तिरुपनेन भगवंतं परितोषयिष्यन्नर्जुनो विज्ञापितवानित्याह अर्जुनइति
अत्ता नोत्पस्याविवेकस्य न हत्व मेवस्य पतिस मस्तरति स्वयं ज्योतिषि प्रतीचि ब्रह्मण्येव विद्याश्रमं विद्यापन्न पतितां विदितं प्रकाशापत्तो तिम स्वाह
स्मृतिश्चेतिस्मृतिलाभे किं स्यादिति चेन्नराह यस्मा इति ०

त
तन॰
४०

संप्रदायप्रवक्तुः सर्वाधिकं फलं सवक्ताविस्पष्टः स्युक्तोन सविम्याधिदैवतमिति तिम्यापेनोक्त्वा संप्रश्नस्यैतुर्विवृतिनं फलमाह योपीति पद्योक्तः स्पशात्त्वस्पयोध्ये
तानेनेदं कृतं स्यादिति संबंधः तदेवाह अध्येष्यते इति तेनेदं कृतमित्यत्र देशवार्थं विशदयति ज्ञानेति तेनाहमिष्टः स्यामिति संबंधः चतुर्विधानां यज्ञानां
मध्ये ज्ञानयज्ञस्य श्रेष्ठ्यात्मया यज्ञानां ज्ञानयज्ञ इति विशिष्टत्वाभिधानात्तेनाहमिष्टः स्यामित्युपनयनस्तुतिरभिप्रेता साह विधीति पद्योत्तरमाह क

योपि अध्येष्यते च पठिष्यति य इमं धर्म्यं धर्मादनपेतं संवादरूपं ग्रंथमावयोस्तेनेदं कृतं स्यात् ज्ञानयज्ञेन विधिज्ञं यो पाभ्युमानं सानां यज्ञानां ज्ञानयज्ञो मानस
त्वाद्विशिष्टतमः स्यात्तेन ज्ञानयज्ञेन गीताशास्त्रस्याध्ययनं स्तूयते लविधिरेवादेवताद्विषयज्ञानं यज्ञफलं तुल्यमस्य फलं भवतीति तेनाध्ययने

अध्येष्यते च य इमं धर्म्यं संवादमावयोः ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ७० श्रद्धावाननसू
यश्च शृणुयादपि यो नरः सोपि मुक्तः शुभान् लोकान्प्राप्नुयात्पुण्यकर्मणां ७१

नाहमिष्टः पूजितः स्यां भवेयमिति मे मम मतिरिति निश्चयः ७० अथ श्रोतुरीदृक्फलं श्रद्धावान् श्रद्धानो अनसूयश्चासूयावर्जितः सन्निमं ग्रंथं शृणुया
पो दपि न तु विशब्द्यात् किमुतार्थज्ञानवान् सोपि पापान्मुक्तः शुभान्प्रशस्तान् लोकान्प्राप्नुयात्पुण्यकर्मणाम् अग्निहोत्रादिकर्मवताम् ७१ मा
लेति फलमेवं पृष्टः पृच्छतीति देवतादीति पठित्वा ज्ञानयज्ञस्य फलं केवलं तेन न तुल्यमस्याध्येतुः संपद्यते तस्य देवता ध्यानं त्वमिति स्यर्थः कथमध्ययनादेव सर्वात्मत्वं फ
लेन भवतीत्यस्मात्तत्सर्वमभवदिति त्वत्राह नेति तेनाध्येत्रा ज्ञानयज्ञतुल्यं नाध्ययनेन श्रद्धावानिष्टः स्यादित्यनादुक्तफलमविरुद्धमित्यर्थः ७१ प्रवक्तुरध्ये
तुश्च फलमुक्त्वा श्रोतुरिदानीं फलं कथयति श्रद्धेति ७१

॥ ५ ७

एतस्य संवादस्य श्लाघ्यत्वं लिंगत्वेनेनेत्यभिप्रेत्याह इत्यहमिति परमं गुह्यं वाचोपपिकत्वात्सरहस्यं परं गुह्यमतिशयेन गुह्यं रहस्यमिति वा योगेश्वरात्तनं कमेव तद्दर्शयेत्वादयं स
संवादो येनोक्तः अथवा चित्तवृत्तिनिरोधस्य योगस्य योगत्वात्संवादो योगस्तस्माह संवादमिति योगानामीश्वरो योगेश्वरस्तद्रूपहेतुत्वात् योगानस्फल
योत्ततः साक्षादव्यवधानेन श्रुतवानन्न परंपरयेत्याह योगेश्वरादिति स्वयं स्वेन परमेश्वररूपेणानिरस्कृतत्वान्नैश्वर्येण कथयतो व्याचक्षाणादिसर्वं ७४
यथोक्तं संवादं भगवतः श्रुत्वा किमुपेक्ष्यसे नेत्याह राजन्निति उपत्वं साधयति अद्भुतमिति पञ्चविश्वरूपादर्शनरूपं गुणमर्जुनाय भगवान्दर्शितवा

व्यासप्रसादात्तो दिव्यचक्षुर्लाभात् श्रुतवानेतं संवादं गुह्यमहं परं योगं योगार्थत्वात्तं यो पियोगस्तं संवादमिमं योगमेव वा योगेश्वरात्कृष्णात्सा
क्षात्कथयतः स्वयं परं परमेशः ७५ हे राजन् धृतराष्ट्र संस्मृत्य संस्मृत्य संवादमिममद्भुतं केशवार्जुनयोः पुण्यं श्रवणादपि पापहरं श्रुत्वा हृष्या

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परं योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ७५ राजन्संस्म
त्य संस्मृत्य संवादमिममद्भुतं केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ७६ तच्च संस्मृत्य संस्मृत्य रूपम
द्भु त्य तं हरेः विस्मयो मे महान्राजन् हृष्यामि च पुनः पुनः ७७

मि च मुहुर्मुहुः प्रतिक्षणम् ७६ किं बहुना यत्र यस्मिन् पक्षे योगेश्वरः सर्वयोगानामीश्वरस्तत्प्रभवत्वात्सर्वयोगबीजः कृष्णो पत्र पार्थो य
यस्मिन्पक्षे धनुर्धरो गाण्डीवधन्वा ॰
न्रधुवा नार्थितदिहंनीतौ मनेति ७८ ७७ कृष्णो पि हृष्यार्जुनयोः नरनारायणयोः संवादस्य प्रामाण्यं पर्यपस्कृत्य पर्यवसाययति किं बहुनेति कथं सर्वेषां यो
गानामीश्वरो भगवानित्यत्राह तत्प्रभवत्वादिति सर्वे योगा ज्ञानेकमेव तस्य बीजे शास्त्रीयं ज्ञानवैराग्यादि तद्धि भगवदधीनं तदनुग्रहविहीनस्य न तद्योग
द्वतो योगानस्फलयो भग तदनुग्रहायत्ता भगवतो योगेश्वरत्वमित्यर्थः ७८

283

मोहनाशेस्मृतिलंभेचासाधारणंकारणमाह त्वत्प्रसादादिति प्रश्नजेनंप्रश्नप्रतिवचनेनलब्धमर्थंकथयति अनेनेतिपदुक्तंस्मृतिप्रतिलंभादशेषतोहृदयग्रंथीनां
विप्रमोक्षःस्यादितितत्रप्रमाणमाह तथाचेति ज्ञानादृतानंतत्कार्यनिवृत्तौ श्रुत्यंतरमपिसंवादयति भिद्यतइति भगवदनुग्रहाद्ज्ञानहतमोहहताहानंतरमा
त्मज्ञानेप्रतिलब्धेतदाज्ञाप्रतीक्षोहमित्युक्तएवमाकरोति स्थितेति तवववचनंकरिष्येहमितात्रेत्तात्पर्यमाह अहमिति ७३ शास्त्रार्थेसमाप्तेतस्यस्पा मवस्था

त त्वत्प्रसादात्तवप्रसादात्मोपालंभात्समाधिनेनाच्युत अनेनमोहनाशप्रश्नप्रतिवचनेनसर्वंशास्त्रार्थज्ञानफलमेतावदेवेतिनिश्चितंदर्शितं
भवतिपदुक्तोज्ञानसंमोहनाशश्चात्मस्मृतिप्रतिलाभश्चेति तथाचश्रुतात्वनात्मवित्शोचामीतिउपन्यस्यात्मज्ञानेनसर्वग्रंथिविप्रमोक्षउक्तः भिद्यतेहृदयग्रं
थिस्तत्रकोमोहःकःशोकएकत्वमनुपश्यतइतिचमंत्रवर्णाः अथइदानींलब्धात्मनेष्टिनोस्मिगतसंदेहोमुक्तसंशयःकरिष्येवचनंतवाह त्वत्प्रसा

त्वत्प्रसादान्मयाच्युत स्थितोस्मिगतसंदेहःकरिष्येवचनंतव ७३ संजयउवाच इत्यहंवासुदेव
स्यपार्थस्यचमहात्मनः संवादमिममश्रौषमद्भुतंरोमहर्षणम् ७४

दातत्तन्तार्थीनममकर्तव्यमस्तीत्यभिप्रायः ७३ परिसमाप्तसकलाम्नायशास्त्रार्थीः इदानींकथासंबंधप्रदर्शनार्थसंजयउवाच इत्येवम
हंवासुदेवस्यपार्थस्यचमहात्मनःसंवादमिमंयोगंमश्रौषंश्रुतवानस्मिअद्भुतंविस्मयकरंरोमहर्षणंरोमांचकरं ७४ तदेव

यःसंतयवचनंकुत्रोपयुक्तमितितत्राह परीसमाप्तइति वासुदेवस्यसर्वात्मसर्वेश्वरस्यहृतार्थेसपार्थेस्यपार्थस्यतत्सासुहृत्सस्समहात्मनोंभृद्धद्धेःसर्वाधिकारि
णिसंपन्नस्यसम्यग्वादेसंवादेगुरुशिष्यभावेनप्रश्नप्रतिवचनाभिधानमिममनुक्रान्तमद्भुतंविस्मयकरंरोमाणांहृष्यंतिपुलकीभवंत्यनेनेतिरोमहर्षणमाल्हा
दकरंयथोक्तंश्रुतवानस्मीत्याह इत्येवमिति ७४ प्रकृष्टसंवादेकथमश्रौषीरितिचेत्तत्राह व्यासेति ॥७४

आ०१८ श्रीर्लक्ष्मीर्विजयः परमउत्कर्षः राज्ञो धृतराष्ट्रस्य स्वपुत्रेषु विजयाशां शिथिलीकृत्य पांडवेषु जयप्राप्तिमैकांतिकीमुपसंहरति
४२ इत्येवमिति उपायोपेयभावेन निष्ठाद्वयस्य प्रतिष्ठापितत्वात्कर्मनिष्ठापरंपरया ज्ञाननिष्ठाहेतुः ज्ञाननिष्ठा तु साक्षादेव मो तत्त्वम:
क्षहेतुरिति शास्त्रार्थमुपसंहर्तुमितीत्युक्तं ७८॥ कांडत्रयात्मकं शास्त्रं पदवाक्यार्थगोचरम् आदिमध्यांतषट्केषु व्याख्या
यागोचरीकृतम् १ संक्षेपविस्तराभ्यां यो लक्षणोरूपपादितः सोर्थोतिमिनसंक्षिप्य लक्षणेन विवक्षितः २ गीताशास्त्रं शंकर:
महार्णवोस्यममत्तेवैकुंठकंठोद्भवम् श्रीकंठोपरनामवत्मुनिकृतं निष्ठाद्वयं द्योतितम् निष्ठा यत्र मतिप्रसादजननी

तत्र श्रीस्तस्मिन् पांडवानां पक्षे विजयस्तत्रैव भूतिः श्रेयोविशेषो विस्तरो भूतिर्ध्रुवाऽव्यभिचारिणी नीतिर्नय इत्ये

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ७८ इतिश्रीभग
284 वद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नामाष्टादशोऽध्यायः

वंमतिर्ममेति ७८ ॥ इतिश्रीगोविंदभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृ
तौ गीताभाष्येऽष्टादशोऽध्यायः १८ ॥

साक्षात्कृतं कुर्वती मोक्षेपर्यवसास्यती प्रतिदिनं सेवध्वमेतद्बुधाः ३ प्राचामाचार्यपादानां पदवीमनुगच्छता गीताभा
ष्ये कृता टीकाटीकतां पुरुषोत्तमम् ४ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रुद्धानंदपूज्यपादशिष्यभगवदानंद राम०
ज्ञानविरचिते श्रीगीताभाष्यविवेचनेऽष्टादशोऽध्यायः १८ (जगन्माययापत्रजन्मादिभेदैर्नरीनर्त्तिरुद्वांभुजंगा ४:
रिवत्तम् सदानंदरूपं यदुश्रेष्ठमेकं नतोऽस्म्यच्युतं सर्वथासाक्षिभूतं १) संवत् १८७४ मी० श्रावनवदी १५ ॥

178.
extra page
to fix in [illegible]

[illegible]𑆑𑆸𑆰𑇀𑆟𑆨𑆓𑆮𑆢𑇀𑆓𑆵𑆠𑆳
[illegible]𑆠𑆳𑆨𑆳𑆰𑇀𑆪𑆩𑇀

[illegible] 𑆑𑆁𑆨𑆳𑆰𑇀𑆪[illegible]
𑆩𑇀

गी०भा०१८ श्रीर्लक्ष्मीर्विजयः परमुत्कर्षः एतेन धृतराष्ट्रस्य स्वपुत्रेषु विजयाशा शिथिलीकृत्य पांडवेषु जयप्राप्तिमेकांतिकीमुपसंहरति ॥ यत्रेति ॥ उपायोपेयभावेन निष्ठा-

५२ द्वयस्य प्रतिष्ठापितत्वात्कर्मनिष्ठा परंपरया ज्ञाननिष्ठाहेतुः ज्ञाननिष्ठा तु साक्षादेव मोक्षहेतुरिति शास्त्रार्थमुपसंहृत्य प्रतीतो सुकरं ॥७८॥ क्रोडत्रयात्मकं शा-

गतमः स्त्रं पदवाक्यार्थगोचरम् ॥ आदिमध्यांतषट्केषु व्याख्ययागोचरीकृतम् ॥१॥ संते पवित्तराभाष्योल्लेखैर्ह्युपपादितः सार्थोऽतिमेनं संक्षिप्य लक्षणेन वि- श्लोकैः

वक्षितः ॥२॥ गीताशास्त्रमहार्णवोऽस्य मनने वैकुंठकंठोऽप्यहम् श्रीकंठापरनामवन्मुनिकृतं निष्ठाद्वयं योजितम् निःशेषत्रममतिप्रसादजननी सा- शांकरैः

तत्र श्रीस्तस्मिन्पांडवानां पक्षे विजयस्तत्रैव भूतिः श्रियो विशेषो विस्तरो भूतिर्ध्रुवाऽव्यभिचारिणी नीतिर्नय इत्येवं मतिर्ममेति ॥७८॥

285

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ७८ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षयोगो नामाष्टादशोऽध्यायः १८

इति श्रीगोविंदभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ गीताभाष्येऽष्टादशोऽध्यायः १८०

ज्ञानकार्यं सा सत्सु तं कुर्वीत मोक्षैकपर्यवसानं तिं प्रतिदिनं तं वध्येन क्षुधः ॥३॥ प्राच्यामाचार्यपादानां पदवीमनुगच्छता गीताभाष्ये कृता टीका टीकमानंदबोधत-

मम् ४० इति श्रीमत्परमहंसपरिव्राजकाचार्यशुद्धानंदपूज्यपादशिष्यभगवदानंदज्ञानविरचिते श्रीगीताभाष्यविवेचनेऽष्टादशोऽध्यायः

१८ संवत १९८४ उसवदी १७ वार सोमार ॥ श्री रामचंद्रायनमः [redacted] ७

राम

286

[illegible]

296